CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

369

MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS
SERIES—24

4

सत्यमेव जयते

शङ्करविजयः

(व्यासाचलविरचितः)

SANKARAVIJAYA

BY

VYASACALA

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.,
Curator, Government Oriental Manuscripts Library, Madras

(*Prepared under the orders of the Government of Madras*)

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1954

[PRICE, *Rs.* 9-2-0.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५१

वेदान्त आं. ४

१०८।६

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS
SERIES—24

शङ्करविजयः

(व्यासाचलविरचितः)

ŚAṄKARAVIJAYA

BY

VYĀSĀCALA

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.,
Curator, Government Oriental Manuscripts Library, Madras

(Prepared under the orders of the Government of Madras)

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1954

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रांथिक शाह

INTRODUCTION

सच्चित्सुखात्मकं शान्तं जगतामेककारणम् ।
सामव्यान्मामकं ज्योतिरान्तरं सर्वदेहिनाम् ॥

शाङ्करो विजयोऽनेकैः कविभिः समुदीरितः ।
व्यासाचलेरितस्तत्र प्राकाश्यं नीयतेऽधुना ॥

The life history of Śrī Śaṅkarācārya is well known and it will be presumptuous on my part to narrate the same. However it will not be out of place if a brief summary of the chief incidents in the life of the great philosopher is given here.

Śrī Śaṅkara was the incarnation of the Lord Śiva himself. He was born to Śivaguru and Āryāmbā at Kālaḍi in the West Coast. After the Upanayanam in his fifth year, he studied all the Vedas with the accessories and the various systems of philosophy. He became an ascetic very early in life and resorted to Govinda Bhagavatpāda who accepted him as his pupil. He wrote elaborate commentaries on the Brahmasūtras, Upaniṣads, Bhagavadgītā, Viṣṇu Sahasranāma, etc., and also a number of independent works bearing on philosophy and devotion. He easily vanquished all his opponents and was held in great esteem by Kṛṣṇadvaipāyana, Kumārila and others. Though he was destined to live only for 16 years, by the grace of Śrī Veda Vyāsa, he lived up to his 32nd year. He undertook an extensive travel and acquired a good number of pupils like Padmapāda, Sureśvara, Hastāmalaka and Toṭaka. He defeated Maṇḍanamiśra, the famous Mīmāmsaka and got him converted to his fold. He completely annihilated the various followers of the sectarian schools like Śaiva, Bhākta, Bhāgavata, Vaiṣṇava, Viṣṇu, Hiraṇyagarbha, Agnivādin, Saura, Mahāgaṇapati, Gāṇapatya, Ekadeśin, Ucchiṣṭagaṇapati, Śakti, Kāpālika, Cārvāka, Saugata, Jaina, Bauddha, Mallāri, Viṣvaksena, Manmatha, Kubera, Indra, Yama, Varuṇa, Vāyu, Bhūmi, Udaka, Śūnya, Varāha, Loka, Guṇa, Sāṅkhya, Yoga, Pīlu, Karma, Candra, Bhauma, Kṣapaṇaka, Pitṛ, Śeṣa, Garuḍa, Siddha, Gandharva,. Bhūta, Vetāḷa, Pāṣaṇḍa, etc. He undertook pilgrimage to the sacred places like Madhyārjuna, Rāmeśvara, Anantaśayana, Guṇapura, Bhavānīpura, Kuvalayapura, Ujjayinī, Anumalla, Varūdhapurī, Arthapura, Indraprastha, Dharmaprastha, Prayāga, Vārāṇasī, Kedāra, Bhadarī,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Dvārakā, Ayodhyā, Gayā, Magadha, Vṛṣācala, Veṅkaṭācala, Kāñci, Cidambara, Madurā, Gokarṇa, Jagannātha, Kāśmīra, etc. He established on a firm ground the six systems, Saura, Vaiṣṇava, Śaiva, Śākta, Gāṇapatya and Bhairava, after reforming them. He founded five Mahāliṅgas, namely, Bhogaliṅga at Śrīmaṭha in Śṛṅgeri, Varaliṅga at Nīlakaṇṭha Kṣetra in Nepal, Bhaktiliṅga at Kedāra Kṣetra, also in Nepal, Mokṣaliṅga at Cidambaram and Yogaliṅga in the Śrīmaṭha at Kāñcīpura. He also established Mutts and a number of Mahāyantras in various temples like Śrīcakrayantra in the temple of Śrī Kāmākṣī at Kāñcīpuram. He subdued Śāradā by proving his superiority in all the Śāstras, including the Kāmaśāstra, which he learnt after entering into the body of a dead king. Finally he ascended the Sarvajñapīṭha and at the end of his 32nd year, he returned to his permanent abode Kailāsa.

It is no wonder then that ancient and modern poets wrote many a work dealing with the life history of Śrī Śaṅkarācārya. Later authors dealing with this topic narrate certain incidents that have been overlooked by the ancient poets.

Among the works on Śrī Śaṅkara may be mentioned the one by name ŚAṄKARAVIJAYA by Sri Bhagavadānandagiri. It contains seventy-four Prakaraṇas and is a mixed Kāvya (Campū) consisting of both prose, passages and verses. Next may be mentioned the prose work by name ŚAṄKARAVIJAYAVILĀSA written by Śrīcidvilāsa, consisting of thirty-two chapters. The third is a brief resume on the life of the great philosopher, by name ŚAṀKṢEPAŚAṄKARAVIJAYA. Its author is Mādhava and it consists of sixteen Sargas. Again, Sri Govindanātha wrote ŚAṄKARĀCĀRYACARITA, a prose work of nine chapters. ĀCĀRYADIGVIJAYA is a mixed composition of prose and verses by Vādhūla Vallīsahāya on the topic. The sixth is the ŚAṄKARAVIJAYA in verses consisting of twelve Sargas by Vyāsācala. Next is the ŚAṄKARAVIJAYA written in Keraḷa. ŚAṄKARĀBHYUDAYA, a prose in six chapters written by Rājacūḍāmaṇi Dīkṣita, is another work on the same topic. The ninth is the BṚHACCHAṄKARAVIJAYA by Citsukhamuni. Other works on the great Śaṅkara are the ŚAṄKARADIGVIJAYA by Sadānanda, the ŚAṄKARAVIJAYASAṄGRAHA by Puruṣottama Bhāratī, the ŚAṄKARĀBHYUDAYA by Tirumala Dīkṣita, the ŚAṄKARĀCĀRYACARITA by Anantakavi, the ŚAṄKARADIGVIJAYASĀRA by Śrī Vrajarāja and another work with the same title as the previous one by Śrī Govindācala. Various and varied are the works depicting the life history of the great philosopher.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Works like ŚIVARAHASYA, PATAÑJALIVIJAYA, etc., give summaries of the life of Śaṅkarācārya. While describing the life of Śrī Śaṅkara, a certain topic or other is narrated briefly in some works. Yet in another work the same incident is treated elaborately. Some works omit the narration of some incidents in his life while certain others deal with the same incidents in a novel and exaggerated fashion. Thus though many works have been written on the same topic, they differ in their ways of narration. This changing of the same idea to suit the author's purpose and taste is not a novel idea, for, it has been done and accepted by great poets and critics dealing with the stories in the Rāmāyaṇa and Mahābhārata.

In this connection, it has to be pointed out that the overlooking of the ŚAṄKARAVIJAYA, a very ancient work, by Vyāsācala, is to be regretted and it is indeed very surprising that a work of this kind did not come into print earlier. The fact that the work is very ancient is attested by Śrī Mādhavācārya in his introductory chapter of the SAṀKṢEPAŚAṄKARAVIJAYA.

व्यासाचलप्रमुखपूर्विकपण्डितक्ष्मा-
भृत्सम्भृतोच्चतरकाव्यतरोः सुगूढात् ।
विद्वन्मधुव्रतसुखोरुरसानि सर्वा-
ण्यादातुमर्थकुसुमान्यहमक्षमोऽस्मि ॥

Śrī Govindanātha, in his work, ŚAṄKARĀCĀRYACARITA, gives a brief resume of the life of the great philospher in its first chapter and herein he refers to Vyāsācala with great respect.

सर्वागमास्पदं वन्दे व्यासाचलमिमं कविम् ।
बभूव शङ्कराचार्यकीर्तिकल्लोलिनी यतः ॥

The Keraḷīya ŚAṄKARAVIJAYA also gives the following verse which praises the poet Vyāsācala in high terms :—

अत्युन्नतस्य काव्यद्रोर्व्यासाचलमहीरुहः ।
अर्थप्रसूनान्यादातुमसमर्थोऽहमद्भुतम् ॥

The above verses not only attest the fact that the work of Vyāsācala is very ancient but also show that it was held in high esteem by his followers. The greatness of the work is expressly stated by Mādhavācārya in the first Sarga itself.

नेता यत्रोल्लसति भगवत्पादसंज्ञो महेशः
शान्तिर्यत्र प्रकचति रसः शेषवानुज्ज्वलाद्यैः ।
यत्राविद्याक्षतिरपि फलं तस्य काव्यस्य कर्ता
धन्यो व्यासाचलकविवरस्तत्कृतिज्ञाश्च धन्याः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Madhavācārya has taken many Ślokas verbatim from the ŚAṄKARAVIJAYA of Vyāsācala and this indicates the superiority and greatness of the latter. So it is a matter of great delight to us that a work of that type is brought to light.

The ŚAṄKARAVIJAYA of Vyāsācala is fit to be called a Mahākāvya as it satisfies the definition of a Mahākāvya as given by great literary critics like Daṇḍin. 'सर्गबन्धो महाकाव्यमुच्यते'. It consists of twelve Sargas. Its invocatory stanza 'कालट्याख्ये ग्रामवर्ये', etc., comes under the third type of Maṅgaḷa which straightaway begins the work. The theme of the work also fits in well to be called a Mahākāvya in that it describes the life history of a great person. The work statisfies the rule as laid in 'चतुर्वर्गफलोपेतम्', etc., for it is clear that the work shows us the path to reach divinity and the hero is no other than the great Bhagavān Śaṅkara.

The verses 'नगरार्णवशैलर्तु', etc., in the definition of a Mahākāvya show that a Mahākāvya should contain vivid descriptions of city, ocean, mountains and other natural beauties. The contents of the Śaṅkaravijaya of Vyāsācala will clealy revearl to the learned the literary excellence of the work and its accordance to the definition of a Mahākāvya. Though there are to be found some flaws here and there, they need not be taken as literary faults, for Daṇḍin says—

न्यूनमप्यत्र यैःकैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ॥

Figures of speech pertaining to sound and sense are to be found in plenty in this work and hence it is surely commendable to scholars of taste. The last verse of each Sarga briefly indicates the substance of that particular Sarga.

There are not enough details about the author Vyāsācala either in this work or in other works and so it would be a vain attempt to deal with his life history. But the information given by Sri Ātreyakṛṣṇa Śāstrī in Tamil in the work ŚAṄKARAGURUPARAMPARĀ is given below. Vyāsācala is the fifty-second Guru in the line of sixty-five Gurus beginning from Sarvajñātmendra Sarasvatī and ending with Mahādevendra Sarasvatī and he occupied the revered seat of the Kāmakoṭipīṭha of Kāñcī from 1498—1507 A.D. Further his name is to be found in a copper plate of 1507 A.D. during the reign of the Vijayanagara king Narasiṃhadevarāya. He was born in Kāñcī and his original name

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

was Kuppaṇṇa. When he became the chief of the Kāmakoṭipīṭha, his name was changed to Mahādevendra Sarasvatī. He performed severe penance in a cave in a mountain called Vyāsācala and attained divinity on the first day of Kṛṣṇapakṣa of the month of Āṣāḍha. For this reason he is also called as Vyāsācala Mahendra Sarasvatī and for the same reason, his ŚAṄKARAVIJAYA is called VYĀSĀCALĪYA or the work of Vyāsācala.

In preparing this edition of the ŚAṄKARAVIJAYA the following six manuscripts were made use of :

(1) R. No. 6833 : Transcribed manuscript. Complete. Deposited in the Government Oriental Manuscripts Library, Madras.

(2) R. No. 7715 : Transcribed manuscript. Deposited in the Government Oriental Manuscripts Library, Madras.

(3) A palm-leaf manuscript belonging to the Maharāja Serfoji's Sarasvatī Mahāl Library, Tanjore, bearing the No. 4209.

(4) A manuscript from the Adyar Library, Madras, bearing the No. 40-A-89. (This is marked as अ.)

(5) A palm-leaf manuscript belonging to the Kañci Kāmakoṭipiṭha Maṭha in Kumbakonam. This manuscript is of two parts (Nos. 298 and 1897) and incomplete. The first contains only up to the sixty-ninth verse in the ninth chapter. The second begins with the seventieth verse of the ninth chapter and omits the first twenty verses in the twelfth Sarga. (This is marked as क.)

(6) A paper manuscript from the same Maṭha. This has no number and omits the last three verses. (This is marked as का.)

My heartfelt thanks are due to the Heads of the various Libraries who lent me their manuscripts and to Śrīmāns V. R. Kalyanasundara Sastrigal, N. S. Ramanujam, M. S. Vaidyanatha Sastrigal and T. H. Visvanatha Sastrigal for their untiring efforts in bringing forth this edition by helping me in preparing the press copy, contents and the index.

T. CHANDRASEKHARAN,
Curator.

GOVERNMENT ORIENTAL MANUSCRIPTS
LIBRARY, MADRAS-5.

Dated, 3rd November 1953.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

After the completion of the printing and binding of this work, a copy of an old printed book containing a few Stotras of Sadāśivabrahmendra was placed in my hands by Polagam Śri Rama Sastrigal, Professor of Vedanta, Madras Sanskrit College, Mylapore. The second work in this book is called Jagadgururatnamālā with a commentary of Ātmabodhendra Sarasvatī. While commenting on the 33rd verse, the learned commentator has given an extract from the last Sarga of the present work. It consists of five verses, out of which only one is printed in this volume. The other four verses are not found in any of the manuscripts used for preparing the press-copy of the present edition. As it will be of great interest to the scholars, I have given an extract from the old book, which is printed at the end of the Sanskrit Introduction given below.

एतद्ग्रन्थमुद्रणसमापनानन्तरं सुन्दरशास्त्रिकुमारपोलकग्रामजातश्रीरामशास्त्रिणां स्वभूते अस्मद्धस्तमुपगते बोधार्यादिसपर्यापर्यायस्तवपर्यन्तानेकग्रन्थकरम्बिते मुद्रितपुस्तके द्वैतीयीकतया समुपलब्धस्य सदाशिवब्रह्मेन्द्रकृतजगद्गुरुरत्नमालास्तवस्य त्रयस्त्रिंशश्लोकव्याख्याने आत्मबोधेन्द्रसरस्वतीकृते समुपलब्धो विषयः तथैवात्र प्रेक्षकाणां कृते समुपस्थाप्यते यतोऽयं मुद्रितेऽस्मिन् शङ्करविजये तन्मूलमातृकास्वनुपलब्धत्वेन आद्यश्लोकवर्जं विसृष्टो नोपलभ्यते ।

यथा—

" व्यासाचलीयेऽपि द्वादशसर्गे—

एवं निरुत्तरपदां स विधाय देवीं
सर्वज्ञपीठमधिरुह्य मठे स्वकृप्ते ।
मात्रा गिरामपि तथोपगतैश्च मिश्रैः
सम्भावितः कमपि कालमुवास काञ्च्याम् ॥

प्रागष्टमाद्विदितवेद्यमुदूढबाल्यं
सर्वज्ञसंज्ञमथ हंसितमात्मनैव ।
श्रीकामकोटिबिरुदे न्यदधात्स्वपीठे
गुप्तं स्वशिष्यतिलकेन सुरेश्वरेण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं स शङ्करगुरुः कृतकृत्यभावात्
भावान्प्रकाश्य निगमान्तगिरां निगूढान् ।
काञ्च्यां विमुच्य वपुराहृतमिच्छयैव
स्वस्यैव धाम्नि परमे स्वत एव लिल्ये ॥

गामाक्रम्य पदेऽधिकाञ्चि निबिडं स्कन्धैश्चतुर्भिस्तथा
व्यावृण्वन् भुवनान्तरं परिहरंस्तापं समोहज्वरम् ।
यश्शाखी द्विजसंस्तुतः फलति तत्स्वाद्यं रसाख्यं फलं
तस्मै शङ्करपादपाय महते तन्मस्त्रिसन्ध्यं नमः ॥

पीठे तिष्ठति कामकोटिबिरुदे यः शारदाख्ये मठे
देहीवादिमशङ्करार्यनियमव्रातो व्रतिष्ठोऽधुना ।
नेपालादिनृपालमौलिविधृतश्रीशासनो नः शिवं
देयादेष जगद्गुरुस्स विपुलानन्दाकृतिश्शङ्करः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रास्ताविकम्

सच्चित्सुखात्मकं शान्तं जगतामेककारणम् ।
मामव्यान्मामकं ज्योतिरान्तरं सर्वदेहिनाम् ॥

शाङ्करो विजयोऽनेकैः कविभिः समुदीरितः ।
व्यासाचलेरितस्तत्र प्राकाश्यं नीयतेऽधुना ॥

अतिविस्मयावहमेवैतद्विदितवेदितव्यानां [illegible]

अत्रेदमस्माकमत्याश्चर्यनिदानं प्रतिभाति यदयं ग्रन्थकृत् व्यासाचलः शङ्कर-गुरुपरम्परानाम्नि निबन्धे श्रीयुत-आत्रेयकृष्णशास्त्रिचरणैः प्रतिपादितया दिशा श्रीकाञ्चीकामकोटिपीठमध्यासीनोऽपि तत्सम्बन्धिनं कमपि वा विषयं कुत्रापि लेशतोऽपि स्वारचितेऽत्र प्रबन्धे न समुपास्थापयदिति ।

If what Ātreya Krishna Sastri says is correct, it is rather strange that Vyāsācala who was a head of the Kāñci Kāmakoṭi Mutt, has not even mentioned by name that mutt, the life of the founder of which is described in this work.

[illegible]
टकादिसच्छिष्यसङ्घातः, स्वधिषणावैभववशीकृतमण्डनादिपण्डितप्रकाण्डः, निराकृत-शैव-भक्त-भागवत-वैष्णव-पाञ्चरात्र-वैखानस - विष्णु-हिरण्यगर्भ-अग्निवादि-सौर-महागणपति-गाणपत्येकदेशि-उच्छिष्टगणपति - गणपतिमतत्रय-शक्ति-कापालिक-चार्वाक-सौगत-जैन-बौद्ध-मल्लारि-विष्वक्सेन-मन्मथ-कुबेर-इन्द्र-यम - वरुण-वायु-भूमि - उदक -शून्य-वराह-लोक-गुण-सांख्य-योग-पीलु - कर्म- चन्द्र - भौमादिग्रह-पञ्चक - क्षपणक-पितृशेष-गरुड-सिद्ध-गन्धर्व-भूत-वेतालादिपाषण्डादिदुर्मतसञ्चयः, समटित-मध्यार्जुन-रामेश्वर-अनन्तशयन-गुणपुर - भवानीपुर-कुवलयपुर-उज्जयीनी-अनुमल्ल-वरूधपुरी-अर्थपुर-इन्द्रप्रस्थ - धर्मप्रस्थ - प्रयाग-वाराणसी - केदार-बदरी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रास्ताविकम्

सच्चित्सुखात्मकं शान्तं जगतामेककारणम् ।
मामव्यान्मामकं ज्योतिरान्तरं सर्वदेहिनाम् ॥

शाङ्करो विजयोऽनेकैः कविभिः समुदीरितः ।
व्यासाचलेरितस्तत्र प्राकाश्यं नीयतेऽधुना ॥

अतिविस्मयावहमेवैतद्विदितवेदितव्यानां भारतीयानां यत् अविदितमिवापूर्वं शाङ्करं चरितमद्यावेद्यत इति । तथापि तदनूद्यतेऽनुस्मर्यते वा किञ्चिदिदानीं प्रस्तुतोपयोगाय ।

लोकानुजिघृक्षाकलितलीलामानुषतनुर्हि भगवान् कैलासाधिवासः श्रीशंकर एव साक्षादादिशङ्करभगवत्पाद इत्यनुमोदित एवायमर्थोऽस्मत्प्रतिबन्दिभिरपीति नात्र किंन्चिद्विवादास्पदम् । स हि शिवगुर्वार्याम्बातनयतया अवतीर्य कालटिक्षेत्रे भारत-पुण्यभूमौ स्वबालभावारचितातिविचित्रबहुचरित्रः पञ्चहायन एव कृतोपनयनोऽष्टहायन एवाधीतवेदवेदाङ्गादिसकलशास्त्रः संमोचितगन्धर्वनक्रभावः सङ्गृहीतपरमहंसाश्रमः, शरणीकृतगोविन्दभगवत्पादाचार्यः संप्रणीतब्रह्मसूत्रोपनिषद्गीतासहस्रनामादिभाष्यः, समारचिततदनुग्राहकानेकग्रन्थरत्नः, संस्तुतसकलदेवः, दुर्वादिध्वान्ततपनः, संस्मृत-स्वावतारकरणीयः, कृष्णद्वैपायनकुमारिलादिसंनुतस्वमहिमानुभावः श्रीव्यासार्यवर-लब्धषोडशाधिकहायनः, समारब्धविजययात्रः, संगृहीतपद्मपादसुरेश्वरहस्तामलकतो-टकादिसच्छिष्यसङ्घातः, स्वधिषणावैभववशीकृतमण्डनादिपण्डितप्रकाण्डः, निराकृत-शैव-भक्त-भागवत-वैष्णव-पाञ्चरात्र-वैखानस - विष्णु-हिरण्यगर्भ-अग्निवादि-सौर-महागणपति-गाणपत्यैकदेशि-उच्छिष्टगणपति - गणपतिमतत्रय-शक्ति-कापालिक-चार्वाक-सौगत-जैन-बौद्ध-मल्लारि-विष्वक्सेन-मन्मथ-कुबेर-इन्द्र-यम - वरुण-वायु-भूमि - उदक -शून्य-वराह-लोक-गुण-सांख्य-योग-पीलु - कर्म- चन्द्र - भौमादिग्रह-पञ्चक - क्षपणक-पितृशेष-गरुड-सिद्ध-गन्धर्व-भूत-वेतालादिपाषण्डादिदुर्मतसञ्चयः, समटित-मध्यार्जुन-रामेश्वर-अनन्तशयन-गुणपुर - भवानीपुर-कुवलयपुर-उज्जयीनी-अनुमल्ल-वरूधपुरी-अर्थपुर-इन्द्रप्रस्थ - धर्मप्रस्थ - प्रयाग-वाराणसी - केदार-बदरी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वारका-अयोध्या-गया-मगध-वृषाचल-वेङ्कटाचल-काञ्चीनगर - चिदम्बर - मधुरा-गोकर्ण-जगन्नाथ-काश्मीरादिपुण्यक्षेत्रः, संस्थापित-सौर-वैष्णव-शैव-शाक्त-गाणपत्य-भैरवात्मक-षण्मतः श्रृङ्ग-गिरीयश्रीमठः-नेपालीयश्रीनीलकण्ठकेदारक्षेत्र-श्रीचिदम्बर-काञ्चीक्षेत्रीय - श्रीमठादिपुण्यस्थलसम्प्रतिष्ठापितभोग - वर - मुक्ति-मोक्ष-योगात्मकपञ्चमहालिङ्गः नानापुण्यक्षेत्रसंप्रतिष्ठापितानेकमहायन्त्रसंपीठः श्रीकाञ्चीकामक्षी सन्निधिसन्निधापितश्रीचक्रः समादर्शितपरकायप्रवेशनादिस्वयोगमहिमानुभावः संविजितशारदः संविधाय सर्वज्ञपीठाधिरोहणमन्ते द्वात्रिंशद्धायनपरिमिते स्वायुष्काले स्वावासं कैलासमनुप्राविशदित्येतदतिविचित्रं भगवतः शङ्करस्य चरित्रमपि प्रसिद्धमेवात्र भारते देशेऽन्यत्र विदेशेषु च ॥

तदिदमतिविचित्रं पुण्यमखिलपुरुषार्थदं सर्वजनानुस्मरणीयं चरित्रमधिकृत्य प्राच्यैराधुनिकैश्च कविवरैरनेकैरनेके प्रबन्धाः समारचिताः प्रकाशिताः केचन पूर्वतनैरप्रकाशिताः केचिदधुनातनैर्दरीदृश्यन्ते ।

तत्र भगवदानन्दगिरिप्रणीतश्चतुरधिकसप्ततिप्रकरणात्मा शङ्करविजयनामा गद्यपद्योभयात्मा प्रबन्ध एकः ।

श्रीचिद्विलासयतिवरप्रणीतो द्वात्रिंशत्सर्गात्मा शङ्करविजयविलासनामा पद्यप्रबन्धो द्वितीयः ।

माधवमुनिप्रणीतष्षोडशसर्गात्मा सङ्क्षेपशङ्करविजयनामा पद्यप्रबन्धस्तृतीयः ।

श्रीगोविन्दनाथप्रणीतोऽध्यायनवकात्मा शङ्कराचार्यचरितनामा पद्यप्रबन्धस्तुरीयः ।

वाधूलवल्लींसहायकविवरप्रणीतः सप्ताधिककोलाहलात्मा आचार्यदिग्विजयनामा गद्यपद्योभयात्मा प्रबन्धः पञ्चमः ।

श्रीव्यासाचलप्रणीतो द्वादशसर्गात्मा शङ्करविजयनामा पद्यप्रबन्धः प्रकृतः षष्ठः

केरलीयशङ्करविजयनामा प्रबन्धः सप्तमः ।

राजचूडामणिदीक्षितप्रणीतः सर्गषट्कात्मा शङ्कराभ्युदयनामा पद्यप्रबन्धोऽष्टमः ।

चित्सुखमुनिप्रणीतो बृहच्छङ्करविजयनामा प्रबन्धो नवमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्करानन्दप्रणीतः शङ्करविजयनामा प्रबन्धो दशमः ।

सदानन्दप्रणीतः शङ्करदिग्विजयनामा प्रबन्ध एकादशः ।

पुरुषोत्तमभारतीप्रणीतः शङ्करविजयसङ्ग्रहनामा प्रबन्धो द्वादशः ।

तिरुमलदीक्षितप्रणीतः शङ्कराभ्युदयनामा प्रबन्धस्त्रयोदशः ।

अनन्तकविप्रणीतः शङ्कराचार्यचरितनामा प्रबन्धश्चतुर्दशः ।

श्रीब्रजराजप्रणीत शङ्करदिग्विजयसारनामा प्रबन्धः पञ्चदशः ।

श्रीगोविन्दाचलप्रणीतः शङ्करदिग्विजयसारनामा प्रबन्धः षोडशः । एवमन्येऽपि बहवः प्रबन्धाः स्तुत्यादिरूपा अपि चरितमेतदधिकृत्य सम्प्रणीताः समुपलभ्यन्ते ।

शिवरहस्यपतञ्जलिविजयादिप्रबन्धेष्वपि केषुचिच्चरितमिदं सङ्गृहीतं समालक्ष्यते । कथावस्तु च तत्र तत्र एकत्र सङ्गृहीतमन्यत्र विस्तार्यतेऽन्यत्र विस्तृतमपरत्र सङ्गृह्यते । एकत्रानुक्तं परत्र नूत्नतयोच्यतेऽन्यत्रोक्तं परत्र तथैवानूद्यते । परत्रान्यथोक्तमपरत्रान्यथाप्युच्यत इत्येवंनयेनावेदितम् । न चेयं नूत्ना सरणिर्यतो रामायणभारतादिकथावस्तुष्वप्येषैव सरणिः कविवरैराहृता अनुमोदिता च सा प्रामाणिकैः सहृदयवरैः ।

तदेतादृक्षु प्रबन्धेष्वन्यतमोऽतिप्राचीनोऽपि नाद्यावधि प्रकटतामुपनीतोऽसौ श्रीव्यासाचलमुनिप्रणीतः शङ्करविजयनामा पद्यप्रबन्ध इति महदेवेदमाश्चर्यनिदानम् ।

अतिप्राचीनता चास्य प्रबन्धमिममधिकृत्यारचितैर्माधवीयशङ्करविजयादिषु परिदृश्यमानैः पद्यविशेषैरवगम्यते । तद्यथा—

संक्षेपशङ्करविजयनाम्नि श्रीमाधवाचार्यप्रणीते प्रबन्धे प्रथमे उपोद्घातात्मनि सर्गे प्रथमतः पद्यमिदं दरीदृश्यते—

"व्यासाचलप्रमुखपूर्विकपण्डितक्ष्मा
भृत्संभृतोच्चतरकाव्यतरोः [1]सुगूढात् ।
विद्वन्मधुव्रतसुखोरुरसानि सर्वा-
ण्यादातुमर्थकुसुमान्यहमक्षमोऽस्मि" ॥ इति ॥

---

[1] सुरीतेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्कराचार्यचरितनाम्नि श्रीगोविन्दनाथप्रणीते प्रबन्धे प्रथमे कथासंक्षेपात्मन्यध्याये पद्यमिदं संदृश्यते—

"सर्वागमास्पदं वन्दे व्यासाचलमिमं कविम् ।
बभूव शङ्कराचार्यकीर्तिकल्लोलिनी यतः" ॥ इति ॥

केरलीयशङ्करविजयनाम्नि प्रबन्धे पद्यमिदं संलक्ष्यते—

"अत्युन्नतस्य काव्यद्रोर्व्यासाचलमहीरुहः ।
अर्थप्रसूनान्यादातुमसमर्थोऽहमद्भुतम्" ॥ इति ॥

तदेभिः पद्यैः न केवलं प्रबन्धस्यास्यातिप्राचीनत्वं परमाविष्कृतं यावता निरुपममहिमत्वमप्यस्यावेद्यत एव । सुस्फुटञ्चायमर्थो माधवाचार्यैः कण्ठरवेणाप्युक्तोऽन्यत्र प्रथम एव सर्गे—

"नेता यत्रोल्लसति भगवत्पादसंज्ञो महेशः
शान्तिर्यत्र प्रकचति रसः शेषवानुज्ज्वलाद्यैः ।
यत्राविद्याक्षतिरपि फलं तस्य काव्यस्य कर्ता
धन्यो व्यासाचलकविवरस्तत्कृतिज्ञाश्च धन्याः" ॥ इति ॥

अत एव च श्रीमाधवाचार्यैरेव ग्रन्थादमुष्मात् संघशः सर्गशश्च तत्र तत्रानूदिताः स्वग्रन्थे बहवः श्लोकाः ।

तत्तादृशोऽयं प्रबन्ध इदानीमपि वा प्राकाश्यं नीयत इति महदिदं प्रमोदनिदानमस्माकं भारतीयानाम् ।

'सर्गबन्धो महाकाव्यमुच्यत' इत्युक्तनयेन द्वादशसर्गबन्धात्मासौ प्रबन्धः काव्यविभागेषु महाकाव्यतापदमधितिष्ठति ।

'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्युक्तनयेषु वस्तुनिर्देशात्मकमत्र मङ्गलमाचरितं दृश्यते—यथा—

"कालट्याख्ये ग्रामवर्ये द्विजाग्र्यः
सत्सन्तोषी केरलेष्वातिथेयः ।
जज्ञे कर्ता कर्मणां चोदितानां
त्यक्ता नित्यं निन्दितानां विनीतः" ॥ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"इतिहासकथोद्भूतमितरद्वा सदाश्रयम्' इत्युक्तोभयात्मकमप्यस्य कथा-वस्तु भवतीत्यन्यतोऽस्य वैशेष्यमप्यङ्गीकार्यं यत एतत्कथावस्तु शिवरहस्येक्त भगवत्पादाश्रयमपि ।

'चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्' इत्युक्तलक्षणकाव्यलक्षणसम्पत्तिस्त्व-त्रानुक्तिसिद्धैवेति न सा विस्तार्यते ।

"नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्" ।

इत्युक्तशेषलक्षणान्यशेषाण्यपि महाकाव्येऽत्र सुसङ्गतानीत्यापादचूडं काव्य-मिदं विमृशतां सहृदयानां तत्रालसानामप्यत्रैव संयोजितां विस्तृतविषयानु-क्रमणीं प्रपश्यतां करतलामलकमिति नात्र तद्विव्रियमाणतापदमुपयातम् । अथापि यदि द्वित्राण्यत्रासङ्गतानीति केचिद्विवदेरन्नासौ दोषाय । यतो दण्ड्याचार्यैरेवोक्तमेवम्—

"न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः" ॥ इति ॥

एवं शब्दार्थगुणालङ्कारादिसम्पत्तिरप्यत्र पुष्कलैव सहृदयहृदयाभिरञ्जनीति नाधिकमितोऽस्ति वक्तव्यमवाशिष्टमित्यत्रैतावतैवोपरम्यते ।

प्रतिसर्गप्रमेयोऽत्र मुख्यो विषयः कविनैव सुसङ्गृहीतः ।

यथा—

यत्राभाणि गुरोः सुवेदपठनं वेदार्थवित्त्या समं
संवादो गुरुशिष्ययोरभिहितो गार्हस्थ्यकर्माण्यथ ।
दम्पत्योः सुतदृष्ट्युपायकरणे संवाद उक्तस्ततः
काव्ये शङ्करदेशिकेन्द्रविजये सर्गोऽयमाद्योऽगमत् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं शङ्करविजये काव्येऽस्मिन्व्यासशैलमुनिरचिते ।
सर्गो द्वितीय आसीत् प्राप्तस्समात्तविविधार्थे ॥ २ ॥

व्यासाचलेन रचिते मधुरे सुपद्ये
काव्ये ययौ द्रुतविलम्बितवांस्तृतीयः ।
सर्गो निसर्गविमलः परमोपमन्यु-
माहात्म्यभाषणपरः कथयाभिमोदी ॥ ३ ॥

श्रीशङ्करोत्पत्तिकथाभिधायी
तस्यैव जिष्णोर्विजयाभिधाने ।
सर्गश्चतुर्थोऽगमदत्र काव्ये
व्यासाचलेनारचिते रसार्द्रे ॥ ४ ॥

यत्राद्धा महिमा प्रयागविषयो भट्टेडिताचार्ययोः
संवादोऽप्यघनोदनो निगदितो व्यावर्णितं सौगतम् ।
शास्त्रस्य श्रवणं विजेतुमिह तान् व्यासाद्रिसंप्रोदिते
श्रीमच्छङ्करदेशिकेन्द्रविजये सर्गोऽगमत्पञ्चमः ॥ ५ ॥

भूभृद्देहनिवेशनं गृहपतेर्गेहस्थभिक्षा क्रिया
वागीशाजनिपाणिपीडनमथो वादश्च तत्साक्षिकः ।
यत्राभाणि च शाङ्करेऽत्र विजये व्यासाचलप्रोदिते
षष्ठः सर्ग उपारमद्बहुकथासम्बन्धहृद्योऽनघः ॥ ६ ॥

प्रत्यादेशि च यत्र देहकरणप्राणात्मनामात्मता
लक्ष्यार्थैक्यमुदीरितं शिवगुरुः प्राशंसि शिष्येड्ययोः ।
संवादो विजयेऽत्र शाङ्करपदे सर्गो गतः सप्तमो
यत्राख्यायि च काञ्चिका समहिमा श्रीकालहस्तीश्वरः ॥ ७ ॥

यत्राद्धापि च पुण्डरीकनगरं कावेरिकामाधवौ
पश्चान्मातुलमन्दिरस्य गमनं संभाषणं ज्ञातिभिः ।
पुस्तस्थापनरामनाथचरिते सम्प्रोदिते यत्नतः
श्रीमच्छङ्करदेशिकेन्द्रविजये सर्गोऽष्टमः प्रस्थितः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्रागस्त्यसुराङ्गनाविवदनं चापस्य कोट्याह्वयं
तीर्थं वर्णितमुग्रभैरवजयः श्रीतोटकस्येडनम् ।
श्रीमच्छङ्करदेशिकेन्द्रविजये व्यासाद्रिणा निर्मिते
सर्गोऽयं नवमो गतोऽत्र महिमा सानन्दनो नन्दनः ॥ ९ ॥

तीव्रव्याधिनिरोधनाय भिषजां दृष्ट्यै विदेशभ्रमः
शिष्याणामुदयो रवेर्जलनिधिः सह्याद्रिणा वर्णितः ।
वासन्तः शुचिना समं वनजलक्रीडादि यस्मिन् स वै
सर्गोऽयं दशमोऽत्र शङ्करजये व्यासाचलीये गतः॥ १०

प्रावृड् यत्र समं शरद्वनितया संवर्णिता विस्तृतं
हेमन्तः शिशिरेण देशिकवरप्राप्तिर्सहीवर्तिनाम् ।
नानाव्याधिकृतां निवृत्तिरमुना हूतिश्च नासत्ययो-
र्यातः शङ्करदेशिकेन्द्रविजये सर्गोऽयमेकादशः ॥ ११ ॥

यत्रोच्यते वादिगुणानुयोग-
व्याजेन सिद्धान्तमहारहस्यम् ।
स द्वादशोऽगाद्विजयेऽत्र सर्गः
श्रीशाङ्करे व्यासगिरिप्रणीते ॥ १२ ॥

एतद्ग्रन्थकर्तुर्व्यासाचलस्य चरितादिकमधिकृत्य विस्तरेणात्र वा ग्रन्थान्तरेषु वा स्फुटं नोपलभ्यत इति न तद्विचारे वियद्वितानकल्पनकल्पे प्रयत्यते ।

तथापि यत्किञ्चिदिदमितिवृत्तं यत्पुरा श्रीयुतआत्रेयकृष्णशास्त्रिचरणैः शङ्करगुरुपरम्परानाम्नि निबन्धे द्राविडभाषया प्रकाशितं तदत्र भाषान्तरानुवादेन समुपस्थाप्यते ।

ग्रन्थकृदसावतीतेषु सर्वज्ञात्मेन्द्रसरस्वत्युपक्रमेषु पञ्चममहादेवेन्द्रसरस्वतीपर्यन्तेषु पञ्चाधिकषष्टिसंख्याकेषु जगद्गुरुषु द्विपञ्चाशत्तम इति अष्टनवत्युत्तरचतुश्शताधिकसहस्रपरिमितात् क्रैस्तवाब्दादारभ्य सप्तोत्तरपञ्चशताधिकसहस्रपरिमितक्रैस्तवाब्दपर्यन्तं (1498—1507 A.D.) श्रीकाञ्चीकामकोटिपीठमध्यतिष्ठदिति सप्तोत्तरपञ्चशताधिकसहस्रपरिमिते च क्रैस्तवेऽब्दे (1429 शालिवाहनशक) विजयनगरराज्ञा नरसिंहदेवरायेणास्मै किञ्चित्ताम्रशासनं प्रत्तमिति च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विज्ञायते। काञ्चीपुरं चास्य जन्मभूमिः। पूर्वाश्रमेऽस्य कुप्पण्ण इति नाम। चरमे त्वाश्रमेऽस्याकृतकं नाम महादेवेन्द्रसरस्वतीति। व्यासाचल-नाम्नि पर्वतेऽसौ गुहां काञ्चिदुपाश्रित्य तपश्चरन्नन्तेऽक्षयनाम्नि हायने आषाढकृष्णप्रथमायां समाहितस्सिद्धिमुपगत इति पर्वतनामाप्यस्य नाम्ना संयोज्य व्यासाचलमहेन्द्रसरस्वतीति पर्वतनाम्नैव व्यासाचलेन्द्र इति व्यास-शैलमुनिरिति व्यासद्रिरिति व्यासागिरिरिति चासौ विख्यातः। अत एवैत-दारचितं शङ्करविजयनामेदं काव्यपि व्यासाचलीयमिति प्रथामुपगतमिति।

एतद्ग्रन्थमुद्रापणे आदर्शतयोपयुक्ताः षट् कोशाः।

तत्र कोशद्वयं मद्रपुरराजकीयप्राच्यहस्तलिखितपुस्तकभाण्डागारस्थं सम्पूर्णं पत्नात्मकम्। (R. 6833 and R. 7715)

तञ्जानगरविराजमानशरभजीसरस्वतीमहाल्कोशस्थानस्थस्तालपत्रात्मा तृतीयः (4209)।

मद्रनगरविराजमानाडयार्कोशस्थानस्थः पत्नात्मा तुरीयः। (40-A-89)

पाठान्तरनिदर्शनेऽयमेव 'अ' इति निर्दिष्टः॥

कुम्भघोणविराजमानश्रीकाञ्चीकामकोठिमठालयीयकोशस्थानस्थस्तालपत्नात्मा भागद्वयात्मकः पञ्चमोऽसमग्रः। (298 and 1897) तत्र प्रथमे भागे आदित आरभ्य नवमसर्गीयनवषष्टितमश्लोकान्तो ग्रन्थभागो वर्तते। ततो द्वितीये सप्ततितमश्लोकादारभ्यैकादशसर्गान्तस्ततो द्वादशे एकविंशतितमश्लोका-दारभ्य सप्तषष्टितमश्लोकान्तश्च भागो वर्तते॥ पाठान्तरनिदर्शनेऽयमेव 'क' इति निर्दिष्टः॥

तत्रस्थ एव पत्रात्मा षष्ठोऽन्तिमश्लोकत्रयहीनोऽदत्तकोशस्थानसंख्यः॥

पाठान्तरनिदर्शनेऽयमेव 'का' इति निर्दिष्टः॥

अन्ते चैतद्ग्रन्थमुद्रापणाय मुद्रणयोग्यमातृकानिर्माणनानाग्रन्थपरिशीलन-पाठशोधनविषयानुक्रमणीश्लोकानुक्रमणीनिर्माणादिकर्मकरणेन साहाय्यमाचरित-वतामेतत्कोशस्थानस्थपण्डितपदमधितिष्ठतां श्रीयुतानां व० रा० कल्याणसुन्दर, ना० श० रामानुज, वैद्यनाथ, विश्वनाथमहाशयानां तत्तत्कोशदानेनोपकृवतां तत्तत्कोशनिर्वाहकाणाञ्च आवेद्यते कृतज्ञतेति शम्।

मद्रपुरी, इत्थम्

३–११–१९५३. ति. चन्द्रशेखरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयानुक्रमणिका

प्रथमस्सर्गः

पृष्ठाङ्कः

१. शिवगुरोर्गुरुकुलावासकथनम् 1

२. शिवगुरुतद्गुर्वोस्संवादवर्णनम् 2

३. विद्याधिराजेन पित्रा स्वतनयस्य शिवगुरोः स्वावासानयनम्, तन्मतिपरीक्षणञ्च 3

४. शिवगुरोरुद्वाहकथानुवर्णनम् 5

५. शिवगुरोर्गार्हस्थ्यवर्णनम् 6

६. शिवगुरोरपुत्रस्य विषादकथनम् 6

७. शिवगुरुपत्न्या शिवगुरुं प्रति पुत्रप्राप्त्यभ्युपायकथनम् ... 7

द्वितीयः सर्गः

१. उपमन्योर्बालकस्य दारिद्र्यदशावर्णनम् 8

२. तस्य तदपोहनाय तपश्चरणोद्योगकथनम् 9

३. उपमन्युतन्मात्रोस्संवादवर्णनम् 10

तृतीयः सर्गः

१. उपमन्युमातृकृतोपदेशवचनम् 12

२. तपश्चरणायोपमन्योर्वनं प्रति प्रस्थानवर्णनम् 12

३. उपमन्योस्तपश्चरणप्रकारवर्णनम् 14

४. उपयन्युतपश्चरणाद्भीतस्य हरिहयस्य तद्विघ्नकरणायाप्सरः-प्रेषणसमुद्योगवर्णनम् 18

५. अप्सरोभिस्तत्प्रतिषेधकथनम् 18

६. अप्सरःप्रतिषिद्धस्य हरिहयस्य सपरिवारस्य ब्रह्मलोकगमन-कथनं ब्रह्मणे स्वभीतिकथनञ्च 19

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

७. ततस्तस्य सचतुर्मुखस्य क्षीरधिगमनवर्णनं तत्र हरये स्वगुरुमुखेन स्वभीतिकथनञ्च 20

८. ततो हरिविरिञ्चिपुरोगमस्य माधवस्य कैलासगमनकथनं तत्र हरदर्शनादिकथनञ्च 23

९. मुनिगणकृतहरिहरस्तुतिप्रकारकथनम् 24

१०. ततस्सुरगुरुणा महादेवं प्रति देवागमनिमित्तकथनम्, महादेवकृतदेवाश्वासनकथनञ्च 25

११. सपरिवारहरिहयवेषधरस्य पशुपतेरुपमन्युनिकटगमनवर्णनम् उपमन्युतपःप्रतिषेधोद्यमकथनञ्च 26

१२. उपमन्युक्रोधवर्णनम् 29

१३. तपश्चरणनिष्ठितायोपमन्यवे शिवकृतस्वस्वरूपनिदर्शनसमाश्वासनादिकथनम् 30

१४. उपमन्योः सिद्धस्य स्वमातृसमीपगमनम् 32

चतुर्थः सर्गः

१. सभार्यस्य शिवगुरोस्तपश्चर्यावर्णनम् 33

२. स्वप्ने द्विजवेषधरमहादेवदर्शनवरप्रदानादिकथनम् 33

३. ततः शिवगुरुपत्न्या दौहृदवर्णनम् 35

४. श्रीशङ्करगुरोरुत्पत्तितत्कालविशेषादिकथनम् 36

५. श्रीशङ्करगुरोर्नामकरणम् 38

६. श्रीशङ्करगुरोर्बालभाववर्णनम् 38

७. शिवगुरोः पञ्चत्वादिकथनम् 38

८. श्रीशङ्करगुरोस्तन्मातृकृतोपनीत्यादिकथनम् 39

९. श्रीशङ्करगुरोः सन्याससङ्ग्रहणकथाकथनम् 40

१०. मातृसमाश्वासनम् 41

११. श्रीयदुद्वहप्रतिष्ठापनम् 43

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

१२ श्रीगोविन्दभगवत्पाददर्शनकथनम्, ततो विद्याग्रहणकथनञ्च 43

१३. बदरीगमनम् 44

१४. श्रीव्यासशङ्करसंवादवर्णनम् 45

१५. श्रीव्यासाचार्यकृतवरदानकथनम् 47

१६. सनन्दनस्य शिष्यत्वेन सङ्ग्रहणम् 48

१७. श्रीशङ्करगुरोः कालटिगमनम् 48

१८. मुमूर्षन्त्यै स्वमात्रे श्रीशङ्करकृतब्रह्मपदाद्युपदेशनकथनम् ... 49

१९ श्रीशङ्करकृतस्वमातृसंस्कृतिकथनम् 49

२०. श्रीशङ्करदत्तस्वजनादिशापकथनम् 50

पञ्चमः सर्गः

१. प्रयागक्षेत्रमहिमवर्णनम् 51

२. भट्टभगवत्पादसंवादवर्णनम् 53

३. *मण्डनभगवत्पादसंवादवर्णनम् 57

षष्ठः सर्गः

१. भगवत्पादानां विश्वरूपगृहिगृहगमनकथनम् 59

२. विश्वरूपकृतभगवत्पादसत्कारवर्णनम् 59

३. उभयभारत्याः पूर्ववृत्तकथनम् 60

४. सविस्तरं विश्वरूपोभयभारत्योर्वृत्तोद्वाहकथाकथनम् ... 61

५. भगवत्पादैर्विश्वरूपनिकटे वादयाचनम् 73

६. सविस्तरं तयोर्वादकथानुवर्णनम् 73

७. विश्वरूपपराजयकथनम् 76

८. उभयभारत्याः शापमोक्षणम् 76

---

* सुरेश्वरोदन्योऽयं मण्डनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तमः सर्गः

पृष्ठाङ्कः

१. सुरेश्वरं प्रति भगवत्पादकृततत्त्वोपदेशकथनम् 77

२. सुरेश्वरं प्रति भगवत्पादेन स्वभाष्यस्य वार्तिककरणनिर्देशनम् 81

३. भगवत्पादशिष्यैस्तत्प्रतिषेधनम् 82

४ सुरेश्वरैर्नैष्कर्म्यसिद्धिप्रणयनादिकथाकथनम् 85

५. ततः तैत्तिरीयबृहदारण्यकयोर्वार्तिकप्रणयनकथनम् ... 88

६. पद्मपादेन पञ्चपादिका कृतेति कथनम् 88

७. पद्मपादकृततीर्थयात्रानुज्ञाप्रार्थनकथनम् 88

८. तीर्थयात्राप्रसङ्गे संभवतां दोषाणां भगवत्पादैराविष्करणम् ... 89

९. तथापि तेन तदनुज्ञासंप्रार्थनम् 89

१०. यात्राकालेऽवधेयानां विषयाणां भगवत्पादैरुपदेशनम् ... 91

११. यात्राप्रसङ्गे पद्मपादकृतकालहस्तीगमनम् 93

१२. ततः कञ्चीक्षेत्रगमनम् 93

१३ सविस्तरं तन्महिमानुवर्णनम् 93

१४. तत्र यमविष्णुभटसंवादकथनम् 94

१५. धर्मराजतद्भटसंवादः 96

१६. तत्र याम्यपुरीगमनयोग्यायोग्यविभजनकथनम् 97

अष्टमः सर्गः

१. पद्मपादस्य पुण्डरीकक्षेत्रगमनम् 101

२. तत्क्षेत्रमहिमानुवर्णनम् 102

३. ततः कवेरकन्यामाधवयोर्महिमानुवर्णनम् 104

४. पद्मपादकृतस्वमातुलगेहगमनादिवर्णनम् 106

५. तत्र पद्मपादकृतगृहस्थाश्रमप्रशंसनम् 110

६. स्वमातुलाय पद्मपादकृतपञ्चपादिकाप्रदर्शनादिकथनम् ... 112

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

७. सेतुगमनोद्योगवर्णनम् 112

८. ततो मातुलकृतपञ्चपादिकाप्रदाहप्रकारकथनम् 113

९. पद्मपादकृतफुल्लाश्रमगमनम् 113

१०. तत्र पूर्ववृत्तश्रीरामविषादयोगकथनम् 113

११. श्रीरामकुम्भसम्भवदर्शनकथनम् 114

१२. कुम्भोद्भवकृतश्रीरामाश्वासनम् 115

१३. पद्मपादकृतरामसेतुक्षेत्रगमनवर्णनम् 116

१४. पद्मपादकृतरामसेतुक्षेत्रमहिमानुवर्णनम् 117

१५. तत्र नर्मदाया लिङ्गशिलानयनाय श्रीरामेण हनुमत्प्रेषणम् ... 117

१६. हनुमदागमनविलम्बाद्गन्धमादने प्राच्यलिङ्गप्रतिष्ठापनम् ... 118

१७. प्रत्यागतस्य हनूमतः कोपोपवर्णनम् 118

१८. हनुमत्कृतप्राच्यलिङ्गोच्चाटनसमुद्यमादिवर्णनम् 118

१९. हनूमतो मङ्गलाक्षेत्रपतनमङ्गलाप्रसादनादिकथनम् 120

२०. प्रसादितहनुमत्कृतपरशिवस्तोत्रकथनम् 121

२१. शिवानुगृहीतहनुमत्कृतस्वानीतलिङ्गप्रतिष्ठापनम् 124

नवमः सर्गः

१. तत्र गन्धमादनक्षेत्रवर्णनम् 125

२. ततः पुनः पद्मपादकृतमातुलगेहागमनादिवर्णनम् 129

३. पुनस्तस्य शङ्करदेशिकान्तिकागमनम् 130

४. उग्रभैरवविजयकथनम् 132

५. भगवत्पादकृतनृसिंहस्तवनम् 133

६. तोटकशिष्याख्यानकथनम् 138

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशमः सर्गः

पृष्ठाङ्कः

१. भगन्दरव्याधिचिकित्सने गुरुशिष्यविवदनम् 142
२ भिषगानयनाय शिष्याणां दिक्षु गमनम् 144
३. सूर्योदयवर्णनम् 144
४ सह्यवर्णनम् 145
५. समुद्रवर्णनम् 148
६ वसन्तवर्णनम् 149
७. वनक्रीडावर्णनम् 150
८. ग्रीष्मवर्णनम् 153
९. जलक्रीडावर्णनम् 154
१० मधुपानवर्णनम् 157
११. सायङ्कालवर्णनम् 158
१२. चन्द्रोदयवर्णनम् 159
१३ रतोत्सववर्णनम् 160

एकादशः सर्गः

१. वर्षावर्णनम् 165
२. शरद्वर्णनम् 168
३. हेमन्तवर्णनम् 173
४. शिशिरवर्णनम् 175
५. भगवत्पादभिषक्कृतसंवादवर्णनम् 178
६. भगवत्पादकृताश्विनीदेवानुसरणम् 182
७. अश्विनीदेवकृतहरिहयानुमन्त्रणम् 182
८. तत्र बृहस्पतिकृतसङ्क्षेपशङ्करार्यकथानुवर्णनम् 183

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

९. अश्विनीदेवतयोर्भगवत्पादान्तिकागमनम् 188

१०. भगवत्पादशिष्यकृताश्विनीदेवभैषज्यप्रार्थनम् 189

११. अश्विनीदेवतयोर्भैषज्यानन्तरं प्रतिगमनम् 190

द्वादशः सर्गः

१. भगवत्पादकृतश्रीवलिग्रामगमनादिवर्णनम् 191

२. श्रीवलिग्राममहिमानुवर्णनम्... 191

३. हस्तामलकशिष्यस्वीकरणम् 194

४. भगवत्पादकृतकाश्मीरगमनम् 196

५. आचार्यकृतसर्वज्ञपीठारोहणकथनम् 196

६. आचार्यकृतनानावादिविजयवर्णनम् 197

७. भगवत्पादश्रीशारदयोः संवादकथनम् 200

८. आचार्यकृतपरकायप्रवेशादिकथनम् 201

९. आचार्यकृतश्रीशारदापराजयकथनम् 203

१०. भगवत्पादकृतसर्वज्ञपीठाधिरोहणवर्णम्।... 204

११. कविकृतभगवत्पादप्रशंसनम् 205

विषयानुक्रमणिका समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओम्

श्रीमच्छङ्करविजयः

श्रीव्यासगिरिप्रणीतः

प्रथमस्सर्गः

कालट्याख्ये ग्रामवर्ये द्विजाग्र्यः
सत्सन्तोषी केरलेष्वातिथेयः ।
जज्ञे कर्ता कर्मणां चोदितानां
त्यक्ता नित्यं निन्दितानां विनीतः ॥ १ ॥

स ब्रह्मचारी गुरुगेहवासी तत्कार्यकारी विहितान्नभोजी ।
सायं प्रभातश्च हुताशसेवी व्रतेन वेदं निजमध्यगीष्ट ॥ २ ॥

क्रियाद्यनुष्ठानफलोऽर्थबोधस्स नोपजायेत विना विचारम् ।
अधीत्य वेदानथ तद्विचारं चकार दुर्बोधतरो हि वेदः ॥ ३ ॥

वेदेष्वधीतेषु विचारितेऽर्थे शिष्यानुरागी गुरुराह तं स्म ।
अपाठि मत्तस्सषडङ्गवेदो व्यचारि कालो बहुरत्यगात्ते ॥ ४ ॥

भक्तोऽपि गेहं व्रज संप्रति त्वं जनोऽपि ते दर्शनलालसःस्यात् ।
गत्वा कदाचित् स्वजनप्रमोदं विधेहि मा तात विलम्बथाः
स्म ॥ ५ ॥

विधातुमिष्टं यदिहापराह्णे विजानता तत्पुरुषेण पूर्वम् ।
विधेयमेतद्यदिह श्व इष्टं कर्तुं तदद्येति विनिश्चितोऽर्थः ॥ ६ ॥

कालोप्तबीजादिह यादृशं स्यात् सस्यं न तादृग्विपरीतकालात् ।
तथा विवाहादि कृतं स्वकाले फलाय कल्पेत न चेद्वृथा तत् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आजन्मनो गणयतो ननु तान् गताब्दान्
माता पिता परिणयं तव कर्तुकामौ ।
पित्रोरियं प्रकृतिरेव पुरोपनीतिं
यद्वद्ध्यायतस्तनुभवस्य ततो विवाहम् ॥ ८ ॥

तत्तत्कुलीनपितरः स्पृहयन्ति कामं
तत्तत्कुलीनपुरुषस्य विवाहकर्म ।
पिण्डप्रदातृपुरुषस्य ससन्ततित्वे
पिण्डाविलोपमुपरि स्फुटमीक्षमाणाः ॥ ९ ॥

अर्थावबोधनफलो हि विचार एष
तच्चापि चित्रबहुकर्मविधानहेतोः ।
तत्राधिकारमधिगच्छति सद्वितीयः
कृत्या विवाहमिति वेदविदां प्रवादः ॥ १० ॥

सत्यं गुरो न नियमोऽस्ति गुरोरधीन-
वेदो गृही भवति नान्यपदं प्रयाति ।
वैराग्यवान् व्रजति भिक्षुपदं विवेकी
नो चेद्गृही भवति [1]राजपदं तदेतत् ॥ ११ ॥

श्रीनैष्ठिकाश्रममहं परिगृह्य याव-
ज्जीवं वसामि तव पार्श्वगताश्चिरायुः ।
दण्डाजिनी सविनयो बुध जुह्वदग्नौ
वेदं पठन् पठिताविस्मृतिहानिमिच्छन् ॥ १२ ॥

दारग्रहो भवति तावदयं सुखाय
यावत्कृतोऽनुभवगोचरतां गतस्स्यात् ।
श्वाच्छनैर्विरसतामुपयाति सोऽयं
किं निह्नुषे त्वमनुभूतिपदं महात्मन् ॥ १३ ॥

---

[1] का. राजपथम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यागोऽपि नाकफलदो विधिना कृतश्चेत्
प्रायस्समग्रकरणं भुवि दुर्लभं तत् ।
कृष्यादिवन्न हि फलं यदि कर्मणि स्या-
द्दिष्ट्या यथोक्तविरहे फल[1] दुर्विधित्वम् ॥ १४ ॥

निस्स्वो भवेद्यदि गृही निरयी स नूनं
भोक्तुं न दातुमपि यः क्षमतेऽणुमात्रम् ।
पूर्णोऽपि [2]पूर्ण[3]मभिमन्तुमशक्नुवानो
[4]नो मन्यते भुवि शमं खलु तत्र तत्र ॥ १५ ॥

यावत्सु सत्सु परिपूर्तिरथो अमीषां
साधो गृहोपकरणेषु सदा विचारः ।
एकत्र संहतवताश्रितपूर्वनाश-
स्तच्चापयाति पुनरप्यपरेण योगः ॥ १६ ॥

एवं गुरौ वदति तज्जनको निनीषु-
रागच्छदत्र तनयं स्वगृहं गृहेशः ।
तेनानुनीय बहुलं गुरवे प्रदाप्य
वित्तं निकेतनमनायि गृहीतविद्यः ॥ १७ ॥

गत्वा निकेतनमसौ जननीं ववन्दे
सालिङ्ग्य तद्विरहजं [5]परितापमौज्झत् ।
प्रायेण चन्दनरसादपि शीतलं त-
द्यत्पुत्रगात्रपरिरम्भणनामधेयम् ॥ १८ ॥

श्रुत्वा गुरोस्सदनतश्चिरमागतं तं
तद्बन्धु[6]ताऽऽगमदथ त्वरितेक्षणाय ।
प्रत्युद्गमादिभिरसावपि बन्धुताया-
स्सम्भावनां व्यधित वित्तकुलानुरूपाम् ॥ १९ ॥

---

[1] का. दुर्विधत्वम् ।
[2] क, पूर्ति ।
[3] का. ममुमन्तुमशक्नुवन्यो ।
[4] क. मोहेन शं न मनुते खलु तत्र तत्र ।
का. देहेन शं न मनुते खलु तत्र तत्र ।
[5] का. चिरताप ।
[6] का. रा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदे पदक्रमजटादिषु तस्य बुद्धिं
संवीक्ष्य तज्जनयिता बहुशोऽप्यपृच्छत् ।
यस्याभवत्प्रथितनाम वसुन्धरायां
विद्याधिराज इति सङ्गतवाच्यमस्य ॥ २० ॥

भाट्टे नये गुरुमते कणभुङ्मतादौ
[1]प्रश्नांश्चकार तनयस्य मतिं बुभुत्सुः ।
शिष्योऽप्युवाच नतपूर्वगुरुस्समाधिं
[2]पित्रोदिते स्मितमुखो हसिताम्बुजास्यः ॥ २१ ॥

वेदे च शास्त्रे च निरीक्ष्य बुद्धिं
प्रश्नोत्तरादावपि नैपुणीं ताम् ।
दृष्ट्वा तुतोषातितरां पितास्य
स्वतस्सुखा [3]या किमु शास्त्रतो वाक् ॥ २२ ॥

कन्यां प्रदातुमनसो बहवोऽपि विप्रा-
स्तन्मन्दिरं प्रति ययुर्गुणपाशकृष्टाः ।
पूर्वं विवाहसमयादपि तस्य गेहं
संबाधवत्किल बभूव वरार्तिकामैः ॥ २३ ॥

बह्वर्थदायिषु बहुष्वपि सत्सु देशे
कन्याप्रदातृषु परीक्ष्य विशिष्टजन्मा ।
कन्यामयाचत सुताय स विप्रवर्यो
विप्रं विशिष्टकुलजं प्रथितानुभाव[4]: ॥ २४ ॥

कन्यापितुर्वर[5]पितुश्च विवाद आसी-
दित्थं तयोः कुलजुषोः प्रथितोरुभूत्योः ।
कार्यस्त्वया परिणयो गृह [6]एव पुत्री
मानीय [7]मत्कतनयाय सुता प्रदेया ॥ २५ ॥

---

[1] क.-प्रश्नं चकार । [2] क. पित्रोदितः । [3] क. वाक् ।
[4] का. भावम् । [5] क. वरयितुश्च । [6] क. एत्य ।
[7] क. सद्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सङ्कल्पितद्विगुणमर्थमहं प्रदास्ये
मद्गेहमेत्य परिणीतिरियं कृता चेत् ।
अर्थं विना परिणयं द्विज कारयिष्ये
पुत्रेण मे गृहगता यदि कन्यका स्यात् ॥ २६ ॥

कश्चित्तु तस्याः पितरं बभाण
मिथस्समाहूय विशेषवादी ।
अस्मासु गेहं गतवत्स्वमुष्मै
विगृह्य कन्यामपरः प्रदद्यात् ॥ २७ ॥

तेनानुनीतो वरतातभाषितं
द्विजोऽनुमेने वररूपमोहितः ।
[1]दृष्टो गुणस्संवरणाय कल्पते
मन्त्रो हि जापाच्चिरकालभावितः ॥ २८ ॥

विद्याधिराजमखमण्डितनामधेयौ
सं [2]प्रत्ययं व्यतनुतामभिपूज्य दैवम् ।
सम्यङ्मुहूर्तमविलम्ब्य विचारणीया
मौहूर्तिका इति परस्परमूचिवांसौ ॥ २९ ॥

उद्वाह्य शास्त्रविधिना विहिते मुहूर्ते
तौ स[3]म्मदं [4]बहुमवापतुराप्तकामौ ।
तत्रागतो भृशममोदत बन्धुवर्गः
किं भाषितेन बहुना मुदमाप्तवर्गः ॥ ३० ॥

तौ दम्पती सुवसनौ शुभदन्तपङ्क्ती
सम्भूषितौ विकसिताम्बुजरम्यवक्त्रौ ।
सव्रीडहासमुखवीक्षणसंप्रहृष्टौ
देवाविवापतुरनुत्तमशर्म नित्यम् ॥ ३१ ॥

---

[1] का. भ्रष्टो ।
[2] का. सुप्रत्ययं ।
[3] क. संमुदं ।
[4] का. मुहुरवापतुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नीनभाधित महोत्तरयागजातं
कर्तुं विशेषकुशलैस्सहितो द्विजेशः ।
तत्तत्फ[1]लेषु यदनाहितहव्यवाहः
स्यादुत्तरेषु विहितेष्वपि नाधिकारी ॥ ३२ ॥

यागैरनेकैर्बहुवित्तसाध्यैर्विजेतुकामो भुवनान्ययष्ट ।
व्यस्मारि देवैरमृतं तदाशैर्दिने दिने सेवितयज्ञभागैः ॥ ३३ ॥

सन्तर्पयन्तं पितृदेवमानुषां-
स्तत्तत्पदार्थैरभिवाञ्छितैस्सदा ।
विशिष्टविप्रैस्सुमनोभिरञ्चितं
तं मेनिरे जङ्गमकल्पपादपम् ॥ ३४ ॥

परोपकारव्रतिनो दिने दिने
व्रतेन वेदं पठतो महात्मनः ।
श्रुतिस्मृतिप्रोदितकर्म कुर्वत-
स्समा [2]अतीयुर्दिनमाससंमिताः ॥ ३५ ॥

रूपेण मारः क्षमया वसुन्धरा
विद्यासु वृद्धो धनिनां पुरस्सरः ।
गर्वानभिज्ञो विनयी सदाऽऽनतः
स नोपलेभे तनयाननं जरन् ॥ ३६ ॥

गावो हिरण्यं बहु सस्यमालिनी
वसुन्धरा चित्रपदं निकेतनम् ।
सद्भावना बन्धुजनैश्च सङ्गमो
न पुत्रहीनं बहवोऽप्यमूमुहन् ॥ ३७ ॥

अस्यामजाता मम सन्ततिश्चे-
च्छरद्यवश्यं भवितोपरिष्टात् ।
तत्राप्यजाता तत उत्तरस्या-
मेवं स कालं मनसा निनाय ॥ ३८ ॥

---

[1] क. फलं हि । [2] क. व्यतीयुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमान नगर

खिद्यन्मनाश्शिवगुरुः कृतकार्यशेषो
जायामचष्ट सुभगे किमतः परं [1]नः ।
साङ्गं वयोऽर्धमगमत्कुलजे न दृष्टं
पुत्राननं यदिह लोक्यमुदाहरन्ति ॥ ३९ ॥

[2]एवं प्रिये गतवतोऽसुतदृश्वनश्चेत्
पञ्चत्वमे*ष्यदथ नोऽशुभमापतिष्येत् ।
अस्या ह्युपायमनिशं भुवि वीक्षमाणो
नेक्षे ततो बत जनिर्विफला ममाभूत् ॥ ४० ॥

भद्रे सुतेन रहितौ भुवि के वदन्ति
नौ पुत्रपौत्रसरणिक्रमतः प्रसिद्धिम् ।
लोके न पुष्पफलशून्यमुदाहरन्ति
वृक्षं प्रवालसमये फलितं विहाय ॥ ४१ ॥

[3]इतीरिते प्राह तदीयभार्या
शिवाख्यकल्पद्रुममाश्रयावः ।
तत्सेवनातो भविताऽधुनाथ
फलं स्थितं जङ्गमरूपमैशम् ॥ ४२ ॥

यत्राभाणि गुरोस्सुवेदपठनं वेदार्थविच्चा समं
संवादो गुरुशिष्ययोरभिहितो गार्हस्थ्यकर्माण्यथ ।
दम्पत्योस्सुतदृष्ट्युपायकरणे[4] संवाद उक्तस्ततः
काव्ये शङ्करदेशिकेन्द्रविजये सर्गोऽयमाद्योऽगमत् ॥ ४३ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
प्रथमस्सर्गः ॥

---

[1] क. नौ ।

[2] का. एवं प्रिये गतवतोस्सुतदृश्वनोश्चेत्
पञ्चत्वमैष्यदथ नौ शुभमापतिष्यत्

* अत्र "हेतुहेतुमतोर्लिङ्" इति लिङ्निमित्तसत्त्वात् "लिङ्निमित्ते लृङ क्रियातिपत्तौ" इति क्रियातिपत्तौ भविष्यति ऐष्यदिति आपतिष्यदिति च लृङ इति द्रष्टव्यम् ।

[3] का. इतीरिता । [4] अ. णं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वितीयस्सर्गः

पुरोपमन्युः किल पञ्चहायन-
स्सन्तोषयामास शिवं समाधिना ।
आराधिता दैवतकल्पवल्लरी
फलान्यभीष्टानि फलिष्यति ध्रुवम् ॥ १ ॥

किलोपमन्योर्जननी दरिद्रा
पिष्टं समालोड्य जले ददाति ।
स्तन्यञ्च किञ्चित्परिकर्शिताङ्गी
स दुग्धबुद्ध्या तदुतोपभुङ्क्ते ॥ २ ॥

स चोपजीवन्निति मातुलस्य
गेहं जनन्या प्रययौ कदाचित् ।
गोमान् धनी सर्वगुणाधिवास-
स्स मातुलस्तस्य गृहे न्यवात्सीत् ॥ ३ ॥

सदुग्धमन्नं सघृतं समश्नं-
श्चिक्रीड बालैस्सह वीतरोगः ।
पुनश्च मात्रा सहितस्समायात्
स्वकीयदारिद्र्यगृहाणि बालः ॥ ४ ॥

भूयोऽपि माता कृपणा पुरेव सा
नीवारपिष्टं प्रददावरोचत ।
नास्मै तदन्नं विजहाव[1] थारुद-
द्दुग्धं न मातः पय इत्यवोचत् ॥ ५ ॥

क. विजहौ तदा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शनै रुदन्ती तनयं बभाषे
मातोदिताश्रुं निविमृज्य दीना ।
तातेदृशं दुग्धमिहास्ति गेहे
विशेषलाभे मम नास्ति भाग्यम् ॥ ६ ॥

आराधितो नेश्वरकल्पशाखवी
भवान्तरे तात मया कदाचित् ।
यदीश्वरस्याङ्घ्रिसरो[1] जयुग्मं
समर्चितं तत्कथमीदृशं स्यात् ॥ ७ ॥

तातेह ये परिजनाम्बरभूषणा[2]स्स्युः
स्त्रीरत्नगोवसुमतीसुखभोगभाजः ।
तान्विद्धि पूजितशिवान् पुरुषांस्त्रिलोक्यां
नो चेत्कथं गदितवैभवभागिनः स्युः ॥ ८ ॥

यद्येवमम्ब मम दुर्विधतापहन्तृ
कर्माकलय्य विधिवत्करणीयमेव ।
[3] तुष्येद्धरः करुणयैव विना विपञ्चि
येनाशुभेन[4] विरहय्य तनुर्न मेऽन्यत् ॥ ९ ॥

इतीरयित्वा जननीमनुज्ञां
पञ्चाब्दमात्ररतपसे धृतात्मा ।
[5] अयाचताथाहमठानि किञ्चित्
संप्रार्थयस्वाखिलदेवतास्त्वम् ॥ १० ॥

---

[1] अ. का मर्चितं तदा कथं जीवनमीदृशं स्यात् ।

[2] का. णाढ्याः ।

[3] का. तुष्ट्वेश्वरं ।

[4] अ. येनाशु येन, का. यानाश्नुतेन विरहय्य तनुं न मेऽन्यत् ।

[5] क. अयाचताद्याहं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्तमात्रे जननी मुमूर्छ
सा किञ्चिदाश्वास्य सुतं बभाषे ।
आलिङ्ग्य नो वेत्सि दिशं सुतैकां
पूर्वामुदीचीमथ वा प्रतीचीम् ॥ ११ ॥

त्वं तात दूरं बत मा प्रयासी-
स्तपो हि कर्तुं तव नास्ति शक्तिः ।
[1] पञ्चाब्दमात्रः पतिता न दन्ता
मां [2] किं वदेयुर्जननीमकाले ॥ १२ ॥

वसन्निहैवात्मबलानुरूपं
तपश्चर त्वं यदि रोचते ते ।
तपस्सहाया भवितास्मि शक्त्या
त्यक्त्वा न हि त्वामिह वस्तुमीशे ॥ १३ ॥

अत्रापि तत्रापि शिवोऽस्ति साक्षात्
स सर्वगो व्योमसमो न मूर्तः ।
मनस्स्थिरत्वं सुदृढा च भक्ति-
स्तपोनिदानं न तु देशभेदः ॥ १४ ॥

सत्यं शिवस्सर्वगतो न संशय-
स्तथापि सान्निध्यममुष्य कारितम् ।
देशादिना सर्वगकृष्णवर्त्मनो
व्यक्तिर्यथा वृक्षविशेषगोचरा ॥ १५ ॥

गृहं न योग्यं तपसेऽम्ब सङ्गतं
मित्रादिभिस्तन्निकटं न शस्यते ।
गृहान् परित्यज्य तपोवनं गताः
किं मौर्ख्यभाजो मुनयः पुरातनाः ॥ १६ ॥

---

[1] का. पंचाब्दमात्रे प्रहिते वनान्तं *or* पंचाब्दमात्रः प्रहितो वनान्तम् ।
[2] न. निन्दयेयुः किमु मातरं माम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यं तपश्शैशव एव नूनं न यौवने नापि च वृद्धभावे ।
यूनो विकारस्तपसो हि विघ्नो वृद्धस्तपः कर्तुमनीश एव ॥

बालं तपस्यन्तमुदीक्ष्य देवाः
कृपां विदध्युस्स हि विस्मयास्पदः ।
शिशुं तदन्यत्र च दुष्करे स्थितं
पश्यन् दयालुर्हि जनोऽनुकम्पते ॥ १८ ॥

औत्तानपादिः किल पञ्चहायन-
स्तपश्चचारातिसुदुस्सहं ततः ।
श्रीविष्णुमुद्दिश्य स चाप दुर्लभं
पदं न किं ते श्रुतिगोचरं गतः ॥ १९ ॥

तपश्चरेयं यदि ते समीपे
दृष्ट्वा हि मामुग्रतपश्चरन्तम् ।
जायेत दुःखं प्रतिवासरं ते
ततो वरं दूरत एव वासः ॥ २० ॥

आत्मानमन्यश्च न शक्नुवत्या-
स्त्रातुं विदेशे गमनं मया ते ।
दुःखाच्च दुःखं तदिहाऽऽस्स्व मात-
र्गृध्नन्त्यभीष्टं मम नित्यमेव ॥ २१ ॥

इत्थं शङ्करविजये काव्येऽस्मिन् व्यासशैलमुनिराचिते ।
सर्गो द्वितीय आसीत् प्राप्तसमाप्तिस्समात्तविविधार्थे ॥ २२ ॥

इति श्रीशङ्करविजये व्यासाचलीये
द्वितीयस्सर्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तृतीयस्सर्गः

अनुनीय स मातरं प्रतस्थे
प्रतिवाक्यैरिति तां निरुत्तैरस्तैः ।
अथ तं तपसे प्रयान्तमारा
ज्जननी वाग्भिरमूभिरार्थयत्सा ॥ १ ॥

जोषं प्रयाहि परिपूजय शङ्करं त्वं
कार्यं विधाय पुनरेहि ममान्तिकाय ।
त्वां पश्यतां सुतमिवौरसमात्तहार्दौ
श्रीपार्वतीपुरहरौ प्रणता[1]मरद्रू ॥ २ ॥

त्वं तात पूजय शिवं करुणाम्बुराशिं
पञ्चाक्षरीविधिमुपाश्रय शुद्धचेताः ।
नात्रा[2]तिर्नीतिनियमोऽखिलजीवनत्वात्
सर्वाधिकारपदमेनमुशन्ति सन्तः ॥ ३ ॥

अनुयतोऽपि निवर्त्य सुहृज्जनान्
स्थिरमतिः स्मितशोभिमुखाम्बुजः ।
परिहरन् ममतां गृहगोचरां
हृदयगेन शिवेन समं ययौ ॥ ४ ॥

किमयमग्निरथो वनदेवता
पथि जनैरिति चिन्तित एककः ।
व्रजति भोक्तुमना न च याचते
विधिवितीर्णकृतात्म[3]तनुस्थितिः ॥ ५ ॥

---

[1] का. मरौघौ । [2] क. नात्तोपनीति ।
[3] का. हितःशिशुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रजसि कुत्र वटो कुत आगतः
किमभिवाञ्छसि कस्य [1]तनूद्भवः ।
पथि जनैरिति [2]पृच्छ्यत एव स
प्रतिगिरं न ददाति [3]निराकुलः ॥ ६ ॥

बहुजलास्सरितस्समहीधराञ्-
जनपदानपि कांश्चिदतीत्य सः ।
पथि गतः परितो गतलोचनो
वनमपश्यदयं तरुमण्डितम् ॥ ७ ॥

वरकुरङ्गसमाकुलमेकतो
भयदसूकरयूथनिषेवितम् ।
अपरतो गजयूथविभीषणं
[4]किलकिलारवधूर्तवलीमुखम् ॥ ८ ॥

सरणिमुज्झितवान् गहनाटवी-
मुपविवेश समीहितलक्षणाम् ।
अथ सरस्समुदीक्षितवान् पुरो
निवसनाय मनोऽधित बालकः ॥ ९ ॥

विमलनीरसरोवरतीरगः
स्थिरमहीरुहमूलमुपाश्रयत् ।
स्थिरधियां विपिनं सदनायते
सदनमल्पधियां विपिनायते ॥ १० ॥

---

[1] का. तनूभवः । [2] क. पृच्छत ।
[3] क. निराकुलम् । [4] अ. किलि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिनिमज्य सर[1]स्सलिले सुखे
स्थिरमहीरूहमूलवसुन्धराम् ।
किसलयोत्तरदर्भतृणाङ्कुरै-
र्व्यवहितां प्रविधाय मनोरमाम् ॥ ११ ॥

उपनिविश्य ततो हरिदिङ्मुखो
[2]गदितमन्त्रमुदाहरदैश्वरम् ।
पृथुलदीर्घव[3]टाङ्घ्रिकृतांशुको
व्यधित वह्निमसौ कटिसूत्रकम् ॥ १२ ॥

मनुवरे शिवदैवतविग्रहे
वि[4]दधदात्ममनो विषयोपगम् ।
मनुमिमं जपति स्म पुरोदितं
नयनमर्धनिमीलितमुद्वहन् ॥ १३ ॥

मुनिजनोदितवृत्तिम[5]सौ व्यधात्
त्रिषवणं सरसीकृतमज्जनः ।
स्थिरनिबद्धसुखासनसंस्थितो
विजनतावनितापरितोषितः ॥ १४ ॥

मितमपीह फलं स निषेवते
न च जहाति भृशं स कदाचन ।
स्वपिति नात्र भृशं न च जागरं
व्रजति बालमुनिर्बहुयोगवित् ॥ १५ ॥

क्षुधितसिंहगणस्सरसीजलं
परिपिपासुरिहाटति खण्डधीः ।
शिशुमुनिं समुदीक्ष्य [6]नदन् मनाक्
[7]चकितवत्प्रपलायति दूरतः ॥ १६ ॥

---

[1] क. सुखे सरसीजले । [2] क. गदितमैश्वरमन्त्रमुदाहरत् ।
[3] क. वलाङ्घ्रि का. मसुं तटरोहिणीम् । [4] क. व्यदधत् ।
[5] क. वृत्तिरसौ सुकृत् । [6] अ. न दिङ्मना । [7] अ. श्व ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगगणा बहुकालमुदक्षिणात्
परिचयं ययुरन्तिकसंश्रयाः ।
शिशुमुनिं परिवव्रु[1]रनुद्धताः
परिचयः खलु सौहृदकारणम् ॥ १७ ॥

अथ तरक्षुरुपागमदेकदा
मृगगणानुगतो मृगभक्षकः ।
[2]मृगगणे [3]द्रुतवत्यतिरोषणः
शिशुमुनेः पुरतस्स जगर्ज ह ॥ १८ ॥

श्रुतवतः श्रुतिभेदि च [4]गार्जितं
शिशुमुनेरुदियाय भयं मनाक् ।
शिवशिवेति तदाऽस्मरदक्षरं
स पतति स्म [5]परासुरथोद्वमन् ॥ १९ ॥

वनगजा बहुबृंहितकारिण-
स्सतृष एव जलाशयमावि[6]शन् ।
मुखविधुं समुदीक्ष्य [7]मुनेरथो
मुदितचित्ततया वितृषोऽभवन् ॥ २० ॥

तत इतो [8]ज्वलतीह महावने
शिशुसमागमनाज्ज्वलनः पुरा ।
स च शशाम तदागममात्रत-
स्सुखमभूद्विपिने बहुलद्रुमे ॥ २१ ॥

---

[1] अ. परिजह्रु ।
[2] का. मृगगणं प्रविहाय तु रोषणः ।
[3] का. गतवत्य ।
[4] क. विगर्जितं ।
[5] का. रधोमुखः ।
[6] क. आगमन् ।
[7] का. मुनेः शिशोः ।
[8] का. ज्वलदत्र समुज्वलः शिशुमुनेर्ज्वलनो धुरि यो वने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगमृगेन्द्रतरक्षुगजादय-
स्सहजवैरनिकेतनमानसाः ।
परिजहुर्निजवैरमनश्वरं
त्वथ पपुस्सहितास्सरसीजलम् ॥ २२ ॥

त्यजति स स्म फलादिकमेकदा
मुनिरयं दिवसान्तर एति तत् ।
अथ तत प्रतिमासमुपाददे
प्रतिसमं तदपाकृत सर्वदा ॥ २३ ॥

अपि जलेन पुरोदितवर्त्मना
मुनिरवर्तत योगबलेन सः ।
अथ भुजङ्गमवृत्तिरभून्मुनिः
[1] शिवपदामृतसेवनतत्परः ॥ २४ ॥

अथ जपं विरहय्य समाधिना
शिवमुपासितुमारभतोत्तमः ।
करपदादियुतं तरुणेन्दुकं
भसितभासितमुज्ज्वलभूषणम् ॥ २५ ॥

दधतमूर्ध्वकरे परशुं मृगं
वरमभीतिमधस्तनदोर्युगे ।
विशदवर्णमहाम्बुजविष्टरं
परिहितं मृग [2] भक्षणचर्मणा ॥ २६ ॥

स्मितविकासिमुखाम्बुजशो [3] भनं
रविहुताशनिशाकरलोचनम् ।
विदधतं प्रभयाऽतिमिरा दिशो
गरलकालिमवासितकन्धरम् ॥ २७ ॥

---

[1] का. खजलदा ।
[2] का भक्षक ।
[3] क. शोभिनं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसुमतीगतमेकपदं न्यधा-
दपरमूर्ध्वगतं प्रविधाय सः ।
दिनकरे नयने समुपास्त तं
[1] शिवमधोधृतदोर्युगलश्शिशुः ॥ २८ ॥

स शिशुरत्यशयिष्ट [2] तपश्चरन्
मुनिजनांस्तपसापि पुरातनान् ।
मुनिजना अपि वीक्ष्य [3] शिशुं भृशं
तपसि [4] विष्ठितमेत्य सुविस्मिताः ॥ २९ ॥

[5] उदभवत्तनुतोऽस्य महामहः
[6] स तु जगत्त्रयमूर्जितमानशे ।
प्रतिहता ह्मगुरूर्ध्वमधोमुखा
दिनकरस्य करा मुनितेजसा ॥ ३० ॥

वसुमती नमति स्म च तद्दिशि
[7] व्यधित पादतलं स तु यद्दिशि ।
नगनदीवनवारिधिसंहिता
हरिहयः श्रुतवानिदमद्भुतम् ॥ ३१ ॥

स च बिभाय भृशं मुनिपुत्रका-
दतिसुरासुरकर्मणि विष्ठितात् ।
[8] किमभिलष्य [9] तपश्चरतीत्यसौ
मम पदं प्रतिलिप्सुरुता [10] परम् ॥ ३२ ॥

---

[1] अ. अथो ।; क. अथोद्धृत ।
[2] तपश्चरान् ।
[3] क. तपश्चराः ।
[4] निष्ठित ।
[5] क. उदितवत् ।
[6] क. तदु ।
[7] क. न्यधित ।
[8] का. समभिचिन्त्य ।
[9] श्चरति ह्यसौ ।
[10] उतावरं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिहयोऽप्सरसां गणमब्रवीन
व्रजत यत्र मुनिस्तप [1]आचरन् ।
वसति तत्र जगत्त्रयमीदृशं
सुचकितं चकितैणदृशो [2]बलात् ॥ ३३

शिवमुदीक्ष्य तपश्चरतीत्यसौ
श्रुतमिदं [3]हि पुरैव मया परात् ।
स परवान् स्वपदाब्जानिषेविणो
मृगदृशस्सकलं परिदास्यति ॥ ३४ ॥

द्रुतमुमेत्य कुमारवन[4]स्थलीं
विहत तत्तप आदरतः स्त्रियः ।
मुनिवरं तपसो विनिवर्त्य तं
[5]पुनरिहायत यातनया भृशम् ॥ ३५ ॥

निगदिता हरिणेति सुराङ्गना
हरिहयाय ददुर्वचनं स्फुटम् ।
अवहितश्शृणु नो वचनं प्रभो
वयममूर्वचने तव संस्थिताः ॥ ३६ ॥

युवसु लब्धपदा वयमीदृश-
स्स हि न वेत्ति विभो युवतीहितम् ।
स किल पञ्चसमस्तपसाधिको
ध्रुवमसौ वितरिष्यति शापकम् ॥ ३७ ॥

न हि वयं शलभायितुमीश्महे
मुनिवरस्य रुडुग्रहुताशने ।
निपतिता बहवोऽपि पुरातना
[6]मुनिजनान् परिपीड्य तपस्यतः ॥ ३८ ॥

[1] क आचरत् ।   [2] अ. दृशोऽबलाः ।
[3] अ. दं पुर एव ।; का. दं पुर एवमथापरात् ।
[4] क. स्थलं ।   [5] क. पुनरिहेत यथायतनं भृशम् ।
[6] अ. भुवि जनान् हि निपीड्य ।; का मुनिजनानभिविश्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तव किं प्रविधास्यति बालकः
  स्पृहयति [1]प्रथिताय पदाय नः ।
अपदसं [2]भ्रमिता [3]परभीरुता
  प्रकृतिसिद्धमिदं [4]स्वयमिन्द्र ते ॥ ३९ ॥

इति वचः श्रुतवान् वलसूदनः
  प्रतिजगाद चलाधरपल्लवः ।
भगधना भजताशु [5]विगद्य मा
  कुटिलचारुवचोहत [6]मानसाः ॥ ४० ॥

प्रथितमस्त्रमिदं स्वयमेव मे
  कुलिशमेकमरातिषु दुर्जयं ।
मुनिजनेषु तपस्विषु वो वपु-
  स्तदपि कुण्ठितमद्य [7]भयाकरम् ॥ ४१ ॥

व्यसनकालबहिःस्थितशालिभिः
  परिजनैः फलमस्ति न किञ्चन ।
द्रुतमितोऽपसरन्तु वराङ्गना
  न मम दृष्टिपथे [8]विचरन्तु ताः ॥ ४२ ॥

इति वचस्समुदीर्य पुरन्दरः
  परिजनैस्सहितो विधिविष्टपम् ।
उपययौ स ददर्श चतुर्मुखं
  व्यसनमेतदसूचयदुत्थितम् ॥ ४३ ॥

---

[1] अ. प्रहिताय ।
[2] अ. संभ्रमता ।
[3] वद ।
[4] अ. द्वयसिन्धते ।; का. द्वयमिन्द्र ते ।
[5] अ. विगाद्य ।; क. विटाधमाः ।; का विगायनाः ।
[6] हृतमाशु मे ।
[7] का. भयङ्करम् ।
[8] का. चरताधुना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुनिशिशुर्भगवन्नतिमानुषं
  चरति तीव्रतपस्तत उत्थितम् ।
मह इदं भुवनं [1]हि निबधते
  न परिसञ्चरितुं क्षमते जनः ॥ ४४ ॥

भुवनसृष्टिमिमां भगवंस्त्वया
  कृतवता परिरक्षणमण्वपि ।
[2]खलु विधेयममुष्य न चेप्सितं
  श्रुति[3]निपाठपरेण विधीयते ॥ ४५ ॥

हरिहयेन गिरं समुदीरितां
  श्रुतवता प्रतिवाक्यमुपाददे ।
कमलजेन जगन्ति यतोऽभवन्
  [4]यत इमाः श्रुतयश्च बभासिरे ॥ ४६ ॥

सृष्टिमात्रकरणे न्ययुङ्क्त मा-
  मीश्वरो हरिमतिष्ठिपत् स्थितौ ।
तद्वयं भुजगशायिनं हरिं
  याम दुग्धजलधिं समीक्षितुम् ॥ ४७ ॥

विधिवचः [5]परिगृह्य पुरन्दर-
  प्रभृतयो विधिनापि [6]ततस्सह ।
अभिययुर्हरिदर्शनलालसा
  [7]जलनिधिं पयसां निधिमुद्धतम् ॥ ४८ ॥

---

[1] अ. निर्विबाधते ।; क. विबाधते ।
[2] क. खलधियं मम वज्रिपदे स्थितं ।
[3] अ. विपाठपरेण ।
[4] क. वत ।
[5] अ. प्रतिगृह्य ।
[6] क. सुराः ।
[7] का. अमृतवारिनिधिं सहिता तदा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]स बुबुधे विबुधाधिपतिर्हरिः
सुरवरागमनेन समं समः ।
तदिह शक्रमनोरथसूचितं
यदनिशं शयितोऽपि विबुद्धवान् ॥ ४९ ॥

[2]तत उदैक्षत देवमनिन्दितं
सुरगणस्सुरवर्यपुरस्सरः ।
भुजगभोगनिविष्टममीष्टदं
सजलनीरदवर्णसमद्युतिम् ॥ ५० ॥

[3] तत उदीरितवान्कमलाधिपं
गुरुरुपस्थितकार्यविशेषवित् ।
शृणु हरे व्यसने समुपस्थिते
वयमिहागमने विहितोद्यमाः ॥ ५१ ॥

न खलु विद्म वयं व्यसनान् पुरा
न च पुनर्विहिते [4]ऽभिमते प्रभो ।
न हि शिशोरपराधमुदीक्षते
गुरुजनः [5]कृपया परया युतः ॥ ५२ ॥

अविदितं तव नास्ति जगत्त्रये
सकलबुद्धिगुहागृहवासिनः ।
तदपि किञ्चिदुदीर्यत एव ते
व्यसनमागतमन्यत एव नः ॥ ५३ ॥

मुनिसुतः प्रथमे वयसि स्थित-
श्चरति घोरतपः स्थिरमानसः ।
न किल [6]केऽपि पुरेदृशमाचर-
न्न च पुनश्चरितार इति श्रुतम् ॥ ५४ ॥

---

[1] क. विबुबुधे । [2] का सतमुदैक्षतं ।
[3] का. इदमुदी । [4] अ. विदिते ।
[5] क. कृशया कृपया । [6] क.. के च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स हि [1]जगन्ति तनूत्थिततेजसा
परिदहन्नभिभूय महांस्यपि ।
वसति तत्तपसो विनिवर्त्य तं
जगदिदं परिपालय पूर्ववत् ॥ ५५ ॥

किमपि वाञ्छति वा [2]हितमुद्दिशन्
चरति घोरतमं तप [3]उत्तमम् ।
शिवत एव ततो विनि[4]वर्तयेः
न हि वयं तमुदीक्षितुमीश्वराः[5] ॥ ५६ ॥

[6]मदभिवाञ्छितमेतदनुत्तमं
सुरगणै [7]र्बलशत्रुपुरोगमैः ।
यदुत पालनकर्म ममेरितं
त्वहमयानि शिवं साशिवं सुराः ॥ ५७ ॥

मम तु कार्यमिदं परिपालनं
कमलजन्मन एव सृजिक्रिया ।
हरणकर्म हरस्य समीरितं
तदपि नैकत एव हि जायते ॥ ५८ ॥

मम वचः [8]परिपालयतां शिवं
[9]तमभिगत्य हिताहितबोधकम् ।
[10]समगताः कथयाम शिवाय [11]ते
[12]व्यसनमाधिदमेतदुपस्थितम् ॥ ५० ॥

---

[1] का. जिगाय । [2] आ. वाञ्छित ।
[3] अ. उत्तमः । [4] क. विनिवर्तयेत् ।
[5] का. मीश्महे । [6] अ तदभि ।
[7] क. विधिशक्र । [8] अ. पालयिता शिवः ।
[9] का. भिगम्य । [10] अ. सहगताः ।
[11] अ. नो । [12] का माततमे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हरिर्गमनाय समुद्यतो
गरुडमस्मरदेष समागमत् ।
[1]तमधिरुह्य सुरैस्सममेयिवान्
रजतभूधरभूधरमुत्तमम् ॥ ६० ॥

हरिविरिञ्चिपुरोगममाधवः[2]
शिवपदं गुणपूर्णमरो[3]चत ।
समवरुह्य ततो निजवाहनात्
[4]सविनयः प्रतिहारभुवं ययौ ॥ ६१ ॥

कनकवेत्रधरं स च नन्दिनं
धवलदेहमपृच्छदनेहसम् ।
हरिमयं वदति स्म सदा हरं
समय एव हरे प्रतिपालनम् ॥ ६२ ॥

स च निवेद्य हराय हरिं हरेः
करतलं [5]परिगृह्य पुरो ययौ ।
अथ हरस्सहसोत्थितवान् हरेः
करतलं स्वकरेण समग्रहीत् ॥ ६३ ॥

कमलजश्च सचक्रमुपाचर-
च्चथ यथोचितमन्यसुरान् शिवः ।
अथ महर्षिगणः श्रुतवानिमं
हरिहरद्वयतीर्थसमागमम् ॥ ६४ ॥

मुदितमानस आशु समाययौ
हरिहराववलोकितुमुत्तमौ ।
यदनयोरुभयोरिह सङ्गमः
[6]खगवृषैरपि दुर्लभ एव सः ॥ ६५ ॥

---

[1] आ. तमधिगम्य । [2] क. वासवः ।
[3] का. लोकत । [4] अ. सविनयं ।
[5] क. प्रतिगृह्य । [6] का. सुरवरैरपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिहरावथ तुष्टवुरादृताः
मुनिगणाः स्तुतिभिः स्तुतिकोविदाः ।
भुवनपालक देव नमोऽस्तु ते
हर नमो हरते त्रिजगन्त्यपि ॥ ६६ ॥

असितकण्ठ नमोऽस्तु विषाशिने
सरसिजाक्ष नमोऽस्तु दिवानिशम् ।
कुरु कृपामनिशं गिरिजापते
सरसिजाक्ष कटाक्षमितः कुरु ॥ ६७ ॥

मुररिपो जय तेऽस्तु नमो नमः
पुररिपो जय तेऽस्तु नमो नमः ।
गरुडवाहन [1] तेऽस्तु नमो नमः
वृषभवाहन देव नमो नमः ॥ ६८ ॥

भुजगभूषण देव नमोऽस्तु ते
भुजगभोगशयाय नमोऽस्तु ते ।
तरुणचन्द्रकिरीट नमोऽस्तु ते
विविधरत्नकिरीट नमोऽस्तु ते ॥ ६९ ॥

स्मरणमात्रधुताघचयौ नमो
मुनिजनालिनिषेव्यपदाम्बुजौ ।
हरिहरौ नतिरस्तु सदापि वां
कुरुतमिष्टमनिष्टहनौ [2] शिवौ ॥ ७० ॥

पदसरोजविनिर्गतगङ्ग ते
नतिरियं प्रणतार्तिविभञ्जन ।
हर [3] जटापटलीगसरिद्धर
नतिरियं जितकाल नमो नमः ॥ ७१ ॥

---

[1] अ. च । [2] अ. हरौ शिवम् ।
[3] का. परिलीढ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृवनाधिनिवास नमोऽस्तु ते
[1]बदरिकावनवास नमोऽस्तु ते ।
जलनिधिप्रिय देव नमोऽस्तु ते
गिरिवरप्रिय देव नमोऽस्तु ते ॥ ७२ ॥

[2]मुनिगणैः स्तुवतस्सह शङ्करः
सुरगणानवद [3]त्किमिहागमम् ।
वदत कार्यमसंशयमाशु मे
बहुसमागमनं सनिमित्तकम् ॥ ७३ ॥

गुरुरुवाच सुरेन्द्रमतानुगः
पशुपते यदपृच्छदुदारधीः ।
तदिदमत्रभवन् मम मोहनं
विदितसर्वतया [4]विदितं नु ते ॥ ७४ ॥

[5]निवसता भवतेह [6]समुत्थितं
विदितमेव [7]ततो न निगूहनम् ।
व्यसननिर्गमकारणमुच्यतां
न भवतोऽन्य इदं व्यपनेष्यति ॥ ७५ ॥

निगदिते गुरुणेति शिवोऽब्रवती-
द्विदितकार्यविधित्सुरविक्लबम्[8]
परिहराणि भयं शिशुकारितं
न हि भयं भवतां मयि पालके ॥ ७६ ॥

[9]मुनिसुतं तपसो विनिवर्त्य तं
व्यसनतो भवतो विनिवर्तये ।
[10]न च भयं शिशुतोऽस्ति तपस्यतः
व्रजत धाम यथागतमेव तत् ॥ ७७ ॥

---

[1] अ० पद ।
[2] अ० मुनिजने स्तुतवत्यथ ।; का० मुनिजनैः ।
[3] अ० आगमन् ।; का० आगतम् ।
[4] क विदितं न ते ।
[5] क० इह सदा ।; का० इह सता भव तेन ।
[6] क० समुज्झितं ।
[7] का० ततोऽपि ।
[8] अ० रवीश्वरम् ।
[9] अ० मुनिशिशुं ।
[10] अ० हि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतवति प्रणिपत्य सुराधिप-
प्रमुखदेवगणे गिरिशं गिरिः ।
पशुपतिर्निरगान्मुनिबालकं
सतपसं तपसो विनिवर्तयन् ॥ ७८ ॥

[1] अभिसरद्वृषभेण हरोऽभवत्
सुरपतिर्वृषभोऽपि [2] चतूरदः ।
गजपतिर्गिरिजापि शची तदा
विविदिषुर्मनसा [3] स्थिरतां शिशोः ॥ ७९ ॥

[4] अपगणस्सरतामभिजग्मिवान्
गणपति [5] र्नलकूबरतां गतः ।
रसमुखोऽपि जयन्तवपुर्धरो
ऽजनि [6] वधूजनिता [7] सुरवल्लभाः ॥ ८० ॥

अजगवं कुलिशाकृति सद्बभौ
शशिकलां सुमनश्चयरूपिणी ।
आहितति: किल भूषणतां गता
[8] नठनटीचरितं [9] सकलो विभुः ॥ ८१ ॥

उपशिशु स्थितवान् स शचीपतिः
न च विवेद समाधिगतोऽर्भकः ।
शिशुमुखं शनकैरवलोकयन्
स च तुतोष [10] हरिः करुणानिधिः ॥ ८२ ॥

न च बुबोध यदा शिशुरग्रतः
स्थितमबूबुधदुत्थितबृह्मितैः ।
नयनवारिरुहं शिशुभानुमान्
किमिदमित्युदमीलयदेकदा ॥ ८३ ॥

---

[1] अ. अभिसरन् ।
[2] क. च दूरतः ।; का. चरन्मदः ।
[3] अ. मनसः ।
[4] अ. अपि गणः सुरतां ।
[5] का. नलकेश्वरतां ।
[6] का. वधूर्जनिता ।
[7] अ. सुरवल्लभः ।
[8] अ. नदनदी ।
[9] का. सकलं ।
[10] क. हरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न गणयन् पुनरेव समाधिभाग-
भवदुग्रतपा मुनिबालकः ।
अभिजगाम सुविस्मयमुद्धतां
शिशुमनःस्थिरतामुपलभ्य सः ॥ ८४ ॥

शिशुमवोचत वृत्ररिपुर्वचः
क्व च तपस्सुकुमारमिदं वपुः ।
क्व च वयस्तव [1] पञ्चसमान्मितं
क्व च तवेथमनल्पविगागिता [2] ॥ ८५ ॥

वपुषि वत्स गते किमु [3] लप्स्यते
सति हि तत्र पुमर्थगतिर्भवेत् ।
व्रज सुखं त्यज दुःखतरव्रतं [4]
तनुदहा तपसा तव किं फलम् ॥ ८६ ॥

यदि सुखं तव लिप्सितमेहि भो
मम पदं सुरवर्यनमस्कृतम् ।
यदिह [5] वित्तगता वितराणि ते
किमु फलं [6] तनुशोषणकर्मणा ॥ ८७ ॥

उपवनेषु वनेषु सुखेषु मे
विहर मत्तनयैस्सह [7] सुव्रत ।
सुरभिपुष्परजस्सुसमीरण-
प्रकटसौरभयोगसुगन्धिषु ॥ ८८ ॥

---

[1] क. शरन्मितं ।
[2] अ. विरागता ।
[3] अ. लभ्यते ।
[4] अ. तरं ।
[5] अ. हतं ।; का. विश्वसुखं ।; क. शतं ।
[6] का. तव शोषण ।
[7] का. संवृतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि च भौमतले तव [1]वा स्पृहा
सुलभमद्य [2]ददामि वदाशु तत् ।
यदि बिभेषि [3]सुदुस्सहशात्रवात्
तदपि हन्मि शिशो न विचारणा ॥ ८९ ॥

यदिह कर्म न शर्मण आत्मनो
न च परस्य सुखाय कथञ्चन ।
[4]विधिसदो न वदन्ति पुरातना-
स्तव च तादृशमेव समीक्ष्यते ॥ ९० ॥

[5]यदिह पक्ष्मकवाटमिदं द्वयं
नयनयोर्विवृतं कुरू बालक ।
हरिहयोऽस्मि विलोकय मे वधू-
रियमयं गजपश्शुभदर्शनः ॥ ९१ ॥

न च विहन्तु [6]मिमं तव आगमं
तव शिशुत्वमुदीक्ष्य कृपाभरात् ।
अपि विधातुमिदं सफलं तपो
वद तपो यदि ते [7]फलवर्जनम् ॥ ९२ ॥

तव शरीरसमुत्थिततेजसा
जगदिदं परितापमुपैति भोः ।
जगदनिष्टफलाऽविहितक्रिया
मुनिजनः [8]परतापहरो मतः ॥ ९३ ॥

शिशुरथो नयने उदमीलयत्
सुरवरान् समुदैक्षत [9]विस्मितः ।
अपि जगाद वचस्सुरनायकं
मम तपस्सफलं तव तेन किम् ॥ ९४ ॥

---

[1] अ. च । [2] क. ददानि ।
[3] अ. दुर्जय । [4] अ. पदं ।
[5] अ, घटित । [6] अ. इदं तप ।
[7] क. वर्धनम् । [8] अ. परि ।
[9] का. सस्मितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिहय स्पृहयामि न शर्मणे
यदिह कर्म जनैरुपलाल्यते ।
न भवतोऽस्ति मनागपि मद्भयं
व्रज सुखं दिवमेव यथासुखम् ॥ ९५ ॥

नरसुखात् किमु [1] भेदकमिष्यते
सुरसुखस्य कृतत्वसमत्वतः ।
जनिमतोऽध्रुवता ध्रुवभाविनी
दिनविशेषकृतोऽतिशयस्तयोः ॥ ९६ ॥

मनुजदेवगणेषु जनिर्मिता
जनिमतो मरणञ्च समाहृतम् ।
किमु पदैर्मितकालसिता [2] ध्रुवैः
हरिविरिञ्चपदैरुपलालितैः ॥ ९७ ॥

मरणजन्मकथोत्थित [3] मत्र यत्
[4] तदभिवाद्यमनश्वरमक्षरम् ।
[5] यदुदिता जनता न हि पीड्यते
मरणजन्मजरादिभिरुल्बणैः ॥ ९८ ॥

तपसि भक्तिमतो विजनस्थितिः [6]
बहुजनैस्सह सङ्गमतो वरा ।
न हि समस्त्यविघातपरम्परा
परिजनैर्भगवानुपहन्ति माम् ॥ ९९ ॥

यदि न यासि हरे बहुसङ्गत-
स्तपसि विघ्नकरो यदि वर्तसे ।
परममस्त्रमिदं त्वयि निक्षिपे
परिजनैस्सहसा न भविष्यसि ॥ १०० ॥

---

[1] अ॰ भेदक ईक्ष्यते भेदग इष्यते ।
[2] अ. सित [षोऽन्तकर्मणीतिधातोःक्तान्तं रूपम्] क. कालतयाऽध्रुवैः का. भवा ।
[3] अ. कथोज्झितं ।
[4] अ. तदभिवाञ्छ्य ।
[5] अ. यदु गता ; का. यदि गता ।
[6] अ. स्थता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति समीरयति स्थिरबालके
कपटवेषमपास्य निजं वपुः ।
सह गणैश्शिवया च समाददे
नयनगोचरताश्च शिशोरगात् ॥ १०१ ॥

शिशुरपूर्वजनोदयदर्शनात्
जडिमपात्रमभू[1] दतिविस्मितः ।
प्रणिपतानि पदानि किमष्यमु
शिरिंसि वा निदधानि पदाम्बुजम् ॥ १०२ ॥

[2] मुनिशिशोर्जडिमानमवेक्ष्य तं
हरसमीपगतेन स नन्दिना ।
मुनिसुतेहि न सङ्गममादृथाः
प्रणिपतेश्वरपादसरोरुहम् ॥ ११३ ॥

इति समीरित एव शिशुः क्षणात्
प्रणिपपात तदीयपदाम्बुजम् ।
स्नपयति स्म सुखाक्षिजलैर्वपुः
न च शशाक शिशुः परिभाषितुम् ॥ १०४ ॥

प्रणिपतन्तमुवाच सदाशिवो
मुनिसुतेहि ममाङ्क इहास्स्व भोः ।
परिक्लशोऽसि तपःपरि[3] पालनात्
यदभिवाञ्छितमद्य ददामि ते ॥ १०५ ॥

मम वधूर्गिरिजा [4] त्वथ मोदते
सुतधियन्त्वधि[5] कां तमिहेच्छति ।
मम सुतत्रयमद्य पुराजनि
स्फुटमुभौ तनयावधुनैककः ॥ १०६ ॥

---

[1] क. दिति ।
[2] अ मुनिसुतैहि न सम्भ्रमादृथा ।
[3] अ. परिशीलनात् ।
[4] अ. त्वयि ।
[5] अ. त्वयि कर्तुमिह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति शिवेन वचस्समुदीरितः
प्रतिजगाद वचः परितोषयन् ।
स्तिमितनेत्रयुगेन [1] शिवं पिबन्
पुलकपुष्पितगात्रलतश्शिशुः ॥ १०७ ॥

सुतहितं वदितुं पितरौ युवां
अधिकृतौ न सुतोऽर्हति भाषितुम् ।
अहमिदन्तु वृणे परमार्थत-
स्तव पदाम्बुजभक्तिमनश्वराम् ॥ १०८ ॥

इति निशम्य वचः परमेश्वरो
मुनिसुतं निजमङ्कमजीगमत् ।
मुनिसुतस्य मुखं परिजिघ्रवान् [2]
[3] भवभयाच्च बहिर्निरगान्मुनिः ॥ १०९ ॥

मुनिपुराचरितन्त्व [4] वदाच्छिवः
प्रमुदितोदितदुग्धमहार्णवम् ।
मुनिसुताय युताय [5] विधाय तं
[6] मुनिगदुर्दशतापि तिरोदधे ॥ ११० ॥

गिरिसुतापि [7] निजाङ्कमनीनयत्
मुनिसुतं प्रददौ स्तनजं पयः ।
मम सुतोऽसि निजस्त्वमतः परं
विहर तात यथासुखमूचिषी ॥ १११ ॥

[8] अपि शिशो [9] विदितोऽसि महागमा-
न्ममं षडाननपद्मविनिर्गतान् ।
सकलवर्गनिदानविबोधना-[10]
न्गुरुकृपासुलभान् भवदाहिनः ॥ ११२ ॥

---

[1] अ. शिवौ ।
[2] का. जिघ्रिवान् ।
[3] अ. भवभयं निरगाच्च बहिर्मुनेः ।
[4] क. विदञ्छिवः ।
[5] अ. धुताघचयाय ।
[6] का. मुनिवपुर्दधतेव तिरोदधे ।
[7] का. मुपानयत् ।
[8] अ. अयि ।
[9] का. विदिता ।
[10] अ. विबोधकान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपससार महापयसां निधिः
पशुपतेरनुशासनतश्शिशोः ।
झटिति विश्वसनं जनयन् ध्रुवन्[1]
निबिडशारदचन्द्रिकया समः ॥ ११३ ॥

विविधपुष्पफलास्सुरपादपा-
श्शिशुमुपासितुमागुरनुत्तमाः ।
मृदुगतिश्श्वना[2] धुतपल्लवाः
सुखदपाक्षिनिकायनिकूजिताः ॥ ११४ ॥

स्मरति यच्छिशुरस्य पुरः पुरा
पतति तन्मनसोऽपि विकल्पना ।
शिशुरुवाच महागुणसंहति-
[3]मुनिजनैर्विबुधैरपि दुर्लभा ॥ ११५ ॥

इति महागुणसिद्धिमवाप्य [4]स-
च्छिवशिवानुमतेन गृहं ययौ ।
प्रणिपपात स [5]मातृपदाम्बुज
शिशुमुदीक्ष्य [6]मुमोद जनन्यपि ॥ ११६ ॥

व्यासाचलेन रचिते मधुरेऽनवद्ये
काव्ये ययौ द्रुतविलम्बितवांस्तृतीयः ।
सर्गो निसर्गविमलः परमोपमन्यु-
[7]माहात्म्यभाषणपरः [8]कथया हि मोदी ॥ ११७ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
तृतीयस्सर्गः ॥

---

[1] अ. स्फुटम् ।
[2] का. नायुधपल्लवाः ।
[3] अ. गणैः ।
[4] अ. सन् ।
[5] का पदाम्बुजम् ।
[6] अ. तुषोष ।
[7] क. पदः ।
[8] अ. कथयाभिमोदी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चतुर्थस्सर्गः ।

एवं फलप्रद[1]मुनीश्वरमीश्वराणा-
मीशं [2]भजाव किमितस्सकलार्थसिद्ध्यै ।
तत्रोपमन्युमहिमा परमं प्रमाणं
नो देवतासु जडिमा जडिमा मनुष्ये ॥ १ ॥

एवं कलत्रवचनं स निशम्य [3]भक्त्या
सम्पूजनाय गिरिशस्य मनो दधार ।
सा तस्य दुश्चरतपश्चरणोद्यतस्य
तत्रानुकूल्यमकरोद्गृहवाटिकायाम् ॥ २ ॥

तस्योपधाम किल सन्निहितापगैका
स्नात्वा सदाशिवमुपास्त जले स तस्याः ।
कन्दाशनः कतिचिदेव दिनानि पूर्वं
पश्चात्तदाऽऽस शिवपादयुगाब्जभृङ्गः ॥ ३ ॥

जायापि तस्य विमला नियमोपतापै-
श्छिक्लेश कायमनिशं शिवमर्चयन्ती ।
क्षेत्रे वृषस्य निवसन्तमलं सुतार्थं
कालोऽत्यगाददति[4] तयोस्तपतोरनेकः ॥ ४ ॥

देवः कृपापरवशो द्विजवेषधारी
प्रत्यक्षतश्शिवगुरुं गत आत्तनिद्रम् ।
प्रोवाच भोः किमभिवाञ्छसि किं तपस्ते
पुत्रार्थितेति वचनं स जगाद विप्रः ॥ ५ ॥

---

[1] अ. मपीश्वर ।
[2] क. भजाव कमितः ।; का. भवाय किमतः ।
[3] अ. कर्ता ।; का. भर्ता ।
[4] अ. °दिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवोऽप्यपृच्छदथ तं द्विजसिद्ध सत्यं
सर्वज्ञमेकमपि सर्वगुणोपपन्नम् ।
पुत्रं ददान्यथ बहून् विपरीतकांस्ते
भूर्यायुषस्तनु [1]गुणानवदाद्द्विजेशः ॥ ६ ॥

पुत्रोऽस्तु मे बहुगुणः प्रथितानुभावः
सर्वज्ञतापदमितीरित आबभाषे ।
दद्यामुदीरितपदं तनयं तपो मा
पूर्णो भविष्यसि गृहं द्विज गच्छ दारैः ॥ ७ ॥

आकर्णयन्निति बुबोध स विप्रवर्य-
स्तश्चाब्रवीन्निजकलत्रमनिन्दितात्मा ।
स्वप्नं शशंस [2]वनितामणिरस्य भार्या
सत्यं भविष्यति तु नौ तनयो महात्मा ॥ ८ ॥

तौ दम्पती शिवपरौ नियतौ स्मरन्तौ
स्वप्नेक्षितं गृहगतौ बहुदक्षिणान्नैः ।
सन्तर्प्य विप्रनिकरं तदुदीरिताभि-
राशीर्भिरापतुरनल्पमुदं विशुद्धौ ॥ ९ ॥

तस्मिन्दिने शिवगुरोरुपयोक्ष्यमाणे
भक्ते प्रविष्टमभवत्किल शैवतेजः ।
भुक्तान्नविप्रवचनादुपयुज्य[3] शेषं
सोऽभुङ्क्त सापि निजभर्तृपदाब्जभृङ्गी ॥ १० ॥

गर्भं दधार शिवगर्भमसौ मृगाक्षी
गर्भोऽप्यवर्धत शनैरभवच्छरीरम् ।
[4] तेजोविशेषविनिपातितदृष्टिपातं
विश्वं रवेर्दिवसमध्य इवोग्रतेजः ॥ ११ ॥

---

[1] का. गुणान्वद तद्द्विजेश ।   [2] का. मुदितास्य ।
[3] अ. उपयुक्तशेषं ।
[4] अ. तेजोऽतिरेकविनिवारित ।; का. तेजोऽतिरेकविनिवर्तित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्भालसा [1] गतवती गतिमान्द्यमीष-
[2] दापेति नाद्भुतमिदं धरते शिवं या ।
यो विष्टपानि बिभृते हि चतुर्दशापि
यस्यापि मूर्तय इमा वसुधाजलाद्याः ॥ १२ ॥

संव्याप्तवानपि शरीरमशेषमेव
[3] नोपास्थिमाविरसकामकृतात्र [4] काश्चित् ।
यत्पूर्वमेव महसा दुरतिक्रमेण
व्याप्तं शरीरमदसीयममुष्य हेतोः ॥ १३ ॥

रम्याणि गन्धकुसुमान्यपि गर्धमस्यै
नाधातुमैशत [5] भरान्त् किमु भूषणानि ।
यद्यद्गुरुत्वपदमस्ति पदार्थजातं
[6] तत्ताद्विधारणविधावलपा बभूव ॥ १४ ॥

तां दौहृदं भृशमबाधत [7] दुश्शरारिः
[8] प्रेतः परः किल न मुञ्चति [9] मुञ्चतेऽपि [?] ।
[10] आनीय दुर्लभमपोह्यति याचतेऽन्यत्
[11] तद्वाप्यपोह्य पुनरर्दति सान्यवस्तु ॥ १५ ॥

तां बन्धुतागमदुपाश्रितदोहदार्ति-
मादाय दुर्लभमनर्घ्यम [12] पूर्ववस्तु ।
आस्वाद्य बन्धुजनदत्तमसौ जहर्ष
हा हन्त गर्भधरणं खलु दुःखहेतुः ॥ १६ ॥

---

[1] अ. भगवती ।
[2] का. दाप्नोति ।
[3] अ. वा ।; क. स्थिताविरस ।; का पास्थिमासुरधिकात्र ।
[4] अ. काञ्चित् ।
[5] का. पुनः ।
[6] क. कतत्तद्धि धारण ।
[7] अ. दुःशठारिः ।
[8] अ. प्रातः ।; का. पूतः ।
[9] का. ऽस्ति ।
[10] अ. आनींत ।
[11] का तच्चाप्यवाप्य
[12] का. पूपवस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्ष्णा निसर्गधवलेन महीयसा [1]सा
चात्मानमैक्षत समूढमुपात्तनिद्रा ।
सङ्गीयमानमपि गीतविशारदाद्यै-
र्विद्याधरप्रभृतिभिर्विनयोपयातैः ॥ १७ ॥

[2]आकर्णयन् जय जयेति वरं दधाना
रक्षेतिशब्दमवलोकय मादृशेति ।
[3]आकर्ण्य नोत्थितवती पुनरुक्तशब्दं
सा विस्मिता किल शृणोति निरीक्षमाणा? ॥ १८ ॥

मानुष्यधर्ममनुसृत्य मयैतदुक्तं
काऽपि व्यथा शिवमहोधरणेन वध्वाः ।
सर्वव्यथाव्यतिकरं [4]प्रतिकर्तुकामाः
देवं भजन्त इति तत्त्वविदां प्रवादः ॥ १९ ।

लग्ने शुभे शुभयुते सुषुवे कुमारं
श्रीपार्वतीव सुखिनी शुभवीक्षिते च ।
जाया सती शिवगुरोर्निजतुङ्गसंस्थे
सूर्ये कुजे रविसुते च गुरौ च केन्द्रे ॥ २० ॥

दृष्ट्वा सुतं शिवगुरुः शिववारिराशौ
मग्नोऽपि धर्ममनुसृत्य जले न्यमाङ्क्षीत् ।
[5]व्यश्राणयत् बहुधनं वसुधाश्च गाश्च
जन्मोक्तकर्म विदधे द्विजपुङ्गवेभ्यः ॥ २१ ॥

तस्मिन्दिने मृगतरक्षुकरीन्द्रसिंह-
सर्पाखुमुख्यबहुजन्तुगणा द्विषन्तः ।
वैरं विहाय सह चेरुरतीव हृष्टाः
कण्डूमपाकृषत साधु मिथो निघृष्टाः ॥ २२ ॥

---

[1] अ. असावात्मान ।
[2] अ. आकर्णयत् ।
[3] अ. आकर्णितोत्थितवती ।
[4] अ. परिहर्तुं ।
[5] का. विश्राणयन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृक्षा लताः कुसुमराशिफलान्यमुञ्चन्
नद्यः प्रसन्नसलिला निखिलास्तदैव ।
जाता जहुर्जलधयोऽपि निजं विकारं
भूभृद्गणादपि जलं सहसोत्पपात ॥ २३ ॥

[1] अद्वैतवादिविपरीतमतावलम्बि-
[2] हस्ताग्रवर्तिवरपुस्तकमप्यकस्मात् ।
उच्चैः पपात जहसुः श्रुतिमस्तकानि
श्रीव्यासचित्तकमलं विकचीबभूव ॥ २४ ॥

सत्कारपूर्वमनुयुक्तमुहूर्तवेदि-
विप्राश्शशंसुरभिवीक्ष्य सुतस्य जन्म ।
सर्वज्ञ [3] एष भविता रचयिष्यते च
शास्त्रं स्वतन्त्रमथ [4] वागधिपांश्च जेता ॥ २५ ॥

कीर्तिं स्वकां भुवि विधास्यति यावदेष
किं [5] वोदितेन बहुना शिशुरेष पूर्णः ।
[6] नापृच्छि जीवितमनेन च तैर्न चोक्तं
प्रयो विदन्नपि न वक्ति मनोनिरोधि ॥ २६ ॥

तज्ज्ञातिबन्धुसुहृदिष्टजनाङ्गनास्ता-
स्तं सूतिकागृहनिविष्टमथो निदध्युः ।
सोपायनास्तमभिवीक्ष्य यथा निदाघे
चन्द्रं मुदं ययुरतीव सरोजवक्त्रम् ॥ २७ ॥

[7] तत्सूतिकागृहमवेक्ष्य तनुप्रदीपं
तत्तेजसा यदवभातमभूत् क्षपायाम् ।
आश्चर्यमेतदजनिष्ट समस्तजन्तो-
स्तन्मन्दिरं वितिमिरं यदभूददीपम् ॥ २८ ॥

---

[1] अ. वाद । [2] क. पर ।
[3] का. एव । [4] का. वागधिपां च ।
[5] अ. चोदितेन । [6] का. पृष्टं न ।
[7] अ. अवैक्षत न प्रदीपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्पश्यतां शिशुरसौ कुरुते शमग्र्यं
तेनाकृतास्य जनकः किल शङ्कराख्याम् ।
यद्वा चिराय किल शङ्करसम्प्रसादात्
जातस्ततो व्यधित शङ्करनामधेयम् ॥ २९ ॥

सर्वं विदन् सकलशक्तियुतोऽपि बालो
मानुष्य [1]जातिमनुकृत्य चचार तद्वत् ।
बालश्शनैर्हसितुमारभत क्रमेण
[2]सृप्तुं शशाक गमनाय पदाम्बुजाभ्याम् ॥ ३० ॥

भाषामवेत्प्रथमहायन एव बालः
वर्णान्पपाठ किल हायनके द्वितीये ।
ग्रस्ताक्षराण्यपि स वाचयितुं प्रगल्भः
काव्यं पुराणमितिहासकथाः पपाठ ॥ ३१ ॥

कर्माणि तस्य जनकः [3]श्रुतिचोदितानि
कुर्वञ्जरन्नपि तुतोष सुतेन्द्रदृश्वा ।
तं [4]पञ्चमाब्द उपनेतुमनास्स एव
पञ्चत्वमाप दुरतिक्रम [5]एष कालः ॥ ३२ ॥

आलोक्य वल्लभमृतिं करुणं सबाला
वृद्धा रुरोद विललाप च भर्तृशोकात् ।
हा हन्त नाथ शिशुमध्वनि [6]मुञ्चमानः
गन्तुं क्व वा समभिवाञ्छसि देहि वाचम् ॥ ३३ ॥

कृच्छ्रेण लब्धशिशुरेष चिरं स जीवेत्
मावाथयान्तमनुयामि भवन्तमद्य ।
बालं विमुच्य जरतीमपि मां प्रियाद्य
यातस्य किं [7]नु सफलं वद देहि दृष्टिम् ॥ ३४ ॥

---

[1] अ. मनुसृत्य । [2] का. सृतुं ।
[3] अ. बोधितानि । [4] अ. मुपनेतुं ।
[5] का. एव । [6] का. मां च मुक्त्वा ।
[7] अ. किं तव फलं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां बन्धुताऽभ्यधित कालवशं प्रयान्तीं
सन्तोऽपि कालमतिलङ्घयितुं न तेऽपि ।
शक्तास्ततो जरति बालमिमं निसर्गात्
प्राज्ञं प्रपाहि कुरु संस्कृतिमस्य शीघ्रम् ॥ ३५ ॥

कश्चिन्मृतिं व्रजति कश्चन जायतेऽस्मि-
न्संसारमार्ग इति कल्पितकल्पनेयम् ।
तस्मान्न शोच्यमनघ गृहरक्षिका स्या
बालेन साकमधुना त्यज शोकमेनम् ॥ ३६ ॥

एवं स्वबन्धुगादिता[1] स्वयमुत्ससर्ज
संस्कारमात्मकमितुः श्रुतिदृष्टमार्गात् ।
साचीकरत्सतनया स्वहितैस्सपिण्डैः
[2]श्राद्धादि कर्म च सदीक्षमनुक्रमेण ॥ ३७ ॥

दीक्षां समाप्य विधिवत्किल पञ्चमाब्दे
[3]सौम्ये मुहूर्त उपनीतिमचीकरत्सा ।
बालस्य गृह्यविधिनो श्रुतिषु प्रवीणैः
स्वैर्ब्राह्मणानपि ततर्प विचित्रभोज्यैः ॥ ३८ ॥

स ब्रह्मचर्यमनुरुध्य निजं स्ववेद-
मध्यैष्ट वेदमपरं तदनु क्रमेण ।
एवं गुरोः पठितवांश्चतुरोऽपि वेदान्
तन्मूलमस्य कथयन्ति यजुस्समाख्यम् ॥ ३९ ॥

माता क्रमेण जरती व्यटितुं न शक्ता
स्नानादि कर्म न विमुञ्चति सा तथापि ।
ईषद्विदूरगनदीं किल शङ्करोऽसा-
वात्मीयमन्दिरसमीपगतां व्यधत्त ॥ ४० ॥

---

[1] अ. कथिता । [2] अ. सम्यङ् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्यापि केरलजनास्समुदीरयन्ति
स्रोतस्विनीं बहुजवां विधुताघपुञ्जाम् ।
अम्बापगेति [1] यदियं तनयेन मातु-
स्सौख्यार्थमात्मनिलयान्तिकगा [2] व्यधत्त ॥ ४१ ॥

सा शङ्करस्य शरणं स च तज्जनन्या
अन्योन्ययोगविरहस्त्वनयोरसह्यः ।
नोद्वोढमिच्छति तथाप्यमनुष्यभावा-
न्मेरुं गतः किमभिवाञ्छति दुष्प्रदेशम् ॥ ४२ ॥

प्रातश्च सायमपि मज्जनमत्र बालो
नादेयवारिणि करोति स सर्वकालम् ।
स त्वेकदा जलमगाहत मङ्क्तुकाम-
स्तञ्चाग्रहीज्जलचरः किल तीक्ष्णदंष्ट्रः ॥ ४३ ॥

भक्तोऽपि मातरि स संन्यसनं [3] चिकीर्षन्
स्रोतस्विनीजलगनक्रगृहीतमाख्यत् ।
आत्मानमक्षततनुं जननीति शोचन्
साप्यागता परवशा स्थितदेहमात्रा ॥ ४४ ॥

साऽब्रूत किं सुत विरोदिषि सोऽभ्यधात्तां
नक्रोऽम्ब मां नयति तीव्रतनुर्बलाढ्यः ।
प्रणान्विधारयितुमुत्सह एव नाद्य
सन्न्यासवेषकरणे मम जीवितं स्यात् ॥ ४५ ॥

सन्यासमेकतनया तनयं कथञ्चि-
न्नो कारयेत [4] जननी तदपीह माता ।
सर्वात्मना नशनतो न्यसनं वरं मे
तस्मिंस्तु लोचनयुगे न हि दर्शनं स्यात् ॥ ४६ ॥

---

[1] अ. यदिमां तनयः स्वमातुः ।
[2] अ. कगां ।
[3] अ. चिकीर्षुः ।
[4] का. जगतीह न कापि माता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आलोच्य सा तनयसन्न्यसनाय बुद्धिं
चक्रे ततोऽभ्याधित सन्न्यसनं कुरुष्व ।
सन्यस्तमित्यभिदधौ वचनं तदानीं
नद्यास्तटं सुखमवाप स नक्रमुक्तः ॥ ४७ ॥

उक्त्वा मुमूर्छ जननी पतिता क्षितौ सा
तां चाभिषिच्य पयसा समजीवयत्सः ।
प्रोवाच मा जननि शोकवशं गता भू
वक्ष्याम्युपायमनघे तव रक्षणाय ॥ ४८ ॥

मातर्विधेयमनुशाधि यदत्र कार्यं
संन्या[1]सिना तदु करोमि न [2]सन्दिहेऽहम ।
वस्त्राशने तव यथेष्टममी प्रदद्यु-
र्गृह्णन्ति ये धनमिदं मम पैतृकं यत् ॥ ४९ ॥

देहेऽम्ब रोगवशगे च सनाभयो मे
द्रक्ष्यन्ति शक्तिमनुसृत्य मृतिप्रसङ्गे ।
अर्थग्रहाज्जनभयाच्च यथाविधानं
कुर्युश्च संस्कृतिममी [3]न च भेयमीषत् ॥ ५० ॥

यज्जीवितं जलचरस्य मुखात्तदिष्टं
संन्यास[4]सङ्गरवशान्मम [5]देहपाके ।
संस्कारमेत्य विधिवत्कुरु शङ्कर त्वं
नो चेत्प्रसूय मम किं फलमीरय त्वम् ॥ ५१ ॥

अह्न्यम्ब रात्रिसमये समयान्तरे वा
सञ्चिन्तय स्ववशगाऽवशगाऽथवा माम ।
एष्यामि तत्र समये सकलं विहाय
विश्वासमाप्नुहि मृतावपि संस्करिष्ये ॥ ५२ ॥

---

[1] अ. संन्यासिनां ।
[2] अ. संशयीऽत्र ।
[3] अ. नविमेयमीषत् ।
[4] अ. सङ्कर ।
[5] अ. पाते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संन्यस्तवान् शिशुरयं विधवामनाथां
क्षिप्त्वेति मां पथि कदापि न चिन्तनीयम् ।
यावन्मया स्थितवता फलमापनीयं
मातस्ततश्शतगुणं फलमापयिष्ये ॥ ९३ ॥

इत्थं स मातरमनुग्रहणेच्छुरुक्त्वा
प्रोचे सनाभिजनमेष विचक्षणाग्र्यः ।
संन्यासकल्पितमना व्रजितास्मि दूरं
तां निक्षिपामि जननीमधुना भवत्सु ॥ ९४ ॥

एवं सनाभिजनमुत्तममुत्तमाग्र्यः
श्रीमातृकार्यमभिभाष्य करद्वयेन ।
संप्रार्थ्य तां स्वजननीं विनयेन तेषु
निक्षिप्तवान् [1] स नयनाम्बु विमुञ्चमानाम् ॥ ९५ ॥

आत्मीयमन्दिरगतां[2] भयदामसौ यत्
चक्रे विदूरगनदीं जननीहिताय ।
तत्तीरसंश्रितयदूद्वहधाम किञ्चित्
सा निम्नगाऽऽरभत ताडयितुं तरङ्गैः ॥ ९६ ॥

वर्षासु वर्षति हरौ जलमेत्य किञ्चि-
दन्तः पुरं भगवतोऽपनुनोद मृत्स्ना ।
आरब्धमूर्तिरनघश्चलितुं क्रमेण
[3]देवो बिभेदिव न मुञ्चति भीर्हि साङ्गम् ॥ ९७ ॥

प्रस्थातुकामम [4] नसं भगवाननङ्ग-
वाचावदत्कथमपि प्रणि [5] पत्य मातुः ।
पादारविन्दयुगलं परिगृह्य चाज्ञां
श्रीशङ्करं जनहितैक [6] रतं स कृष्णः ॥ ९८ ॥

---

[1] अ. नयनजाम्बु ।
[2] अ. समीपगतां यदासौ
[3] का. देवेऽविभेदिव ।
[4] अ. अनघं ।
[5] अ. प्रतिपत्य ।
[6] अ. रसं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनेष्ट दूरगनदीं कृपया भवान्यां
सा मातिमात्रमनिशं बृहुलोर्मिहस्तैः ।
क्लिश्नाति ताडनपरा वद कोऽभ्युपायो
वस्तुं [1]क्षमो न नितरां द्विजपुत्र यासि ॥ ५९ ॥

आकर्ण्य वाचमिति तामतनु गुरुर्नः
प्रोद्धृत्य कृष्णमचलं शनकैर्भुजाभ्याम् ।
प्रातिष्ठिपन्निकट एव स यत्र बाधा
नाभ्येत्युदीर्य सुखमास्स्व चिरायुरेधि ॥ ६० ॥

तस्मात्स्वमातुरपि भक्तिवशादनुज्ञा-
मादाय [2]संसृतिमहाब्धिविरक्तिभाक् सः ।
गन्तुं मनो व्यधित संन्यसनाय दूरं
किं नौस्थितः पतितुमिच्छति वारिराशौ ॥ ६१ ॥

[3]प्रायाद्गृहात्स्थिरमना मुदितोऽप्रकम्प्य-
स्तुर्याश्रमे कृतमनाः किल दूरदेशम् ।
गोविन्दनाथमुनिमेत्य महानुभाव
संन्यासगृह्यविधिना विरजन् भवेऽस्मिन् ॥ ६२ ॥

व्यासः पराशरसुतः किल सत्यवत्यां
तस्यात्मजश्शुकमुनिः प्रथितानुभावः ।
तच्छिष्यतामुपगतः किल गौडपादो
गोविन्दनाथमुनिरस्य च शिष्यभूतः ॥ ६३ ॥

शुश्राव तस्य निकटे किल शास्त्रजालं
यश्चाशृणोद्भुजगसद्मगतस्त्वनन्तात् ।
शब्दाम्बुराशिमखिलं समयं विधाय
यश्चाखिलानि भुवनानि बिभर्ति मूर्ध्ना ॥ ६४ ॥

[1] क. क्षमे न । [2] अ. विरक्तिमान् सः ।
[3] अ. गत्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीशङ्करोऽष्टमसमश्चतुरोऽपि वेदान्
स द्वादशे सकलशास्त्रकलामवाप ।
संव्याप देशनिचयं निगमप्रसून-
सच्छास्त्रसद्विटपकोऽमितशाकपूर्णः[1] ॥ ३५ ॥

तीर्थानि सेवितुमनास्स [2] ययावुदीचीं
काष्ठां क्षणेन बदरीं [3] मुनिसङ्घजुष्टाम् ।
संप्राप तत्र च दिनानि बहून्यवात्सी-
द्विद्वज्जनैर्बहुविधैरुपसेव्यमानः ॥ ६६ ॥

श्रीशङ्कराचार्यगभस्तिमाली
श्रीव्याससूत्राम्बुजकुड्मलानि ।
वेदान्तकासारसमुद्भवानि
[3] प्राबूबुधद्भ्रमद्मधुव्रतानि ॥ ६७ ॥

श्रीशङ्कराचार्यरवावुदेत्य
प्रकाशमाने कुमतिप्रणीताः ।
[5] व्याख्यान्धकाराः प्रलयं समीयु-
र्दुर्वादिचन्द्राः प्रभया वियुक्ताः ॥ ६८ ॥

श्रीशङ्कराचार्य दिवाकरेण
प्रकाशितास्सूत्रपयोजषण्डाः ।
बभौतरां व्यासमुनिस्तटाको
वेदान्त [5] विद्यो विनिगूढवर्यः ॥ ६९ ।

आत्मीयसूत्रनिकरस्य [6] निबद्धभाष्यं
श्रुत्वा पराशरसुतो मुनिराजगाम ।
दृष्ट्वा मिथो [8] ऽप्यतनुतामुचितां सपर्यां
तं स्माह शङ्करमुनिर्मुदितो यतीन्द्रः ॥ ७० ॥

---

[1] अ. शङ्करेद्रुः ।
[2] अ. ययावुदीचीकाष्ठां क्रमेण ।; का. यथा-प्रतीचो काष्ठां क्रमेण ।
[3] अ. वृन्द ।
[4] अ. प्राबोधयत् ।
[5] अ. व्याख्याप्रकाराः ।
[6] अ. वेद्यो ।; का. देहोऽपि निगूढचर्यः ।
[7] अ. निबन्ध ।
[8] अ. व्यतनुतां ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैपायन स्वागतमस्तु तुभ्यं
दृष्ट्वा भवन्तं [1]त्वरितो मयार्थः ।
युक्तं तदेतत्त्वयि सर्वकालं
परोपकारव्रतदीक्षितत्वात् ॥ ७१ ॥

मुनेः पुराणानि दशाष्ट साक्षा-
च्छ्रुत्यर्थगर्भाणि सुदुष्कराणि ।
कृतानि पद्यद्वयमत्र कर्तुं
को नाम [2]शक्तोऽतिसुसङ्गतार्थम् ॥ ७२ ॥

वेदार्णवाः प्रतियुगं विहिताश्चतुर्धा
शाखाप्रभेदनवशादपि तान्विभक्तान् ।
मन्दाः कलौ क्षितिसुता जनितार एते
वेदान् ग्रहीतुमलसा इति चिन्तयित्वा ॥ ७३ ॥

एष्यद्विजानासि भवन्तमर्थं
गतञ्च सर्वं न न वेत्सि यत्तत् ।
नो चेत्कथं भूतभवद्भविष्य
[3]त्कृथाप्रबन्धान् रचयेरजानन् ॥ ७४ ॥

आभासयन्नान्तरमङ्ग बाह्यं
स्थूलञ्च सूक्ष्मं बहिरन्तर[4]स्थम् ।
अपानुदद्भारतशीतरश्मि-
रभूतपूर्वो भगवान्पयोधेः ॥ ७५ ॥

वेदाष्षडङ्गा निखिलञ्च शास्त्रं
महान्महाभारतवारिराशिः ।
त्वत्तः पुराणानि च सम्बभूवु-
स्सर्वं त्वदीयं खलु वाङ्मयाख्यम् ॥ ७६ ॥

---

[1] अ. चरितो मयार्थः । [2] अ. शक्नोति ।
[3] अ. कार्य । [4] अ. अन्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आगच्छतामपि यतां महतां न कार्यं
मुक्त्वा ध्रुवं परमनुग्रहणं परेषाम् ।
पृच्छामि कारणमिहागमने तथापि
प्रष्टुं न चोचितमथापि कुतूहलेन ॥ ७७ ॥

अस्ति प्रयोजनमिहाऽऽगमने यतीन्द्र
वक्ष्यामि तच्छृणु मया कृतसूत्रकाणाम् ।
भाष्यं व्यधायि किल भाष्यमपूर्वमेत-
त्तानि प्रियाणि मम सर्वनिबन्धनेभ्यः ॥ ७८ ॥

तद्द्रष्टुकामो वनमागतोऽह-
मित्युक्तवन्तं यतिरब्रवीत्तम् ।
सत्यं महत्सूत्रनिरीक्षणेन
बुद्धिं पुनामीति न बुद्धिमत्वात् ॥ ७९ ॥

भाष्यं तदुक्त्वार्पिपदस्य हस्ते
हस्तद्वयेनादरतो विनीतः ।
आदाय सर्वत्र निरैक्षतासौ
प्रसादगाम्भीर्यगुणाभिरामम् ॥ ८० ॥

सूत्रानुकारि मृदुवाक्यनिवेदितार्थं
स्वीयैः पदैस्सह निराकृतपूर्वपक्षम्
सिद्धान्तयुक्तिविनिवेशिततत्स्वरूपं
दृष्ट्वाऽभिनन्द्य परितोषवशादवोचत् ॥ ८१ ॥

बह्वर्थगर्भाणि लघूनि यानि
निगूढभावानि चमत्कृतानि ।
त्वामेकमीड्यं विरहय्य नास्ति
यस्तानि सम्यग्विवरीतुमीष्टे ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षाणि षोडश तवायुरिति प्रक्लृप्तं
तावन्ति ते पुनरहं वितराणि जीवम्
अद्वैतदर्शनमिदं कुरु सत्प्र[1] तिष्ठं
लोके विनोदचरणं [2]सहितो विनेयैः ॥ ८३ ॥

निसर्गदुर्ज्ञानतमानि को वा सूत्राण्यलं वेदितुमर्थतस्सन् ।
क्लेशस्तु तावान्विवरीतुरेषां यावान्प्रणेतुर्विदुषो वदन्ति ॥ ८४ ॥

इतीरयन्तं प्रतिवाचमूचे स शङ्करः पावितसर्वलोकः ।
त्वत्सूत्रसम्बन्धवशान्मदीयभाष्यं प्रचारं भुवि यातु विद्वन्
॥ ८५ ॥

इतीरयित्वा चरणौ ववन्दे यतिर्मुनेस्सर्वविदो महात्मा ।
प्रदाय [3]संभाष्य परं मुनीशो द्वैपायनस्सोऽ[4]न्तरधाद्यतात्मा
॥ ८६ ॥

अथाऽऽगमद्ब्राह्मणसूनुराराद्धीतवेदोऽधर[5]यन् स्वभासा ।
तेजांसि कश्चित्सरसीरुहाक्षो दिदृक्षमाणः किल देशिकेन्द्रम्
॥ ८७ ॥

आगत्य देशिकपदाम्बुज[6]योरपप्तत्
संसारवारिधिमनुत्तममुत्तितीर्षुः ।
वैराग्यवानकृतदारपरिग्रहश्च
कारुण्यनावमधिरुह्य दृढां दुरापाम् ॥ ८८ ॥

उत्थाप्य तं गुरुरुवाच गुरुर्द्विजानां
कस्त्वं [7]क्व धाम कुत आगत आत्तधैर्यः ।
बालोऽप्यबालधिषणः प्रतिभासि मे त्व
मेकोऽप्यनेक[8]वदनेकशरीरभासा ॥ ८९ ॥

[1] अ. सप्रतिष्ठं ।
[2] का. महितो ।
[3] क. संभाव्य वरं ।
[4] अ. सोऽन्तरयान्माहात्मा ।
[5] अ. अन्तरयन् ।
[6] का. जयोः प्रणम्य ।
[7] का. क्व यासि ।
[8] का. इव नैकशरीरभासा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्टो बभाण गुरुमुत्तरमुत्तरज्ञो
विप्रो गुरो मम गृहं बुधं चोलदेशे ।
यत्राऽऽपगा वहति पुण्यकवेरकन्या
यस्याः पयो हरिपदाम्बुजभक्तिमूलम् ॥ ९० ॥

अटाट्यमानो महतो दिदृक्षुः
क्रमादिमं देशमुपागतोऽस्मि ।
बिभेमि मज्जन् भववारिराशौ
तत्पारगं मां कृपया विधेहि ॥ ९१ ॥

इत्युक्तवन्तं कृपया महात्मा-
प्यदापयत्संन्यसनं यथावत् ।
यं प्राहुरार्यं प्रथमं विनेयं
श्रीदेशिकेन्द्रस्य सनन्दनाख्यम् ॥ ९२ ॥

अत्रान्तरेऽपि जरतीं जननी तदीया
सस्मार शङ्करपदं निकटस्थमृत्यु- ।
तच्छङ्करो विदितवान् युयुजे विविक्ते
सोऽन्तर्दधे गगनमण्डलमाससाद ॥ ९३ ॥

योगेन गच्छन् स मुहूर्तमात्रा-
दवातरत्केरलभूविशेषे ।
तद्देशबुद्ध्या पुनरीक्षमाणः
स्वका[1]लटिं जन्मभुवं प्रपेदे ॥ ९४ ॥

तत्रातुरां मातरमैक्षतासौ
ननाम तस्याश्चरणौ कृतात्मा ।
सा चैनमुद्वीक्ष्य शरीरतापं
जहौ निदाघार्त इवाम्बुदेन ॥ ९५ ॥

---

[1] अ. स्वां क़ालटीं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपादिशद्ब्रह्म[1]पदं सनातनं
न यत्र हस्ताङ्घ्रिविभागकल्पना ।
अन्तर्बहिस्संनिहितं यथाम्बरं
निरामयं जन्मजरादिवार्जितम् ॥ ९६ ॥

तत्रोपदिष्टे न विवेद किञ्चि-
न्माताबदच्छङ्कर न [2]क्षमेऽहम् ।
त्वयोदितं वेदितुमन्यदेव
वदेति मात्रा गदितो न्यगादीत् ॥ ९७ ॥

नारायणं शङ्खगदा[3]सिपद्मं
दधानमब्जासनमम्बुजाक्षम् ।
[4]रमाधरं श्लिष्टमदभ्रभूषणं
सनीरनीराम्बुदसंनिकाशम् ॥ ९८ ॥

तं तादृशं निजसुतोदितमम्बुजाक्षं
चित्ते दधार मृतिकाल उपागतेऽपि ।
चित्तेन कञ्जनयनं हृदि भावयन्ती
तत्याज देहमबला किल योगिवत्सा ॥ ९९ ॥

संस्कर्तुकामो जननीं सनाभीन्
जुहाव नायंन् किल दुर्विदग्धाः ।
ततो हुताशं प्रतिगेहमार्दित
तं चापि नास्मै वितताार कश्चित् ॥ १०० ॥

स [5]च्छिद्य काष्ठानि सुशुष्कवन्ति
गृहोपकण्ठे धृततोयपात्रः ।
स दक्षिणे दोष्णि ममन्थ वह्निं
ददाह तां तेन च संयतात्मा ॥ १०१ ॥

---

[1] अ. परं ।
[2] अ. क्षमाऽहम् ।
[3] अ. अरि ।
[4] अ. धराश्लिष्टमुदग्र ।
[5] अ. सञ्चित्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न याचिता वह्निमदुर्यदस्मै
शशाप तान् स्वीयजनान् सरोषः ।
अतः परं वेदबहिष्कृतास्ते
द्विजा यतीनां न भवेच्च भिक्षा ॥ १०२ ॥

शप्त्वा द्विजातीन्भगवांस्तिरोऽभूद्विहायसासौ बदरीं जगाम ।
अद्यापि तद्देशभवा न वेदमधीयते नो यतिनां च भिक्षा ॥

श्रीशङ्करोत्पत्तिकथाभ्यधायि
तस्यैव जिष्णोर्विजयोऽपि यत्र ।
सर्गश्चतुर्थोऽगमदत्र काव्ये
व्यासाचलेनारचिते रसार्द्रे ॥ १०३ ॥

इति श्रीशङ्करविजये व्यासाचलीये
चतुर्थस्सर्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पञ्चमस्सर्गः

पृथ्वीं पृथ्वीं पर्यठन् भाष्यकारः
स्वेच्छाचारी शिष्यसङ्घैः परीतः ।
भाष्यं भाष्यं सन्दधानः स्वहस्ते
तीर्थं [1]प्रापत्तीर्थिकस्तीर्थमूर्तिः ॥ १ ॥

कलिन्दपुत्र्यास्सजलाभ्रकान्त्याः
क्षीराभया जह्नुतनूजया च ।
यत्राभवत्सङ्गतिरल्पपुण्यै-
स्सुदुर्लभा मुक्तिपदं जनानाम् ॥ २ ॥

गङ्गाप्रवाहै [2] रवरुद्धवेगा
कालिन्दकन्या स्तिमितप्रवाहा ।
अपूर्वसख्या गतलज्जयेव
यत्राधिकं भाति विचित्रपाथाः ॥ ३ ॥

ब्रह्मादयोऽप्यभिमतप्रतिपादशक्त्या
यत्रायजन्त पुरुषार्थविशेषसिद्ध्यै ।
अद्यापि यत्र यजनं प्रथितं प्रशस्तं
यस्य प्रयाग इति नाम बभूव लोके ॥ ४ ॥

यत्राप्लुता दिव्यशरीरभाज
आचन्द्रतारं दिवि भोगजातम् ।
संभुञ्जते [3] व्याधिकथानभिज्ञाः
प्राहेममर्थं श्रुतिरेव साक्षात् ॥ ५ ॥

---

[1] का. प्राप्तस्तीर्थकः ।
[2] अ. उपरुद्धवेगा; का. उपगूढवेगा ।
[3] का. तेऽत्यादिकथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवान्तरोपार्जितपुण्यपूरैर्यत्प्राप्य देहं जहतीह देहिनः ।
बुद्ध्यैव ते ब्रह्मपदं लभन्ते प्राहेममर्थं श्रुतिरेव साक्षात्
॥ ६ ॥

कूपे स्नानं माघमासे प्रशस्तं
तस्माच्छस्तं पुष्करिण्यां ततोऽपि ।
कुल्यास्नानं निम्नगायां ततः स्यात्
यत्र स्नानान्नाधिकं किञ्चिदस्ति ॥ ७ ॥

यत्र मज्जति महामना गले
वालुकाभिरभिपूर्य [1]पटं यः ।
सङ्कलय्य समुपैति तमर्थं
यं न्यधाद्धृदि पुरार्थितमर्थम् ॥ ८ ॥

सस्नौ प्रयागे सह शिष्यसङ्घै-
स्स्वयं कृतार्थो जनसङ्घहार्थी ।
अस्मारि मातापि च या पुपोष
[2]दयारसा दुःखमसोढ भूरि ॥ ९ ॥

ततस्तुषाग्नौ शयितं महान्तं
स भट्टपादं [3]समलोचताग्रे ।
शिष्यैः परीतं ज्वलदग्निकल्पं
जुगोप यो वेदपथं जितारिः ॥ १० ॥

अदृष्टपूर्वं श्रुतपूर्ववृत्तं दृष्ट्वातिमोदं स जगाम भट्टः ।
अर्चीकरच्छिष्यगणैस्सपर्यामुपाददे तामपि देशिकेन्द्रः
॥ ११ ॥

---

[1] अ घटं । [2] अ. दधार या ।
[3] का. समलोकत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपात्तभिक्षः परितुष्टचित्तः प्रदर्शयामास स भाष्यमस्मै ।
सर्वो निबन्धो ह्यमलोऽपि लोके शिष्टेक्षितस्सञ्चरणं प्रयाति ॥ १२ ॥

दृष्ट्वा भाष्यं हृष्टचेताः कुमारः [1]प्रोचे वाचं शङ्करं देशिकेन्द्रम् ।
लोके ह्यत्रो मत्सर[2]ग्रासशाली सर्वज्ञौ तौ नाल्पभावस्य पात्रम् ॥ १३ ॥

अष्टौ सहस्राणि विभान्ति [3]विद्वन्
सद्वार्तिकानां प्रथमेऽत्र भाष्ये
अहं यदि स्यामगृहीतदीक्षो
ध्रुवं विधास्ये सुनिबन्धमस्य ॥ १४ ॥

भवादृशां दर्शनमेव लोके
विशेषतोऽस्मिन्समये दूरापम् ।
पुरार्जितैः पुण्यचयैः कथञ्चित्
त्वमद्य मे दृष्टिपथं [4]गतोऽसि ॥ १५ ॥

असारसंसारपयोधिमध्ये
[5]निमज्जतां सद्भिरुदारवृत्तैः ।
भवादृशैस्सङ्गतिरेव साध्या
नान्यस्तदुत्ताराविधावुपायः ॥ १६ ॥

चिरं दिदृक्षे भगवन्तमीड्यं
त्वमेव दैवेन समागतोऽभूः ।
न ह्यत्र संसारपथे नराणां
स्वेच्छाविधेयोऽभिमतेन योगः ॥ १७ ॥

युनक्ति कालः क्वचिदिष्टवस्तुना
क्वचित्त्वनिष्टेन च नीचवस्तुना ।

---

[1] का. प्रोवाचैवं । [2] अ. ग्राम ।
[3] अ. यद्वत् । [4] अ. गतोऽभूः ।
[5] अ. निमज्जता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव संयोज्य वियोजयत्यसौ
सुखासुखं कालकृते [1]हच्चुपैत्यसौ ॥ १८ ॥

कृतो निबन्धो निरणायि पन्था
न्यरासि नैयायिकयुक्तिजालम् ।
तथान्वबभूवं विषयार्थजातं
न कालमेनं परिहर्तुमीशे ॥ १९ ॥

निरास्थमीशं श्रुतिलोकसिद्धं
श्रुतेरस्वतो मात्वमुदाहरिष्यन ।
न निह्नुवे येन विना प्रपञ्चः
सौख्याय कल्पेत न जातु विद्वन् ॥ २० ॥

तथागताक्रान्तमभूदशेषं
स वैदिकोऽध्वा विरलीबभूव ।
परीक्ष्य तेषां विजयाय मार्गं
प्रावर्तिषि त्रातुमानाः पुराणम् ॥ २१ ॥

सशिष्यसङ्घाः प्रविशन्ति राज्ञां
गेहं तदादानीं स्ववशे विधातुम् ।
जैना मदीया जनमस्मदी
तदाद्रियध्वं न तु वेदमार्गम् ॥ २२ ॥

वेदोऽप्रमाणं बहुमानबाधात्
परस्परव्याहतवाचकत्वात्
एवं वदन्तो विचरन्ति लोके
न [2]काचिदेषां प्रतिपच्चिरासीत् ॥ २३ ॥

अवेदिषं वेदविघातदक्षा
तन्नाशकं जेतुमबुध्यमानः ।
तदीयसिद्धान्तरहस्यमर्थं
निषेध्यबोधाद्धि निषेधबोधः ॥ २४ ॥

---

[1] का॰ प्रवेद्भयतः ।

[2] क. कश्चिदेषां प्रतिपक्ष आसीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा तदीयं शरणं प्रपन्न-
स्सिद्धान्तमश्रौषमनुद्धतात्मा ।
अदूदुषद्वैदिकमेव मार्गं
तथागतो जातु कुशाग्रबुद्धिः ॥ २५ ॥

तदापतन्मे सहसास्र[1] बिन्दु-
स्तच्चाविदुः पार्श्वनिवासिनोऽन्ये ।
तदा प्रभृत्येव विवेश शङ्का
मय्याप्तभावं परिहृत्य तेषाम् ॥ २६ ॥

[2] विपक्षचोदी बलवान् द्विजातिः
प्रत्यादिशेद्दर्शनमस्मस्मदीयम् ।
उच्चाटनीयः कथमप्युपा[3] या-
न्नैतादृशः स्थापयितुं हि योग्यः ॥ २७ ॥

समन्त्र्य चेत्थं कृतनिश्चयास्ते
[4] वाचावरा हिंसनवादशीलाः ।
व्यपातयन्नुच्चतरात्प्रमत्तं
मामग्रसौधाद्विनिपातभीरुम् ॥ २८ ॥

पतन्पतन् [5] सौधतलादरूरुवं
यदि प्रमाणं श्रुतयो भवन्ति
जीवेयमस्मिन्पतितस्समस्थले
मज्जीवनेन [6] श्रुतिमानतागतिः ॥ २९ ॥

यदीति सन्देहपदप्रयोगात्
व्याजेन शास्त्रश्रवणाच्च हेतोः ।
ममोच्चदेशात्पततो व्यनाङ्क्षीत्
[7] तदैव चक्षुर्विधिकल्पना सा ॥ ३० ॥

---

[1] अ. श्रु ।
[2] अ. पाटी का पाती ।
[3] क. उपायैः ।
[4] अ. परा ।
[5] क. तलान्यरूरुवम् ।
[6] अ. मानिता; क. श्रुतिमानसा ।
[7] अ. तदैक का यदेक ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकाक्षरस्यापि गुरुः प्रदाता
शास्त्रोपदेष्टा किमु भाषणीयम् ।
अहञ्च सर्वज्ञगुरोरधीत्य
प्रत्यादिशं [1]स्तञ्च गिरं महागः ॥ ३१ ॥

तस्मादहं तत्परिहारहेतो-
श्शाये मुमूर्षुस्तुषवह्निमूले ।
यदीह किञ्चित्समयं व्यतीत्य
त्वमागमिष्यो न भवामि भिक्षो ॥ ३२ ॥

प्रायश्चित्तं जानता पण्डितेन
प्रायश्चित्तं दोषजातस्य कार्यम् ।
नो चेद्दोषो यान्तमेवानुगच्छेत्
बाधेतैनं [2]सर्वथा सर्वचित्तम् ॥ ३३ ॥

भगवन्प्रवदाम्युपायमेकं
भवतो भाष्यनिबन्धने स्फुटम् ।
मगधेषु वसन् ममास्ति शिष्य-
स्स तु तस्मै प्रभवत्यसंशयम् ॥ ३४ ॥

[3]सदा वदन्योगपदञ्च सांप्रतं
स विश्वरूपः प्रथितो महीतले ।
महागृही वैदिककर्मतत्परः
प्रवृत्तिशास्त्रे निरतस्स कर्मठः ॥ ३५ ॥

निवृत्तिशास्त्रे न कृतादरः स्वयं
केनाप्युपायेन वशं स नीयताम् ।
वशं गते तत्र भवेन्मनोरथ-
स्तदन्तिकं गच्छतु मा चिरं भवान् ॥ ३६ ॥

---

[1] क. प्रत्यादिसं तेन गुरुर्महागः । [2] अ. सर्वदा ।
[3] अ, गदावदादोगदपञ्च । (?); का. गदावताग्यगप चदो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतावदुक्त्वा विरराम शङ्करं
स भट्टनामा मरणाय दीक्षितः ।
तत्पार्श्ववर्ती विदितार्थसङ्ग्रह-
स्स मण्डनाख्योऽभिजगाम शङ्करम् ॥ ३७ ॥

निवसति स तु नित्यं यस्य वाणीसरोजे
निपतति कविभृङ्गो यत्र संमाननार्थी ।
परिसरति दिशो यद्वादिवर्गः प्रभग्नो
विहरति परिपुष्टो बन्धुवर्गश्च येन ॥ ३८ ॥

गुरुर्गरीयानपि वित्तहीनो
विद्यासु वृद्धोऽपि गुरुप्रदीपः ।
अयं [1]कुरूपी गुरुनित्यवासी
गुरुं विपत्तावपि नो जहाति ॥ ३९ ॥

[2]गमित एष जनोऽद्य महात्मनो
भगवतस्तव पादसरोरुहम् ।
कुरु दृशं कृपयेति समीपगः
[3]श्रुतवचास्सहसा स ददौ करम् ॥ ४० ॥

[4]त्रिमुनिवारमसावपिबज्जलं
रवमयं मुनिवक्त्रबिलोद्भवम् ।
इति मया पुर एव श्रुतोऽप्ययं
नयनगोचरनामधुना गतः ॥ ४१ ॥

इति वचस्सुधयाप्यभिषिक्तवान्
मुनिवरो गृहमेधिशिरोमणिम् ।
[5]विदितवेद्यमनुद्धतभाषिणं
मुनिजैनराभिवन्द्यपदाम्बुजः ॥ ४२ ॥

[1] अ. गुरुश्रीः ; का. गुरुप्रीः । [2] अ. नमित ।
[3] क. सहसास्य । [4] क. त्रिमुनिसारमसावपि तज्जलं ।
[5] अ. वितत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ गिरं गृहिराज उपाददे
मम जनिस्सफला भवदीक्षणात् ।
न खलु लोचनमाश्रयते फलं
[1]घटपटादिभिरीक्षणमात्रतः ॥ ४३ ॥

भवादृशैस्सङ्गतिरेव नो गति-
र्गृहे स्थितानां सुतदारपोषिणाम् ।
[2]क्रमेण मोक्तुं भवदीयसेवना-
मतो गृहीत्वार्हसि मामितोऽटितुम् ॥ ४४ ॥

एवं वादिनि मण्डने मृदुमनाः प्रोचे दयालिङ्गितः
श्रुत्याचोदितकर्म एव तनुयास्तेनान्तरं शुद्ध्यति ।
शुद्धेऽन्तःकरणे परिस्फुरति तत् सौख्यात्मकं ब्रह्म ते
शुद्धे दर्पणमण्डले मुखमिव स्वात्मप्रभं सर्वगम् ॥ ४५ ॥

त्यक्त्वा मण्डन भेदगोचरधियं मिथ्याभिमानात्मिका-
मद्वैते भव निष्ठितो मम वचस्ते रोचते यद्यदः ।
तीर्त्वा संसृतिवारिधिं परपदे ज्ञानप्लवारोहणात्
पारे स्थास्यसि निर्वृतस्सुखमये संसार[3]वार्तोज्झिते ॥ ४६ ॥

एवमेनमनुनीय सत्पदै-
र्ब्रह्मवादनपरैर्गुरुवर्यः ।
मण्डनं निजपदे स्थिरभक्तिं
संविधाय गमनाय मनोऽधात् ॥ ४७ ॥

यत्राद्धा महिमा प्रयागविषयो भट्टेडिताचार्ययो-
स्संवादोऽप्यघनोदनो निजगदे व्यावर्णितं सौगतम् ।
शास्त्रस्य श्रवणं विजेतुमपि तान् व्यासाद्रिसंप्रोदिते
श्रीमच्छङ्करदेशिकेन्द्रविजये सर्गोऽगमत्पञ्चमः ॥ ४८ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
पञ्चमस्सर्गः ॥

[1] का. निरीक्षण । [2] अ. क्षमे न । [3] का. वातो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ षष्ठस्सर्गः ॥

अथ प्रतस्थे भगवान्प्रयागात्
दिदृक्षमाणो गृहिविश्वरूपम् ।
विहायसा योगबलेन गच्छन्
अवातरत्तस्य गृहाङ्गणान्तः ॥ १ ॥

स विश्वरूपः कृतवह्निकार्यः
प्रतीक्षमाणोऽतिथिमातिथेयः ।
उदैक्षतैनं स्वशरीरभाभिः
प्रकाशयन्तं विदिशो दिशश्च ॥ २ ॥

स भिक्षवेऽदृष्टचराय तस्मै
सङ्कल्प्य भिक्षां पदयोरमुष्य ।
चिक्षेप पुष्पं चरणावनेजत्[1]
तत्पाथसात्मानमसिञ्चताद्धा ॥ ३ ॥

प्रक्षालिताङ्घ्रिः प्रविवेश कश्चित्
व्यतीत्य [2]कक्ष्या गृहमध्यभूमिम् ।
दीपप्रभानिस्सरदन्धकार-
मध्यास्त पीठं परमं मुनीन्द्रः ॥ ४ ॥

आयन्मार्गे देशिकेन्द्रो जनानां
दृष्टेर्मार्गं नाप पापापनोदी ।
ईक्षाञ्चक्रे मन्दिरान्तः प्रविष्ट-
स्तेनैतस्मिन्विस्मयोऽभूत्स तेषाम् ॥ ५ ॥

---

[1] क. अनेजेत् ।   [2] अ. कक्षा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रौप्यं पात्रं दीप्यमानं तदग्रे
न्यस्या[1]ज्यादेः पात्रजातं पृथक् च ।
शुभ्रैर्वस्त्रैरूर्ध्वदेशं[2] वितेने
शङ्कावर्जं भिक्षितुं जोषमन्तः ॥ ६ ॥

आनर्च पुष्पाक्षतधूपदीपैः
[3]परं गृहेशो यतिवर्यमेनम् ।
अतिष्ठतां पार्श्वगतौ वटू द्वौ
सचामरौ वीजनकर्म चक्रतुः ॥ ७ ॥

यथोचितं पात्रनिकायमध्ये
तदीयभार्या सुकुमारहस्ता ।
अन्नं घृतं पक्वविशेषजातं
तथोपदंशान् गुडवैकृतानि ॥ ८ ॥

भक्तानि चिक्षेप [4]वराभिधान
[5]यस्यां बभूवोभयभारतीति ।
[6]पुरा किलाध्यैषत धातुरन्तिके
सर्वज्ञकल्पा मुनयो निजं निजम् ॥ ९ ॥

वेदं तदा दुर्वसनोऽतिकोपनो
वेदानधीयन् क्वचिदस्खलत्स्वरे ।
तदा जहासेन्दुमुखी सरस्वती
यदङ्गमर्णोद्भवशब्दसन्ततिः ॥ १० ॥

---

[1] का. स्याज्योदः ।
[2] अ. देशे । का. देशान् ।
[3] अ. भक्त्या गृहीशो ।
[4] अ. पराभिधानं ।
[5] अ. यस्या ।
[6] इतः पूर्वमयं श्लोकार्धः अ. पुस्तकेऽधिको दृश्यते यथा—"सरस्वती सा खलु वस्तुवृत्त्या लोकोऽपि तां वक्ति सरस्वतीति" ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चुकोप तस्यै दहनानुकारिणा
निरीक्षताक्ष्णा मुनिरुग्रशासनः ।
शशाप तां दुर्विनयेऽवनीतले
जायस्व मर्त्येत्यबिभत्सरस्वती ॥ ११ ॥

प्रसादयामास निसर्गकोपनं
तत्पादमूले पतिता विषादिनी ।
दृष्ट्वा विषण्णा मुनयस्सरस्वतीं
प्रसादयाञ्चक्रुरिमं तमादरात् ॥ १२ ॥

कृतापराधां भगवन् क्षमस्व तां
पितेव पुत्रं विहितागसं मुने ।
प्रसादितोऽभूदथ संप्रपन्नो
वाण्या मुनीन्द्रैरपि शापमोक्षम् ॥ १३ ॥

ददौ यदा मानुषशङ्करस्य
सन्दर्शनं स्याद्भवितास्यमर्त्या ।
सा शोणतीरेऽजनि विप्रकन्या
सर्वार्थवित्सर्वगुणोपपन्ना ॥ १४ ॥

यस्या बभूवुस्सहजाश्च विद्या
शिरोगतं के परिहर्तुमीशाः ।
सर्वाणि शास्त्राणि षडङ्गवेदान्
काव्यादिकान्वेत्ति परञ्च सर्वम् ॥ १५ ॥

तन्नास्ति नो वेत्ति यदत्र बाला
तस्मादभूच्चित्रपदं जनानाम् ।
सा विश्वरूपं गुणिनं गुणज्ञा
मनोभिरामं द्विजपुङ्गवेभ्यः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुश्राव ताश्चापि स विश्वरूपो
जातं तयोर्दर्शनलालसं मनः ।
अन्योन्यसंदर्शनलालसौ तौ
चिन्ताप्रकर्षादधिगम्य निद्राम् ॥ १६ ॥

अवाप्य सन्दर्शनभाषणानि
पुनः प्रबुद्धौ विरहाग्नितप्तौ ।
दिदृक्षमाणावपि नेक्षमाणा-
वन्योन्यवार्ताहतमानसौ तौ ॥ १८ ॥

यथोचिताहारविहारहीनौ
तनोस्तनुत्वं स्मरणादुपेताम्[1] ।
दृष्ट्वा तदीयौ पितरौ कदाचि-
दपृच्छतां तौ परिकार्शितङ्गौ ॥ १९ ॥

वपुःकृशं ते मनसोऽप्यगर्वो
न व्याधिमीक्षे न च हेतुमन्यम् ।
इष्टस्य हानेरनभीष्टयोगा
द्भवन्ति दुःखानि शरीरभाजाम् ॥ २० ॥

वीक्षे न तौ द्वावपि [2]वीक्षमणो
विना निदानं न हि कार्यजन्म ।
न तेऽत्यगादुद्वहनस्य कालः
परावमनो न च निःस्वता वा ॥ २१ ॥

कुटुम्बभारो मयि दुस्सहोऽयं
कुमारवृत्तेस्तव कात्र पीडा ।
न मूढभावः परितापहेतुः
पराजितिर्वा तव तन्निदानम् ॥ २२ ॥

[1] अ. पेतौ । [2] अ. वीक्ष्यमाणौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वत्सु विद्वत्तरताग्रपाठात्
सुदुर्जयोऽर्थादपि तर्कविद्भिः ।
आजन्मनो विहितकर्मनिषेवणं ते
स्वप्नेऽपि नास्ति विहितेतरकर्मसेवा ? ॥ २३ ॥

तस्मान्न भेयमपि नारकयातनाभ्यः
किन्ते मुखं प्रतिदिनं गतशोभमास्ते ।
निर्बन्धतो [1] बहुदिनं प्रतिपाद्यमानौ
वाक्यं त्रपाभरयुताविदमूचतुः स्म ॥ २४ ॥

निर्बन्धतस्तव वदामि मनोगतं मे
वाच्यन्न वाच्यमिति यद्वितनोति लज्जाम् ।
शोणाख्यपुनदतटीवसतेर्द्विजस्य
कन्या श्रुतिं गतवती द्विजपुङ्गवेभ्यः ॥ २५ ॥

सर्वज्ञतापदमनुत्तमरूपवेषा
तामुद्विवक्षति मनो भगवन्मदीयम् ।
पुत्रेण सन् सविनयं गदितोऽन्वशाद्द्वौ
विप्रौ वधूवरणकर्मणि सम्प्रवीणौ ॥ २६ ॥

तावापतुर्द्विजगृहं द्विजसन्दिदृक्षू
देशान्तरात्य बहुलान्निजकार्यसिद्ध्यै ।
भूभृन्निकेतनगत श्रुतविश्वशास्त्रः
श्रीविश्वरूप इति यः प्रथितः पृथिव्याम् ॥ २७ ॥

तत्पादपद्मरजसे स्पृहयामि नित्यं
साहाय्यमत्र यदि तात भवान्विदध्यात् ।
[2] पुत्र्या वच. पिबति कर्णपुटेन ताते
श्रीविश्वरुपगुरुणा गुरूणा द्विजानाम् ॥ २८ ॥

---

[1] का. बहुतिथं । [2] अ.पुत्री ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आजग्मतुस्सुवसनौ विशदाङ्गयष्टी
संप्रेषितौ सुतवरोद्वहनक्रियायै ।
[1] तावार्चिचद्द्विजवरो विहितोपचारै-
रायानकारणमथो शनकै[2]पृच्छत् ॥ २९ ॥

श्रीविश्वरूपगुरुवाक्यत आगतौ स्व
इत्यूचतुर्वरणकर्मणि कन्यकायाः ।
संप्रेषितौ श्रुतवयःकुलधर्मवृत्तै-
स्साधारणीं श्रुतवता स्वसुतस्य तेन ॥ ३० ॥

याचावहे तव सुतां द्विज तस्य हेतो-
रन्योन्यसङ्घटनमेतु मणिद्वयं तत् ।
मह्यं तदुक्तमभिरोचत एव विप्रौ
[3] दृष्टा वधूर्मम पुनः करवाणि नित्यम् ॥ ३१ ॥

कन्याप्रदानमिदमादधते[3] वधूषु
नो चेदमर्व्यसनसक्तिषु पीडयेयुः ।
भार्यामपृच्छदथ किं [4] करवाव भद्रे
विप्रौ वरीतुमनसौ द्विजराजगेहात् ॥ ३२ ॥

एतां सुतां सुतनया तव सा च कन्या
ब्रूहि त्वमेकमनुमाय पुनर्न वाच्यम् ।
दूरे स्थितिः श्रुतवयःकुलवृत्तजातं
न ज्ञायते दयित किं प्रवदामि तुभ्यम् ॥ ३३ ॥

[5] वृत्तान्विताय कुलवृत्तिसमन्विताय
देया सुतेति विदितं श्रुतिलोकयोश्च ।
नैवं नियन्तुमनघे तव शक्यमेत-
त्त्वां रुक्मिणीं [6] यदुवराय कुशस्थलीशः ॥ ३४ ॥

---

[1] अ. तावागतौ द्विजवरौ विहितोपचारौ । [2] का. पृष्टा ।
[3] अ. आयतते । [4] क्रा. करवाणि ।
[5] अ. विद्यान्विताय । [6] क. यदुकुलाय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रादात्स भीष्मकसुतः खलु कुण्डिनेश-
स्तीर्थोपदेशमठतेऽन्वपरीक्षिताय ।
किं केन सङ्गतमिदं सति मा विचारी-
र्यो वैदिकीं सरणिमप्रहतां प्रयत्नात् ॥ ३५ ॥

प्रातिष्ठिपत्सुगतदुर्जयनिर्जयेन
शिष्यं यमेनमशिषत्स च भट्टपादः ।
किं वर्ण्यते सुदति यो भविता वरो [1]नो
विद्याधनं द्विजवरस्य न बाह्यवित्तम् ॥ ३६ ॥

याऽन्वेति सन्ततमनन्तदिगन्तभाजो
यां [2]राजचोरवनिता न च हर्तुमीशाः ।
संक्षीयते न तु सदा प्रतिपादने या
वध्वार्जनावनपरिव्ययगानि तानि ॥ ३७ ॥

वित्तानि चित्तमनिशं परिखेदयन्ति
चोरान्नृपात्स्वजनतश्च भयं धनानाम् ।
शर्मेति जातु न गुणः खलु बालिशस्य
केचिद्धनं निदधते भुवि नोपभोगम् ॥ ३८ ॥

कुर्वन्ति लोभवशगा न विदन्ति केचि-
दन्येन गोपितमुतान्यजना हरन्ति ।
तच्चेन्नदीपरिसरे जलमेव हर्तृ
सर्वात्मना दुहितरो न गृहे विधेयाः ॥ ३९ ॥

ताश्चेत्पुरा परिणयाद्रज उद्गतं स्वं
पश्येयुरात्मपितरौ बत पातयन्ति ।
दुःखेषु [3]घोरनिरयेष्विति धर्मशास्त्रं
मा भूदयं मम सुताकलहः कुमारीम् ॥ ४० ॥

---

[1] अ. नौ ।
[2] अ. गणिका ।
[3] अ. घोरनरकेष्विति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृच्छाव सा वदति यं भविता वरोऽस्या
एवं विधाय समयं पितरौ कुमार्याः ।
अभ्याशमीयतुरितो गदितेष्टकार्यौ
श्रीविश्वरूपगुरुणा प्रहितौ द्विजौ द्वौ ॥ ४१ ॥

कन्यार्थिनौ सुतनु किं करवाव वाक्यात्
तस्याः प्रमोदनिचयो न ममौ शरीरे ।
रोमाञ्चपूरमिषतो बहिरुज्जगाम
तेनैव सा प्रतिवचः प्रददौ पितृभ्याम् ॥ ४२ ॥

तेनैव तावपि तयोर्युगलाय सत्य-
मादाय विप्रमपरं पितृगेहतोऽस्याः ।
तौ जग्मतुर्द्विजवरौ स्वनिकेतनाय
. . . . ? ॥ ४३ ॥

अस्माच्चतुर्दशदिने भविता दशम्यां
[1] जामित्रतादिगुणपूगयुतो मुहूर्तः ।
एवं विलिख्य गणितादिषु कौशलस्य
विख्यापनाय दिशति स्म सरस्वती सा ॥ ४४ ॥

तौ हृष्टपुष्टमनसौ विहितेष्टकार्यौ
श्रीविश्वरूपगुरुमुत्तममैक्षिषाताम् ।
सिद्धं समीहितमिति [2] प्रथितानुभावौ
दृष्ट्वैव तन्मुखमसावथ निश्चिकाय ॥ ४५ ॥

अन्यः स्वहस्तगतपत्रमथार्पिपत्तत्
दृष्ट्वा जहास सुखवारिनिधौ ममज्ज ।
विप्रान् यथोचितमपूपुजदागतांस्तान्
रत्नांशुकादिभिरयं बहुवित्तलभ्यैः ॥ ४६ ॥

---

[1] क. शामित्र । [2] अ. भावो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पित्रानुशिष्टवसुधासुरसंहितेन
विज्ञापितस्सुखमवाप स विश्वरूपः ।
कार्याण्यवीवददथाऽऽत्मजनान् समेतान्
बन्धुप्रियः परिणयोचितसाधनाय ॥ ४७ ॥

मौहूर्तिका बहव एत्य मुहूर्तजातं
[1] संप्रार्थिता द्विजवरैर्बहुविद्भिरिष्टैः ।
माङ्गल्यवस्तुसहितोऽखिलभूषणाढ्य-
स्संप्रापदक्षततनुः पृथुशोणतीरम् ॥ ४८ ॥

शोणस्य तीरमुपयात[2]मुपाशृणोत्स
जामातरं बहुविदं किल विष्णुमित्रः ।
प्रत्युज्जगाम मुमुदे प्रियदर्शनेन
प्रावीविशद्गृहममुं बहुवाद्यघोषैः ॥ ४९ ॥

दत्वासनं मृदुवचस्समुदीर्य तस्मै
पाद्यं ददौ स मधुपर्कमनर्घ्यपात्रे ।
अर्घ्यं ददावहमियं तनया ग्रहास्ते
गावौ हिरण्यमखिलं भवदीयमूचे ॥ ५० ॥

अस्माकमद्य पवितं कुलमाहृताः स
सन्दर्शनं परिणयव्यपदेशतोऽभूत् ।
नो चेद्भवान् बहुविदग्रसरः क्व चाहं
भद्रेण भद्रमुपयाति पुमान्विपाकात् ॥ ५१ ॥

यद्यद्गृहेऽत्र भगवन्निह रोचते ते
तत्तन्निवेद्यमखिलं भवदीयमेतत् ।
वक्ष्यामि सर्वमभिलाषपदं त्वदीयं
युक्तं हि सन्ततमुपासितवृद्धपूगे ॥ ५२ ॥

---

[1] अ. संप्रार्थितं । [2] अ उपयान्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं मिथः परिणिगद्य विशेषमृद्धी
वाचायुतौ मुदमवापतुरुत्तमां तौ ।
अन्ये च संमुमुदिरे प्रियसत्कथाभिः
स्वेच्छाविहारहसनैरुभयोर्विधेयाः ॥ ५३ ॥

कन्यावरौ प्रकृतिसिद्धसुरूपवेषौ
दृष्ट्वा द्वयेऽपि परिकर्म विलम्बमानाः ।
चक्रुर्विधेयमिति [1] कृत्यमनीश्वरास्ते
शोभाविशेषमपि मङ्गलवासरेऽस्मिन् ॥ ५४ ॥

एतत्प्रभाप्रतिहतात्मविभूतिभावात्
आकल्पजातमपि नातिशयं वितेने ।
लोकप्रसिद्धिमनुसृत्य विधेयबुद्ध्या
भूषां व्यधुरतदुभये न विशेषबुद्ध्या ॥ ५५ ॥

मौहूर्तिका बहुविदोऽपि मुहूर्तकालं
अप्राक्षुरक्षतधियं [2] किल तां [3] सखीभिः ।
पश्चात्तदुक्तशुभयोगयुते शुभांशे
मौहूर्तिकाः स्वमतितो जगृहुर्मुहूर्तम् ॥ ५६ ॥

जग्राह पाणिकमलं हिममित्रसूनुः
श्रीविष्णुमित्रदुहितुः करपल्लवेन ।
भेरीमृदङ्गपटहाध्ययनाब्जघोषै-
र्दिङ्मण्डलेषु परिमूर्छति [4] दिव्यकाले ॥ ५७ ॥

यं यं पदार्थमभिकामयते पुमान्यः
तं तं प्रदाय समतूतुषतां तदीड्यौ ।
देवद्रुमाविव महासुमनस्त्वयुक्तौ
संभूषितौ सदसि चेरतुराप्तलाभौ ॥ ५८ ॥

---

[1] अ. कर्तुं ।
[2] अ. खलु ।
[3] का. सखीभ्यः ।
[4] अ. दानकाले ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आधाय वह्निमथ तत्र जुहाव सम्य-
ग्गृह्योक्तमार्गमनुसृत्य स विश्वरूपः ।
लाजान् जुहाव च वधूः परिजिघ्रति स्म
धूमं प्रदक्षिणमथाकृत सोऽपि चाग्निम् ॥ ५९ ॥

होमावसानपरितोषितविप्रवर्यः
प्रस्थापिताखिलसमागतबन्धुवर्गः ।
संरक्ष्य वह्नि[1]ममुया सममग्निगेहे
दीक्षाधरो दिनचतुष्कमुवास हृष्टः ॥ ६० ॥

प्रातिष्ठमाने दयिते वरेऽस्मि-
न्नुपेत्य मातापितरौ वराय ।
अभाषिषातां श्रुणु सावधानो
बालैव बाला न तु वेत्ति किञ्चित् ॥ ६१ ॥

बालैरियं क्रीडति कन्दुकाद्यै-
र्जातक्षुधा गेहमुपैति दुःखात् ।
एकेति बाला गृहकर्म नोक्ता
संरक्षणीया निजपुत्र[2]तुल्यम् ॥ ६२ ॥

बालेयमङ्ग वचनैर्मृदुभिर्विधेया
कार्या न रूक्षवचनैर्न करोति रुष्टा ।
केचिन्मृदूक्तिवशगा विपरीतभावाः
केचिद्विहातुमनलं प्रकृतिं जनो हि ॥ ६३ ॥

कश्चिद्द्विजातिरधिगम्य कदाचिदेना-
मुद्वीक्ष्य लक्षणमवोचदनिन्दितात्मा ।
मानुष्यमात्रजननं निजदेहभावे-
त्यस्माच्च वो वचनमुग्रमयोज्यमस्याम् ॥ ६४ ॥

---

[1] अ. अनया ।   [2] अ. तुल्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वज्ञतालक्षणमस्ति पूर्णमेषा कदाचिद्वदतोः कथायाम् ।
तत्साक्षिभावं व्रजितानवद्या सन्दिश्य नावेवमसौ जगाम
॥ ६५ ॥

श्वश्रूर्वराया वचनेन वाच्या
स्नुषाभिरक्ष्या यतते हि तस्याम् ।
निक्षेपभूता तव सुन्दरीयं
कार्या गृहे कर्म शनैः शनैस्ते ॥ ६६ ॥

बालेषु बाल्यात्सुलभोऽपराध-
स्स नेक्षणीयो गृहिणीजनेन ।
वयं सुतीभूय हि सर्व एव
पश्चाद्गुरुत्वं शनकैः प्रयाताः ॥ ६७ ॥

दृष्टाभिधातुश्च मनोऽस्मदीयं?
गेहाभिरक्षणविधौ न हि दृश्यतेऽन्यः ।
दृष्टाभिधानफलमेव भवेद्यथा नौ
भूयात्तदेष्टजनतां जननीं वरस्य ॥ ६८ ॥

वत्से त्वमद्य गमितासि दशामपूर्वां
तद्रक्षणे निपुणधीर्भव सुभ्रु नित्यम् ।
कुर्यान्न बालविहृतिं जनतोपहास्यां
सा नाविवापरमियं [1] परितोषयेत्ते ॥ ६९ ॥

पाणिग्रहात्स्वामियुतं समीरितं
पुरा कुमार्याः पितरौ ततः परम् ।
पतिस्तमेकं शरणं व्रजानिशं
लोकद्वयं जेष्यसि येन दुर्जयम् ॥ ७० ॥

[1] अ. परिपोषयेत्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्यावभुक्तवति सुन्दरि माशु भुङ्क्थाः
यातेे प्रवासमपि मा स्म भवद्विभूषा ।
पूर्वापरादिनियमोऽस्ति निमज्जनादौ
वृद्धाङ्गनाचरितमेव परं प्रमाणम् ॥ ७१ ॥

रुष्टे धवे ह युयुजे ह न वाच्यमेकं
क्षन्तव्यमेव निखिलं स तु शाम्यतीत्थम् ।
तस्मिन्प्रसन्नवदने [1] चाकितेव वग्धि
सिद्ध्यत्यभीष्टमनघे क्षमयैव सर्वम् ॥ ७२ ॥

भर्तुस्समक्षमपि तद्वदनं समीक्ष्य
वाच्यो न जातु सुभगे परपूरुषस्ते ।
किं वाच्य एष रहसीतिं तवोपदेश-
श्शङ्का वधूपुरुषयोः क्षपयेद्धि हार्दम् ॥ ७३ ॥

आयाति भर्तरि तु पुत्रि विहाय कार्य-
मुत्थाय शीघ्रमुदकेन [2] पदावनेन ।
कार्यं यथाभिरुचितं सति जीवनं वा
नोपेक्षणीयमणुमात्रमपीह कान्ते ॥ ७४ ॥

धवे परोक्षेऽपि कदाचिदेयुर्गृहं तदीया अपि वा महान्तः ।
ते पूजनीया बहुमानपूर्वं नो चेत् निराशाः कुलदाहकाः
स्युः ॥ ७५ ॥

पित्रोरिव श्वशुरयोरनुवर्तितव्यं
तद्वन्मृगाक्षि सहजेष्विव देवरेषु ।
ते स्नेहिनोऽपि कुपिता इतरेतरस्य
योगं विभिन्द्युरिति मे मनसि प्रतर्कः ॥ ७६ ॥

---

[1] अ. चकिते च भद्रे ।; का. चकितेव भूयाः ।

[2] अ. अनेजः ।; का. वसेकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हितोपदेशे विनिविष्टमानसौ
वधूवरौ राजपुरं समीयतुः ।
लब्धानुमानौ गुरुबन्धुवर्गतो
बभूव संज्ञोभयभारतीति ॥ ७७ ॥

सा भारती चुलुकिते भगवत्पदस्य
हस्ते जलं समदिता[1] च्छमनोहराङ्गी ।
तस्थौ मुनेस्तदनु कारणमानुषस्य
मूर्तिं शिवस्य मुदिता समुदीक्षमाणा ॥ ७८ ॥

पाथश्चिरं संदधदेव शङ्करो
न चापिबन्नापि मुमोच चिन्तया ।
तदा मनः क्षोभमियाय गेहिनः
किमेतदासीदिति चिन्तयाकुलम् ॥ ७९ ॥

भृत्यापराधोऽयमथात्मनो वा
केनेदमानायि जलं कुतो वा ।
को वार्पिपङ्क्षिक्षुपदेऽमलेऽस्मिन्
न चिन्तयन् हेतुमवैक्षतासौ ॥ ८० ॥

आनायि चैत्रेण जलं सरस्या-
स्समार्पिपत्सोभयभारतीति ।
अवादिषुस्तत्र जनास्समक्षं
ततश्शशङ्के किल विश्वरूपः ॥ ८१ ॥

नागस्कृतः परिजना न जलं न पेयं
पानीयमेव भवति ध्रुवमस्य कोपः ।
जायेत सस्मितमुखं मुनिमेनमीक्षे
हेत्वन्तरं न च यतोऽस्य पयः प्रकल्प्यम् ॥ ८२ ॥

---

[1] अ. अतिमनोहराङ्गी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं विचिन्त्य मुनिमेव पुनः प्रपेदे
निर्बन्धतोऽस्य मुनिराख्यदमुष्य हेतुम् ।
कार्यं ममास्ति यदि चात्र भवान्विदध्यात्
भुञ्जेऽन्नमक्षयमिदं प्रपिबामि पाथः ॥ ८२ ॥

कुर्वे तदत्र भवने यदि शक्यमेतत्
कर्तुं ब्रवीतु तदशङ्कितमेव भिक्षो ।
सार्धं त्वया वदितुमिच्छति मे मनोऽर्हन्
तच्चेत्प्रदास्यति भवान्प्रपिबामि पाथः ॥ ८३ ॥

[1]अत्यन्तमेतद्भवतेरितं मुने
पास्यामि पाथो यदि वाददित्सुता ।
कृतोद्यमोऽहं श्रुतवादवार्तया
चिरेप्सितोऽयं वदिता न कश्चन ॥ ८४ ॥

वादं करिष्यामि न सन्दिहेऽत्र
जयाजयौ नौ वदिता न कश्चित् ।
न कण्ठशोषैकफलो विवादो
मिथो जिगीषू कुरुतस्तु वादम ॥ ८५ ॥

वादे हि वादिप्रतिवादिनौ द्वौ
विपक्षपक्षग्रहणं विधत्तः ।
का नौ प्रतिज्ञा वदतोश्च तस्यां
किं मानमिष्टं वद किंस्वभावम् ॥ ८६ ॥

कः प्राश्निकोऽहं गृहमेधिसत्तम-
स्त्वं भिक्षुराजो वदतामनुत्तमः ।
जयाजयौ नौ सपणौ विधीयतां
ततः परं साधु वदाव सस्मितौ ॥ ८७ ॥

[1] अ० अत्यंत्यं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीविश्वरूपेण समीरितं वचः
श्रुत्वा मुनीन्द्रो मुदितोऽमृतं पपौ ।
पीत्वा यथेष्टं बुभुजेऽमृताशनं
सरस्वती सार्पयति स्म शोभना ॥ ८९ ॥

सुखोपविष्टस्य विधाय भिक्षां
पदे गृहीत्वानुमतस्य तेन ।
अभुङ्क्त शिष्टाशनमिष्टभोजी
पश्चादभुङ्क्तोभयभारती सा ॥ ९० ॥

ब्रह्मैकं परमार्थसच्चिदमलं विश्वप्रपञ्चात्मना
शुक्ती रूप्यपरात्मनेव बहुलाज्ञानावृतं भासत ।
तज्ज्ञानान्निखिलप्रपञ्चविलयात्स्वात्मन्यवस्था परं
निर्वाणार्जनमुक्तमभ्युपगतं मानं श्रुतेर्मस्तकम् ॥ ९१ ॥

बाढं जये यदि पराजयभागहं स्यां
संन्यासमङ्ग परिहृत्य कषायचैलम् ।
शुक्लं वसीय वसनं द्वयभारतीयं
वादे [1] पराजयजयप्रतिपादिकास्तु ॥ ९२ ॥

इत्थं प्रतिज्ञां कृतवत्युदारां
श्रीशङ्करे भिक्षुवरे स्वकीयाम् ।
स विश्वरूपो गृहमेधिवर्य-
श्चक्रे प्रतिज्ञां स्वमतप्रतिष्ठाम् ॥ ९३ ॥

वेदान्तो न प्रमाणं त्वतिवपुषि पदे तत्र [2] संपत्तियोगात्
पूर्वो भागः प्रमाणं पदचयगमिते कार्यवस्तुन्यशेषे ।
शब्दानां कार्यमात्रं प्रति समधिगता शक्तिरभ्युन्नतानां
कर्मभ्यो मुक्तिरिष्टा तदिह तनुभृतामायुषः स्यात्समाप्तिः
॥ ९४ ॥

---

[1] का. जयाजयफलप्रतिपादिकास्तु । [2] अ. सम्पत्प्रयोगात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वादे कृतेऽस्मिन्यदि मे पराजय-
स्त्वयोदितात्स्याद्विपरीतभावः ।
येयं त्वयाऽभूद्वदितात्र[1] साक्ष्ये
जानाति चेत्सा भविता वधूर्मम ॥ ९१ ॥

[2]इति प्रतिज्ञां [3]सपणां विधाय
वादं व्यधत्तां किल देशिकेन्द्रौ ।
कृत्वा तु वाणीमथ साक्षिभावे
जयाजयप्राप्तिविधानदक्षाम् ॥ ९६ ॥

आवश्यकं परिसमाप्य दिनेदिने तौ
वादं समं व्यतनुतां किल सर्ववेदौ ।
एवं विजेतुमनसोरुपविष्टयोस्तां
मालां गले व्यधित सोभयभारतीयम् ॥ ९७ ॥

माला यदा मलिनभावमुपैति कण्ठे
यस्यापि तस्य विजयेतरनिश्चयः स्यात् ।
उक्त्वा गृहं गतवती गृहकर्मसक्ता
[4]भिक्षाशने वितरितुं गृहिमस्करिभ्याम् ॥ ९८ ॥

अन्योन्यसञ्जयफले विहितादरौ तौ
वादं [5]विवादपरिनिर्णयमात्रनिष्ठम् ।
ब्रह्मादयस्सुरवरा अपि वाहनस्थाः
श्रोतुं तदीयसदनं स्थितवन्त ऊर्ध्वम् ॥ ९९ ॥

दिनेदिने वासरमध्यमे सा
ब्रूते पतिं भोजनकालमेव ।
समेत्य भिक्षुं समयश्च भैक्षे
दिनान्यभूवन्निति पञ्चषाणि ॥ १०० ॥

---

[1] का. गदिता प्रसाक्ष्ये ।
[2] अ. इत्थं ।
[3] अ. सपणं ।
[4] का. भिक्षाशनेऽपि कलितुं ।
[5] क. विवादपदनिर्णयमातनिष्ठाम् ।; का. विवादपणनिर्णयमातनिष्ठाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्योन्यमुत्तरमखण्डयतां [1] प्रगल्भौ
बद्धासनौ स्मितविकासिमुखारविन्दौ ।
न स्वेदवारिगगनेक्षणशालिनौ वा
न क्रोधवाक्छलमवादि निरुत्तराभ्याम् ॥ १०१ ॥

सा सप्तमे दिन उपेत्य सरस्वती तौ
संवीक्ष्य भिक्षितुमभूदुभयो [2] रनेहा ।
उक्त्वेत्थमादरधिया वचनं स्वभर्तु-
रन्तर्दधे [3] सुवदना किल शापमुक्ता ॥ १०२ ॥

स विश्वरूपो बत सत्यवादी
पपात पादाम्बुजयोर्यतीशः ।
गृहं शरीरं मम यच्च सर्वं
तवेतिवादी मुदितो महात्मा ॥ १०३ ॥

सन्यासपूर्वं विधिवद्विभिक्षे
पश्चादुपादिक्षदथात्मतत्त्वम् ।
आचार्यवर्यः श्रुतिमस्तकस्थं
तदादिवाक्यं पुनराबभाषे ॥ १०४ ॥

भूभृद्देहनिवेशनं गृहपतेर्गेहस्थभिक्षा क्रिया
वागीशाजनिपाणिपीडनमथो वादश्च तत्साक्षिकः ।
यत्राऽभाणि च [4] शङ्करेऽत्र विजये व्यासाचलप्रोदिते
षष्ठस्सर्ग उपारमद्बहुकथासम्बन्धहृद्योऽनघः ॥ १०५ ॥

। इति श्रीशङ्करविजये व्यासाचलीये
षष्ठस्सर्गः ।

---

[1] का. प्रगल्भं ।
[2] का. रनेहाः ।
[3] का. सुवसना ।
[4] अ. शङ्करेन्द्रविजये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ सप्तमस्सर्गः ॥

त्वं नासि देहो घटवद्ध्यनात्मा
रूपादिमत्त्वादिह जातिमत्त्वात् ।
ममेति भेदप्रथनादभेद-
संप्रत्ययं विद्धि विपर्ययं भोः ॥ १ ॥

लोप्यो हि [1] लोपव्यतिरिक्तलोपको
दृष्टो घटादिः किल तादृशी तनुः ।
दृश्यत्वहेतोर्व्यतिरेकसाधने
ततश्शरीरे कथमात्मतागतिः ॥ २ ॥

नापीन्द्रियाणिं खलु तानि च साधनानि
दात्रादिवत्कथममीषु तवात्मभावः ।
चक्षु[2]र्मदीयमिति भेदगतेरमीषां
स्वप्नादिभावविरहाच्च घटादिसाम्यम् ॥ ३ ॥

यद्यात्मतैषां समुदायगा स्यात्
एकव्ययेनापि भवेन्न तद्धीः ।
प्रत्येकमात्मत्वमुदीर्यते चेत्
नश्येच्छरीरं बहुनायकत्वात् ॥ ४ ॥

आत्मत्वमन्यतमगं यदि चक्षुरादे-
श्चक्षुर्विनाशसमये स्मरणं न हि स्यात् ।
एकाश्रयत्वनियमात्स्मरणानुभूत्यो-
र्दृष्टश्रुतार्थविषयाधि[4]गतिश्च न स्यात् ॥ ५ ॥

[1] का. लोप्य ।
[2] अ. ममेदमिति ।
[3] अ. वगतिश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोऽपि नात्मा करणत्वहेतो-
र्मनो मदीयं गतमन्यतोऽभूत् ।
इति प्रतीतेर्व्यभिचारितायाः
[1]सुप्तावतश्चिन्मनसो विभक्ता ॥ ६ ॥

अनयैव दिशा निराकृता
ननु बुद्धेरपि चात्मता स्फुटम् ।
अपि [2]भेदगतेरनन्वयात्
करणादावपि [3]बुद्धिमुज्झ भोः ॥ ७ ॥

नाहङ्कृतेरात्मपदप्रवादात्
प्राणा मदीया इति लोकवादात् ।
प्राणोऽपि नात्मा भवितुं प्रगल्भ-
स्सर्वोपसंहारिणि[हि]सत्सुषुप्ते ॥ ८ ॥

एवं शरीरादिविविक्त आत्मा
त्वंशब्दवाच्योऽभिहितोऽत्र वाक्ये ।
तदोदितं ब्रह्म जगन्निदानं
तथा तदैक्यं पदयुग्मबोध्यम् ॥ ९ ॥

कथं तदैक्यं प्रतिपादयेद्वच-
स्सर्वज्ञसंमूढपदाभिषिक्तयोः ।
न ह्येकता संतमसप्रकाशयोः
संदृष्टपूर्वा न च दृश्यतेऽधुना ॥ १० ॥

सत्यं विरोधगतिर[4]स्तु तु वाच्यगेयं
सोऽयं पुमानितिवदत्र विरोधहानेः ।
आदाय वाच्यमविरोधि पदद्वयं त-
ल्लक्ष्यैक्यबोधनपरं ननु को विरोधः ॥ ११ ॥

---

[1] अ. सुप्तौ च तच्चिन्मनसो विविक्ता ।
[2] का. रनन्यथात्वात् ।
[3] का. बुद्धिरुच्यते ।
[4] ख. अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]जहीहि देहाधिगतामहंधियं
चिरार्जितां कर्मचयैस्सुदुस्त्यजाम् ।
विवेकबुद्ध्या परमेव सन्ततं
ध्यात्वात्मभावेन यतो विमुक्तता ॥ १२ ॥

साधारणे वपुषि काकशृगालवह्नि-
मात्रादिकस्य ममतां त्यज दुःखहेतुम् ।
तद्वज्जहीहि बहिरर्थगताञ्च विद्वन्
चित्तं बधान परमात्मनि निर्विशङ्कम् ॥ १३ ॥

तीरात्तीरं सञ्चरन् दीर्घमत्स्यस्तीराद्भिन्नो लिप्यते नापि तेन ।
एवं देही सञ्चरन् जाग्रदादौ तस्माद्भिन्नो [2]नापि तद्धर्मको वा
॥ १४ ॥

जाग्रत्स्वप्नसुषुप्तिलक्षणमिदं[3] स्थानत्रयं चिन्तने
त्वय्येवानुगते मिथोऽव्यभिचरद्धीसंज्ञमज्ञानतः ।
क्लृप्तं रज्ज्विवदमंशके वसुमती छिद्रादिदण्डादिवत्
तद्ब्रह्मास्ति तुरीयमुज्झितभयं मा त्वं पुरेव भ्रमीः ॥ १५ ॥

[4]प्रत्यक्क्रमः परपदं विदुषोऽन्तिकस्थं
दूरं तदेव परिमूढमतेर्जनस्य ।
अन्तर्बहिश्च चितिरस्ति न वेत्ति कश्चित्
चिन्वन्बहिर्बहिरहो महिमात्मशक्तेः ॥ १६ ॥

यथा प्रपायां बहवो मिलन्ति
क्षणे द्वितीये बत भिन्नमार्गाः ।
प्रयान्ति [5]तद्वद्बहुमानभाजो
गृहे भवन्त्यत्र न कश्चिदन्ते ॥ १७ ॥

---

[1] का. जहीहि देहादिगतां ।
[2] का - नापगाधर्मको वा ।
[3] अ. पदेऽवस्थात्रयं चित्तनौ ।
[4] का. प्रत्युत्तमं ।
[5] अ. नाम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखाय [1] तैर्यत्क्रियते दिवानिशं
सुखन्न किंचिद्बहुदुःखमेव तत् ।
विना न हेतुं सुखजन्म दृश्यते
हेतुश्च हेत्वन्तरसन्निधौ भवेत् ॥ १८ ॥

परिपक्वमतेस्सकृच्छ्रुतं जनयेदात्मधियं श्रुतेर्वचः ।
परिमन्दमतेश्शनैश्शनैर्गुरुपादाब्जनिषेवणादिना ॥ १९ ॥

प्रणवाभ्यसनोक्तकर्मणोः करणेनापि गुरोर्निषेवणात् ।
अपगच्छति मानसं मलं क्षमते तत्त्वमुदीरितं ततः ॥ २० ॥

[2] मनोऽनुवर्तेत दिवानिशं गुरुं
गुरुर्हि साक्षाच्छिव एव तत्त्ववित् ।
निजानुवृत्त्या परितोषितो गुरु-
र्विनेयवक्त्रं कृपया [3] हि वीक्षते ॥ २१ ॥

सा कल्पवल्लीव निजेष्टमर्थं
फलत्यवश्यं किमकार्यमस्याः ।
आज्ञा गुरोस्सम्परिपालनीया
सा मोदमानाय विधातुमिष्टम् ॥ २२ ॥

गुरूपदिष्टा निजदेवता चेत्
कुप्येत्तदा पालयिता गुरुः स्यात् ।
रुष्टे गुरौ पालयिता न कश्चित्
गुरौ न [4] तस्माज्जनयेत कोपम् ॥ २३ ॥

पुमान् पुमर्थं लभते [5] विचोदितं
भजन्ननर्थं प्रतिषिद्धसेवनात् ।
विधिं निषेधञ्च निवेदयत्यसौ
गुरोरनिष्टच्युतिरिष्टसम्भवः ॥ २४ ॥

---

[1] अ. यद्यत्क्रियते । [2] अ. मनः प्रवर्तेत ।
[3] अ. अभिवीक्षते । [4] अ. जनयीत ।
[5] अ. हि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आराधितं दैवतमिष्टमर्थं
दद्याति [1]तस्याधिगमो गुरोस्स्यात् ।
नो चेत्कथं वेदितुमीश्वरोऽय-
मतीन्द्रियं दैवतमिष्टदं [2] नः ॥ २५ ॥

तुष्टे गुरौ तुष्यति देवतागणो
रुष्टे गुरौ रुष्यति देवतागणः ।
सदात्मभावेन [3]समस्तदेवताः
पश्यन्नसौ सर्वमयो हि देशिकः ॥ २६ ॥

एवं [4]पुराणगुरुणा परमार्थतत्त्वं
शिष्टो गुरोश्चरणयोर्निपपात तस्य ।
धन्योऽस्म्यहं तव [5]गुरो करुणाकटाक्ष-
पातेन पातिततमा इति भाषमाणः ॥ २७ ॥

मम यत्करणीयमस्ति ते त्वमिमं मामनुशाध्यसंशयम् ।
तदिदं पुरुषस्य जीवितं यदयं जीवति भक्तिमान्गुरौ ॥ २८ ॥

इतीरिते शिष्यवरेण शिष्यं
प्रोचे गरीयानतिहृष्टचेताः ।
मत्कस्य भाष्यस्य विधेयमिष्टं
निबन्धनं वार्तिकनामधेयम् ॥ २९ ॥

दृष्टं सतर्कं भवदीयभाष्यं
गभीरवाक्यं न ममास्ति शक्तिः ।
तथापि भावत्ककटाक्षपातै-[6]
र्यते यथाशक्ति निबन्धनाय ॥ ३० ॥

---

[1] अ. अधिकृतो गुरुः ; क. तत्राधिकदो गुरुः स्यात् ।
[2] अ. मिष्टदं नो ; का. मिष्टदाने ।
[3] अ. देवतां ।
[4] अ. ब्रुवाण ।
[5] अ. गुरोः ।
[6] का. पाते यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथागमच्छिष्यगणस्तदीयस्ततस्ततश्शिष्यगणास्तदीयाः[1] ।
श्रुत्वा जितं त्यक्तसमस्तशेषं श्रीविश्वरूपस्य मुदं दधानाः ॥३१॥

दृष्ट्वा गुरुं ते क्रमतः प्रणेमुस्तदीयपादाब्जरजो दधानाः ।
परस्परञ्चाददिरे ददुश्च नमस्क्रातिं दर्शनहृष्टचित्ताः ॥ ३२ ॥

कतिपयानि दिनानि न पश्यतो गुरुपदाब्जमभूद्युगसंमिता ॥
[2]अपि त्रुठिर्यतिवर्यवरस्य सा सुजनताविरहो हि सुदुस्सह
॥ ३३ ।

गुरुपदाब्जरसं पिबति स्म सा यतिजनालिरनुत्तमसारवित् ।
नयनयुग्मपुटेन निरन्तरं [3]विरहवह्नितृषैकनिराकुलाः ॥ ३४ ॥

श्रुतवती गुरुवक्त्रसरोरुहात् बहुकथाः परमात्मपदानुगाः ।
भवकथातिगता भवनाशिनीर्विगतपुण्यचयेन सुदुर्लभाः ॥३५॥

कतिपयेषु गतेषु दिनेष्वियं श्रुतवती किल भाष्यनिबन्धनम् ।
अभिनवेन करिष्यत इत्यदो यतिजनालिरसोढ न
रम्यवाक् ॥ ३६ ॥

योऽयं प्रयत्नः क्रियते हिताय हिताय नालं विफलन्त्वनर्थम् ।
प्रत्येकमेवं गुरवे निवेद्य [4]बद्धः स्वयं कर्मणि तत्परश्च ॥३७॥

यस्सार्वलौकिकमपीश्वरमीश्वराणां
प्रत्यादिदेश बहुयुक्तिभिरुत्तरज्ञः ।
कर्मैव नाकनरकादिफलं ददाति
नैवं परोऽस्ति फलदो जगतीशितेति ॥ ३८ ॥

---

[1] अ. गणस्तदीयः ।
[2] अ. तृषेव ।
[3] अ. अपि कला यति ।
[4] अ. बद्धान्, बौद्धात्। (बौद्धः स्वयं कर्मणि तत्परश्च); क. प्रत्येकमस्यगमपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्येकमस्य प्रलयं वदन्ति
पुराणवाक्यानि स तस्य कर्ता ।
व्यासो मुनिर्जैमिनिरस्य शिष्य-
स्तत्पक्षपाती प्रलयावलम्बी ॥ ३९ ॥

गुरोश्च शिष्यस्य च पक्षभेदे
कथं तयोस्स्याद्गुरुशिष्यभावः ।
तथापि यद्यस्ति स पूर्वपक्ष-
स्सिद्धान्तभावस्तु गुरूक्त एव ॥ ४० ॥

आजन्मनस्स खलु कर्मणि योजितात्मा
कुर्वन्निवास्थित दिवानिशमेव कर्म ।
ब्रूते परांश्च कुरुतावहिताः प्रयत्नात्
स्वर्गादिकं सुखमवाप्नुत[1] किं वृथाऽऽध्वे ॥ ४१ ॥

एवंविधेन क्रियते निबन्धनं
यदि त्वदाज्ञामवलम्ब्य भाष्यके ।
भाष्यं परं कर्मपरं स योक्ष्यते
प्राच्यावि कालादपि वृद्धिमिच्छता ॥ ४२ ॥

संन्यासमप्येष न बुद्धिपूर्वं
व्यधत्त [2]वादेन जितोऽवशो व्यधात् ।
तस्मान्न विश्वासपदं विभाति नो
प्राचीकरोऽनेन निबन्धनं [3]गुरो ॥ ४३ ॥

यश्शक्नुयात्कर्म विधातुमीप्सितं
सोऽयं न कर्माणि विहातुमर्हति ।
यद्यस्ति संन्यासविधौ दुराग्रहो
जात्यन्धमूकादिरमुष्य गोचरः ॥ ४४ ॥

---

[1] का. वाप्स्यथ । [2] अ. विजितो ।
[3] अ. पुरा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं सदा भट्टमतानुसारिणो
ब्रुवन्त्ययं तन्मतपक्षपातवान् ।
एवं स्थिते [1]योग्यमदो विधीयतां
न नोऽस्ति निर्बन्धनमत्र किञ्चन ॥ ४१ ॥

इत्येवमुक्त्वोपरते च शैष्ये
गणे बभाषे किल देशिकेन्द्रः ।
आसादितोऽयं महतः प्रयत्नात्
स चेन्न रोचेत न वीक्षतेऽन्यः ॥ ४६ ॥

अहं बहूनामनभीष्टकार्यं
न कारयिष्ये हि महानिबन्धनम् ।
किञ्चात्र संशीतिरभून्ममातो
यदेककार्ये बहवः प्रतीपाः ॥ ४७ ॥

भवन्निदेशाद्भगवान्स नन्दनः
करिष्यते भाष्यनिबन्धमीप्सितम् ।
स ब्रह्मचर्यादुररीकृताश्रमो
मतिप्रकर्षो विदितो हि सर्वतः ॥ ४८ ॥

स नन्दनो नन्दयिता जनानां
निबन्धमेकं विदधातु भाष्यके ।
न वार्तिकं तत्र परप्रतिज्ञां
[2]व्यधात्प्रतिज्ञासहितात्मदीक्षः ॥ ४९ ॥

आदिश्येत्थं शिष्यसङ्घं यतीन्द्रः
प्रोवाचेत्थं नूत्नभिक्षुं रहस्तम् ।
भाष्ये भिक्षो मा कृथा वार्तिकं त्वं
नेमे शिष्यास्त्सेहिरे दुर्विदग्धाः ॥ ५० ॥

---

[1] अ. अथो ; क. अतो ।

[2] अ. प्रतिज्ञां सहि नूत्नदीक्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्पर्यं ते गेहिधर्मेषु दृष्ट्वा
तत्संस्कारं साम्प्रतं शङ्कमानाः ।
भाष्ये कृत्वा वार्तिकं योजयेत्स
भाष्यं प्रायस्स्वीयसिद्धान्तशेषम् ॥ ५१ ॥

नास्त्येवासावाश्रमस्तुर्य इत्थं
सिद्धान्तोऽयं तावको वेदसिद्धः ।
द्वारि द्वाःस्थैर्वारितो भिक्षमाणा
वेश्मान्तस्ते न प्रवेशं लभन्ते ॥ ५२ ॥

इत्याद्यां तां किंवदन्तीं विदित्वा
तेषां नासीत्प्रत्ययस्त्वय्यनल्पे ।
स्वातन्त्र्याच्चं ग्रन्थमेकं महात्मन्
कृत्वा [1]मह्यं दर्शय [2]स्वात्मनिष्ठम् ॥ ५३ ॥

विद्वन्यद्वत्प्रत्ययः स्यादमीषां
शिष्याणां नो ग्रन्थसन्दर्शनेन ।
इत्थं प्रोक्तस्सोऽल्पकालेन भिक्षुः
ग्रन्थं कृत्वा दर्शयामास तस्मै ॥ ५४ ॥

ग्रन्थं दृष्ट्वा मोदमानो यतीन्द्र-
स्तच्चान्येभ्यो दर्शयामास हृद्यम् ।
तेषाञ्चासीत्प्रत्ययस्तद्वदासिन्
यद्वच्चान्यस्तत्त्वविद्यस्स तेन ॥ ५५ ॥

यत्राद्यापि श्रूयते मस्करीन्द्रै-
र्निष्कामात्मा यत्र नैष्कर्म्यसिद्धिः ।
तन्नाम्नायं पप्रथे ग्रन्थवर्य-
स्तन्माहात्म्यात्सर्वलोकादृतोऽभूत् ॥ ५६ ॥

---

[1] का. मार्गं । [2] अ. का. अध्यात्मनिष्ठम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचार्यवाक्येन विधित्सितेऽस्मिन्
विघ्नं [1]यदन्ये व्यधुरुत्ससर्ज ।
[2]शापं ततोऽस्मिन्कृतमप्युदारै-
स्तद्वार्तिकं न प्रसरेत्पृथिव्याम् ॥ ५७ ॥

नैष्कर्म्यसिद्ध्याख्यनिबन्धमेकं
कृत्वात्मपूज्याय निवेद्य शप्त्वा ।
विश्वासमुत्पाद्य पुनर्बभाषे
स विश्वरूपो गुरुमात्मदैवम्[3] ॥ ५८ ॥

न ख्यातिहेतोर्न च लाभहेतो-
र्नाप्यर्चनायै विहितः प्रबन्धः ।
नोल्लङ्घनीयं वचनं गुरूणां
नोल्लङ्घने स्याद्गुरुशिष्यभावः ॥ ५९ ॥

पूर्वं गृही[4] त्वेव न तत्स्वभावो
न बाल्यमन्वेति हि [5]यौवनं तत् ।
न यौवनं वृद्धमुपैति तद्वत्
व्रजन्हि पूर्वस्थितिमौज्झच्च गच्छेत् ॥ ६० ॥

अहं गृही नात्र विचारणीयं
किं तेन पूर्वं मन एव हेतुः ।
बन्धे च मोक्षे च मनोविशुद्धो
गृही भवेद्वा उत मस्करी वा ॥ ६१ ॥

नास्त्येव चेदाश्रम उत्तमादिः
कथञ्च तत्प्राप्तिनिवृत्तिकामी ।
प्रतिश्रवौ नौ कथमल्पकालौ
न हि प्रतिज्ञा भगवन्निरुद्धा[6] ॥ ६२ ॥

---

[1] अ. यदान्वे ।
[2] अ. शापं विधाता ; क. शापः कृतोऽस्मिन् कृतमप्युदारैः ।
[3] अ. देवम् ।
[4] अ. गृहीत्येव ।
[5] का. यौवनेन ।
[6] का. निरूढा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संभिक्षमाणा न लभन्त एव चे-
दृहप्रवेशं गुरुणा प्रवेशम् ।
कथं च भिक्षा विहिता निकेतने
को नाम लोकस्य [1]मुखाभिधायकः ॥ ६३ ॥

तत्त्वोपदेशाद्विदितात्मतत्त्वो
व्यधामहं संन्यसनं कृतात्मा ।
विरागभावान्न पराजितस्तु
वादो हि तत्त्वस्य विनिर्णयाय ॥ ६४ ॥

पुरा गृहस्थेन मया प्रबन्धा
[2]नैयायिकादौ विहिता महार्थाः ।
नातः परं मे हृदयं चिकीर्षु
त्वदङ्घ्रिसेवामतिलङ्घ्य किञ्चित् ॥ ६५ ॥

भावानुकारिमृदुवाक्यनिवेदितार्थं [3]
स्वीयैः पदैस्सह निराकृतपूर्वपक्षम् ।
सिद्धान्तयुक्तिविनिवेशिततत्स्वरूपं
दृष्ट्वाभिनन्द्य परितोषभरादवोचत ॥ ६६ ॥

सत्यं यदात्थ [4]विनयन् मम याजुषीय-
[5]शाखा तदन्तगतभाष्यनिबन्ध इष्टः ।
तद्वार्तिकं मम कृते भवता प्रणेयं
सच्चेष्टितं परहितैकफलं प्रसिद्धम् ॥ ६७ ॥

तद्वत्त्वदीया खलु काण्वशाखा
ममापि तत्रास्ति तदन्तभाष्यम् ।
तद्वार्तिकञ्चापि विधेयमिष्टं
परोपकाराय सतां प्रवृत्तिः ॥ ६८ ॥

---

[1] अ. अपिधायकः ।
[2] अ. यन्न्यायगर्भा ।
[3] अ. निवेशितार्थं ।
[4] का. विनयी ।
[5] अ. तदग्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]अत्रोभयत्र कुरु वार्तिकमप्रधृष्यं
येनोभयोरुपनिषद्धृदयं स्फुटं स्यात् ।
मा शङ्कि पूर्वमिव दुश्शठवाक्यरोधो
मद्वाक्यमेव शरणं व्रज [2]मातिचारीः ॥ ६९ ॥

इत्थं स उक्तो भगवत्पदेन
श्रीविश्वरूपो विदुषां वरिष्ठः ।
चकार भाष्यद्वयवार्तिके द्वे
ह्याज्ञा गुरूणां ह्यविचारणीया ॥ ७० ॥

स नन्दनो नाम गुरोरनुज्ञया
भाष्यस्य टीकां व्यधितेरितः पराम् ।
यत्पूर्वभागः किल पञ्चपादिका
तच्छेषगा वृत्तिरिति प्रथीयसी ॥ ७१ ॥

स जात्वयाचिष्ट गुरोरनुज्ञां
स्वतीर्थयात्रां बहुमन्यमानः ।
देया गुरो मे भगवन्ननुज्ञा
देशान् दिदृक्षे बहुतीर्थयुक्तान् ॥ ७२ ॥

सत्क्षेत्रवासो निकटे गुरोर्वा
वासस्तदीयाङ्घ्रिजलञ्च तीर्थम् ।
गुरूपदेशेन यदात्मवृत्ति-[3]
स्सैव प्रशस्ताखिलदेवदृष्टिः[4] ॥ ७३ ॥

शुश्रूषमाणेन गुरोस्समीपे
स्थेयं न येयं स ततोऽन्यदेशे ।
विशिष्य मार्गश्रमकर्शितस्य
निद्राभिभूत्या किमु चिन्तनीयम् ॥ ७४ ॥

---

[1]अ. तत्र । [2]अ. विचारीः ।
[3] अ. दृष्टिः । [4]अ. देशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विधा हि संन्यास उदीरितो हि
विद्वुद्दतत्त्वस्य च तद्बुभुत्सोः ।
तत्त्वंपदार्थैक्य उदीरितेऽयं
यत्नात्त्वमर्थः परिशोधनीयः ॥ ७५ ॥

सम्भाव्यते क्व च जलं क्व च नास्ति पाथः
शय्यास्थलं क्वचिदिहास्ति न च क्वचास्ति ।
शय्यास्थलीजलनिरीक्षणसक्तचेताः
पान्थो न शर्म लभते कलुषीकृतात्मा ॥ ७६ ॥

ज्वरातिसारादि च रोगजालं
बाधेत चेत्तत्र च कोऽभ्युपायः ।
स्थातुञ्च गन्तुञ्च न पारयेत
तदा सहायोऽपि विमुञ्चतीमम् ॥ ७७ ॥

स्नानं प्रभाते क्व च देवतार्चनं
क्व चोक्तशौचं क्व च वा समाधयः ।
क्व चाशनं कुत्र च मित्रसङ्गतिः
पान्थो न चान्नं लभते क्षुधातुरः ॥ ७८ ॥

नास्त्युत्तरं गुरुवचस्तदपीह वक्ष्ये
सत्यं यदाह भगवान् गुरुपार्श्ववासः ।
श्रेयानिति प्रथमसंयमिनामनेकान्
देशानवीक्ष्य हृदयं न निराकुलं मे ॥ ७९ ॥

सर्वत्र न क्वापि जलं समस्ति
पश्चात्पुरस्तादथ वा विदिक्षु ।
मार्गोऽपि विद्येत न सुव्यवस्थः
सुखेन पुण्यं क्व नु लभ्यतेऽधुना ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मान्तरार्जितमघं फलदानहेतो-
र्व्याध्यात्मना जनिमुपैति न नो विवादः ।
साधारणादिह च वा परदेशके वा
कर्म ह्यभुक्तमनुवर्तत एव जन्तुम् ॥ ८१ ॥

इह स्थित वा परतःस्थितं वा
कालो न मुञ्चेत्समयागतश्चेत् ।
तद्देशगत्यामृत देवदत्त
इत्यादिकं मोहकृतं जनानाम् ॥ ८२ ॥

मन्वादयो मुनिवराः खलु धर्मशास्त्रे
धर्मादि [1] सङ्कुचितमाहुरतिप्रकृष्टम् ।
देशाद्यवेक्ष्य न तु तत्सरणिं गतानां
शौचाद्यतिक्रमकृतं प्रभवेदघं नः ॥ ८३ ॥

दैवेऽनुकूले विपिनं गतो वा
समाप्नुयाद्वाञ्छितमन्नमेषः ।
ह्रियेत नश्येदथ वा पुरस्थं
तस्मिन्प्रतीपे तत एव सर्वम् ॥ ८४ ॥

गृहं परित्यज्य विदेशगो ना
सुखं समागच्छति तीर्थदृश्वा ।
गृहं गतो याति मृतिं पुरस्तात्
[2]सदागमादत्र च किं निमित्तम् ॥ ८५ ॥

देशे कालेऽवस्थितं तद्विमुक्तं
ब्रह्मानन्दं पश्यतां तत्र तत्र ।
चित्तैकाग्र्ये विद्यमाने समाधि-
स्सर्वत्रासौ दुर्लभो नेति मन्ये ॥ ८६ ॥

---

[1] अ. आहुरिति प्रसिद्धम्; क. आहुरतिप्रवृद्धम् ।
[2] अ. तदागमात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्तीर्थसेवा मनसः प्रसादिनी
देशस्य वीक्षा मनसः कुतूहलम् ।
क्षिणोति [1]चार्थान् स्वजनेन सङ्गम-
स्तस्मान्न कस्मै भ्रमणं विरोचते ॥ ८७ ॥

अटाट्यमानोऽपि [2]विदेशसङ्गतिं
लभेत [3]विद्वान्विदुषाभिसङ्गतिम् ।
बुधो बुधानां [4]खलु [5]मित्रमीरितं
खलेन मैत्री न चिराय तिष्ठति ॥ ८८ ॥

समीपवासोऽयमुदीरितो गुरो-
र्विदेशगं यद्धृदयेन धारयेत् ।
समीपगोऽप्येष न संस्थितोऽन्तिके
न भक्तिहीनो यदि धारयेद्धृदि ८९ ॥

सुजनस्सुजनेन सङ्गतः परिपुष्णाति मतिं शनैःशनैः ।
परिपुष्टमतिर्विवेकभाक् स्यात्, शनकैर्हेयगुणं समुज्झति ॥९०॥

यद्याग्रहोऽस्ति तव तीर्थनिषेवणायां
विघ्नो मयात्र न खलु क्रियते पुमर्थे ।
चित्तस्थिरत्वगतये विहितो निषेधो
मा भूद्विशेषगमनन्त्वतिदुःखहेतुः ॥ ९१ ॥

नैको मार्गे बहुजनपदक्षेत्रतीर्थानि याया-
श्चोराध्वानं परिहर सुखन्त्वन्यमार्गेण याहि ।
विप्राग्र्याणां वसतिवित्तिर्यत्र वस्तव्यमीष-
न्नो चेत्सार्धं परिचितजनैश्शीघ्रमुत्तिष्ठ [6] देशम् ॥ ९२ ॥

---

[1] अ. वार्थान् सुजनेन ।
[2] का. विदेशसंहतिं ।
[3] अ. विदुषोऽपि ।
[4] क. सुख ।
[5] का. मीरितः ।
[6] अ. उद्दिष्ट । का. अन्यत् त्वदेशम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सद्भिस्सङ्गो विधेयस्स हि सुखनिचयं सूयते सज्जनानां
अध्यात्मैक्यं कथास्ते घटितबहुरसाः श्राव्यमाणाः प्रशान्तैः ।
[1]कायक्लेशं विभिन्द्युस्सततमघभिदः श्रान्तविश्रामवृक्षाः
स्वान्तश्रोत्राभिरामाः परिमृदिततृषः क्षोभितक्षुत्कलङ्काः
॥ ९३ ॥

सत्सङ्गोऽयं बहुगुणयुतोऽप्येकदोषेण दुष्टो
[2]यत्स्वान्तेऽयं तपति च परं सूयते दुःखजालम् ।
खस्या सङ्गो वसति समये शर्मदः पूर्वकाले
प्रायो लोके सततविमलं नास्ति निर्दोषमेकम् ॥ ९४ ॥

मार्गे वास्या न बहुदिवसान् पाथसस्सङ्ग्रहः स्यात्
तस्माद्दोषो जिगमिषितपदप्राप्तिनिघ्नस्ततः[3] स्यात् ।
[4]प्राप्योद्दिष्टं दिवससरसं तत्र कार्यस्य सिद्धे-
र्मूलाद्भ्रंशोऽप्यभिमतपदप्राप्त्यभावोऽन्यथा हि ॥ ९४ ॥

मार्गे चोरा निकृतिवपुषस्संवसेयुस्सहैव
छन्नात्मानो बहुविधगुणैस्संपरीक्ष्याः प्रयत्नात् ।
दैवं वस्त्रं लिखितमथ वा दुर्विधा नेतुकामा
विश्वासोऽतोऽपरिचितनृषु प्रोज्झनीयो न कार्यः ॥९६॥

मध्येमार्गं योजनाभ्यन्तरे वा
तिष्ठेयुश्चेद्भिक्षवस्तेऽभिगम्याः ।
पूज्याः पूज्यास्तद्व्यतिक्रान्तिरुष्टाः
श्रेयःकार्यं निष्फलीकर्तुमीशाः ॥ ९७ ॥

इत्थं गुरोर्मुखगुहोदितवाक्सुधां तां
आपीय हृष्टहृदयस्सुमुखः[5] प्रतस्थे ।
आट क्षितिं बहुविधां प्रयतान्तरात्मा
तीर्थेषु तीर्थकवरो व्रजितो न्यमाङ्क्षीत् ॥ ९८ ॥

---

[1] का. ध्यायन्तीशं विभिन्द्युः सततभयमिदः ।
[2] अ. यत्स्वान्तोऽयं । [3] का. विघ्न ।
[4] अ. पायोद्दिष्टं निवस । [5] अ. स मुनिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आससाद शनकैर्दिशं मुने-
र्यस्य जन्म वसुधा घटी स्मृता ।
संस्मृतिस्सकलरोगनाशिनी
योऽपिबज्जलाधिमेकबिन्दुवत् ॥ ९९ ॥

अद्राक्षीत्सुभगा हि भूषिततनुः श्रीकालहस्तीश्वरं
लिङ्गे सन्निहितं दधानमनिशं चान्द्रीं कलां मस्तके ।
पार्वत्या करुणारसार्द्रमनसा श्लिष्टं प्रमोदास्पदं
देवैरिन्द्रपुरोगमैर्जय जयेत्याभाष्यमाणं मुनिः ॥ १०० ॥

स्नात्वा सुवर्णमुखरीसलिलाशयेऽन्त-
र्गत्वा पुनः प्रणमति स्म शिवं भवान्या ।
आनर्च भावकुसुमैर्मनसा नुनाव
स्तुत्वा च तं पुनरयाचत तीर्थयात्राम् ॥ १०१ ॥

श्रीकालहस्तिपपदात्पुनराव्रजत्स
काञ्चीपुरं पुरवरं मुनिराजगाम ।
निर्वाणधाम कथयन्ति महाव्रता यत्
संसारसागरमनुत्तरमुत्तितीर्षोः ॥ १०२ ॥

कष्टो दुष्टो भूसुरो वानरो वा
विट् शूद्रो वा चान्त्यनोऽनन्त्यजो वा ।
आसाद्येदं क्षेत्रवर्यं शरीरं
त्यक्त्वाऽऽप्नोति व्यक्तमन्ते विमुक्तिम् ॥ १०३ ॥

अनेकजन्मप्रदकर्म कृत्वा
पुमान् विमुक्तः खलु पुण्यलेशात् ।
आगत्य सत्क्षेत्रमिदं वितन्वन्
नाशं तनोरन्त उपैति मुक्तिम् ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असंशयं निर्वृतिरेव पुंसां
क्षेत्रान्तराले त्यजतां शरीरम् ।
अन्तश्शिरा बाह्यगरिष्ठदेहो
मृतोऽपि निर्वाणपदं प्रयाति ॥ १०५ ॥

कश्चित्पुराऽमृत पुरे कृतसन्निवेशः
तं चोभयेऽपि परिवव्रुरथाच्युतीयाः ।
याम्याश्च नेतुमनसस्तमिदं स्वधाम
जित्वा मिथः स्वपतिशासनभीरवस्ते ॥ १०६ ॥

सन्धौ मुमूर्षोरुपशीर्षमेके
यमस्य दूता बहिरेव विष्ठाः ।
अन्योन्यमेषां कलहो बभूव
जिघृक्षतामेकमनेकरूपम् ॥ १०७ ॥

सर्वस्य गात्रस्य शिरः प्रधानं
शिरो निधायामृत पूरुषोऽत्र ।
मृतोऽस्मदीयो न विचार्य किञ्चित्
मा कार्ष्ट मूढाः [1] परिशासनाज्ञाः ॥ १०८ ॥

अन्तर्मृतो वा बहिरेव वा स्यात्
मृतस्य सर्वस्य यमोऽधिपो हि ।
स ह्येवमाशास्ति दिनेदिनेऽस्मान्
मृतानमूनानयतेति शीघ्रम् ॥ १०९ ॥

[2] मर्ता जन्तुर्बहुविधविधि [3] नारिकस्थानमेति
स्वर्गं लोकं सुकृतवशगोऽप्येति नैकान्त एषः ।
हीने देशे बत मृतवतां प्रेतपः स्यान्नियन्ता
नायं वस्तु भवति द्विनगृहे योग्यतावान् कथञ्चित्
॥ ११० ॥

---

[1] का. पतिशासनाज्ञाः । [2] अ. मर्त्यो ।
[3] अ. गतिर्नारकं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपसरत सुदूरं दूतका नात्र कार्यं
पृथुतरदृढमुष्ट्या ताडनं वः प्रदद्मः ।
सरसिजनयनो नश्शासिता शास्ति कालं
वयमिह भवतां नो कारकाः शासनस्य ॥ १११ ॥

व्यापद्गतोऽयं बहुकण्टकायां
क्षितौ न हीनो बहुपातकश्च ।
मुञ्चैनमस्मात्प्रभवो न गन्तुं
क्रुध्येद्यमोऽस्मभ्यमनिन्दितात्मा ॥ ११२ ॥

निर्वाणकाले शिवनामकीर्तनं
[1]नारायणस्य स्मरणञ्च नाद्य ।
निर्याति पापाधमपूरुषोऽयं
तस्मात्कथं संयमिनीं न पश्येत् ॥ ११३ ॥

अन्तस्सन्धौ तनुविगलने निर्वृतिः प्राप्यतेऽद्धा
काश्यां कश्चिन्नर इह तनुं त्यक्तवांश्चेत्स किं न ।
[2]मुक्तो मुक्तेस्समय इव वा क्षेत्रभावस्तयोस्स्यात्
काशीकाञ्च्योरिह मृतहृतौ योग्यता वो न काचित्
॥ ११४ ॥

सत्यं मुक्तिर्भवति न चिरात्तारकब्रह्मदेशात्
काश्यां पुंसस्समतनुलतां वैधवीं बिभ्रते च ।
तद्वन्मुक्तिप्रसरणगतिर्नास्ति वेदाप्तवाक्यात्
कस्मात्साम्यं [3] वदत युगले नास्ति तस्माद्धरामः ॥११५॥

सत्यं विशेषोऽत्र विनोपदेशं
प्रपद्यते ब्रह्मपदं पुमान्यत् ।
काञ्ची महिम्नैव ददाति मुक्तिं
मृताय सम्पत्तियुतं तदन्यत् ॥ ११६ ॥

[1] अ. णानु ।
[2] अ. मुक्तौ मुक्ते सम इव वरक्षेत ।
[3] का. वरदयुगले ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यप्यनेन बहुजन्मफलप्रदानि
सम्पादितानि बहुजन्मसु दुष्कृतानि ।
भस्मीकृतानि कृतनिष्कृतिकानि तानि
काञ्चीपुरेऽत्र मरणेन सुदुर्लभेन ॥ ११७ ।

अथापसस्रुर्विजिता निरुत्तरा
यमस्य दूतास्त्रपया पराङ्मुखाः ।
किमद्य नः प्रेतपतिः करिष्यते
ऽकृतात्मकार्यानिति चिन्तयाऽऽकुलाः ॥ ११८ ॥

अथ ययू रुषिता यमकिङ्कराः
स्वपतिमेव पराभवलज्जिताः ।
सरसिजाक्षजनैरभिपीडिताः
निजगदुर्हरिपूरुषचेष्टितम् ॥ ११९ ॥

अमृत देव नरो रशनापुरे
हरिजनैरजनीह विवादिता ।
उपनिधाय शिरोऽन्तरधात्तनुं
पुरवरस्य [1]बहिष्युपदिष्ट सः ॥ १२० ॥

इह निनीषुरयं जन आगम-
द्धरिजनः [2]स्वपुराद्विहितोद्यमः ।
[3]स्वभवनाय निनाय बलादमुं
तव जनस्तव [4]पार्श्वमुपागतः ॥ १२१ ॥

किमु विधेयमतः परमीयुषां
परिजनः प्रभुशासनगोचरः ।
न च विधातुमनीरितमीश्वराः
स्वमतिवैभवतो मतिदुर्विधाः ॥ १२२ ॥

---

[1] का. पुनर्ह्युपदिर्श्य सः ।
[2] अ. च्चयः ।
[3] अ. स्वभवनं स ।
[4] अ. मुपागमत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तु जनो नयति स्म मृतं पुरे
हरिबलाश्रयणेन निगर्वितः ।
हरिजनान्न पराजितिरस्ति व-
स्स हि [1]पतिर्जगतोऽस्य ममापि च ॥ १२३ ॥

किमपि नेच्छति कर्तुमुदारधी-
[2]स्सति नये तदतिक्रमणेन सः ।
यदि करोति तथापि [3]समीक्ष्य तं
हरिगुरुं सहनीयमुपाहितम् ॥ १२४ ॥

परिजनं रहसि स्थितमन्वशा-
रिपतृपतिः [4]पितृवत्सलवत्सलम् ।
कुरुत यस्स्वपतेर्हितमादरा-
दितरदुज्झत कृत्यपरायणाः । १२५ ॥

पशुपतिर्मधुजित्कुलदेवते
नमत मामिव ते प्रतिवासरम् ।
तदुभयाश्रितमुक्तिपुरादिकं
त्यजत सज्जनसेवितमद्भुतम् ॥ १२६ ॥

हरिहराङ्घ्रिसरोजनिषेविण-
स्त्यजत मानवियोगगतान्परम् ।
मम निदेशमनन्यगतात्मनः
परिजनाः परिपश्यत सादरम् ॥ १२७ ॥

शिवशिवेति वदंस्त्यजतीह य-
स्तनुमिमां बहुपुण्यसमाश्रयाम् ।
विपिनगस्त्वथ वा गृहसंश्रय
स्त्यजत दूरत एव गतैनसम् ॥ १२८ ॥

[1] क. गतिः ।
[2] का. स्थितिनयः ।
[3] अ. समीक्षितं ।
[4] अ. वत्सकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरहरेति हरेति हरेति वा
वदति यो मृतिकाल उपागते ।
अपगताघमनुत्तमभागिनं
त्यजत तं पुरुषं मम शासनात् ॥ १२९ ॥

हरिरिति स्फुटवर्णयुगं तनो-
रवसितौ गदतीह सवासनम् ।
प्रभुमिम हरिलोकसमाप्तये
त्यजत मुक्तिपदं हतसंशयाः ॥ १३० ॥

श्रुतिशिरश्श्रवणादिनिषेविणं
विविदिषुं परमार्थपदं गुरोः ।
सुपरिपक्वमतिं विजितेन्द्रियं
त्यजत मे यदि शासन आदरः ॥ १३१ ॥

शिवचरणसरोजसक्तचेताः
परिदृढभक्तिरनन्यगोचरो यः ।
परिवदति हरिं तदीयभक्तं
नयत भटा मम लोकमेव सद्यः ॥ १३२ ॥

हरिचरणसरोजपक्षपाती
परिदृढभक्तिरनन्यगोचरो यः ।
परिवदति हरं तदीयभक्तं
नयत भटा मम संनिधिं नरं तम् ॥ १३३ ॥

त्यजति निजवधूं परस्य दारान्
परिभजते मदनालसो नरो यः ।
विहितसृणिविमुक्तचित्तमेनं
तदितरमार्गगतं नयन्तु भृत्याः ॥ १३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]जलनिकट उपागतं तृषार्तं
पशुगणमुग्रमना निवारयेद्यः ।
परिदलितशरीरसन्धिमेनं
नयत पुरं पथि ताडयन्त एव ॥ १३५ ॥

पितृसुतगुरुशिष्यहार्दभेदी
पिशुनकभावमुपेत्य यो दुरात्मा ।
तमपि मम कथञ्चिदुग्रचित्तं
नयत पुरं वितुदन्त एव जिह्वाम् ॥ १३६ ॥

सुरपितृमनुजान्न तर्पयेद्य-
स्सरसमलं स्वयमत्ति भोजनं ना ।
स च निरुदकवर्त्मनैव नेयो
निरयपदं [2]तृषितः क्षुधार्त एव ॥ १३७ ॥

प्रभुरपि न बिभर्ति बन्धुवर्गं
स्वयमतुलां मुदमेति भोगजालैः ।
स तु निरयपदं प्रवेशनीयः
कुमतिरसौ मम दर्शने न तिष्ठेत् ॥ १३८ ॥

निखातां स्वक्षेत्रे कुमतिरपहर्तुं दृढशिलां
परक्षेत्रे लोभाद्दृढमुदखनन्ये कपटिनः ।
नरास्ते दण्ड्या वो विदलितमदास्साधुनिरयं
समानेया घोरं बहुलतमसं दुःखदशिलाम् ॥ १३९ ॥

यस्संसृतिं [3]परिजिहासुर[4]वारुरोह
तुर्याश्रमं पुनरमुञ्चत मुक्तिमार्गम् ।
यो वा बहिर्मुखतया न करोति शास्त्र-
चिन्तामुभौ मम पुरातिथिभावयोग्यौ ॥ १४० ॥

---

[1] अ. निकटं ।
[2] अ. क्षुधितस्तृषार्त एव ।
[3] का. परिजिघांसु ।
[4] अ. रुपारुरोह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योवा प्रतिश्रुत्य पुनर्न दत्ते
दत्तं पुनर्वा हरते स्म योऽपि ।
तावप्युभौ दुर्विधतां प्रयातः
प्रेत्याशु पात्यौ निरयं महान्तम् ॥ १४१ ॥

द्विजस्य हत्या गुरुतल्पसेवा
पानं सुरायाः कनकस्य चौर्यम् ।
तत्कर्तृसङ्गश्च महान्ति शास्त्रे
पञ्चातिपापानि निनिष्कृतीनि ॥ १४२ ॥

कृतोपकारं न हि वेत्ति यश्च
विश्वासिनं घातयतीह यो वा ।
न [1]निष्कृतिश्चोदितमस्ति शास्त्रे
तयोस्तु तद्दुर्गतिरेव साक्षात् ॥ १४३ ॥

इत्थं भृत्यानन्वशाद्धर्मराज-
स्तच्च स्वेभ्यो भिक्षुराजश्शशंस ।
तन्माहात्म्ये वर्णिते क्षेत्रवर्ये
भक्तिः श्रद्धा जायते मानुषाणाम् ॥ १४४ ॥

प्रत्यादेशि च यत्र देहकरणप्राणात्मनामात्मता
लक्ष्यार्थैक्यमुदीरितं शिवगुरुः प्राशंसि शिष्यार्ययोः ।
संवादो विजयेऽत्र शङ्करपदे सर्गो गतस्सप्तमो
यत्राभाणि च काञ्चिका समहिमा श्रीकालहस्तीश्वरः
॥ १४५ ॥

। इति श्रीशङ्करविजये व्यासाचलीये
सप्तमस्सर्गः ।

3098

[1] अ. निष्कृतेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

। अथ अष्टमस्सर्गः ॥

एकाम्रनाथं जगदेकनाथं ददर्श भाग्यातिशयेन गम्यम् ।
देवीञ्च धामान्तरगां शिवस्य जिज्ञासमानामिव तस्य हार्दम्
॥ १ ॥

ततोऽल्पदूरे निवसन्तमच्युतं पुराणमैक्षिष्ट मनोहराकृतिम् ।
अल्लालनाथं कमलालयापतिं तुतोष दृष्ट्वा करुणार्द्रमानसम्
॥ २ ॥

पुण्डरीकपुरमाययौ मुनिर्यत्र नृत्यति सदाशिवोऽनिशम् ।
वीक्षते प्रकृतिरादिमाश्रिता पार्वतीपरिणतिश्शुचिस्मिता ॥३॥

ताण्डवं मुनिजनोऽत्र वीक्षते दिव्यचक्षुरमलाशयोऽनिशम् ।
जन्ममृत्युभयभेदिदर्शनान्नेत्रमानसाविमोदकारकम् ॥ ४ ॥

किञ्चात्र तीर्थमिति भिक्षुगणेन कैश्चि-
त्पृष्टोऽब्रवीच्छिवपदाम्बुजसक्तचेताः ।
संप्रार्थितः करुणयाऽस्मरदत्र गङ्गां
देवोऽथ संन्यधित दिव्यसरित्सुतीर्थम् ॥ ५ ॥

शिवाज्ञयाभूदिति तीर्थमेतत्
शिवस्य गङ्गेति वदन्ति लोके ।
स्नानादमुष्यां विधुतोरुपापाः
शनैश्शनैस्ताण्डवमीक्षमाणाः ॥ ६ ॥

शिवस्य नाट्यश्रमकर्शितस्य
श्रमापनोदाय विचिन्तयन्ती ।
[1] शिवैव गङ्गा परिणामगाभू-
त्ततोऽथवैतत्प्रथितं तदाख्यम् ॥ ७ ॥

---

[1] अ - शिवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्राम्यत्तीरहतस्खलज्जलगतेः पर्यापतद्बिन्दुकात्
पार्श्वेनावसते विनोदवशतो यज्जह्नुकन्यापयः ।
नृत्यं तन्वाति धूर्जटौ विगलितं प्रेङ्खज्जटामण्डला-
त्तेनैतच्छिवजाह्नवीति कथयन्त्यन्ये विपश्चिज्जनाः ॥८॥

स्नायं स्नायं तीर्थवर्येऽत्र नित्यं
वीक्षं वीक्षं देवपादाब्जयुग्मम् ।
शोधं शोधं मानसं मानवोऽसौ
वीक्षेतेदं ताण्डवं शुद्धचेताः ॥ ९ ॥

परिवर्णयितुं क्षमेत पुण्यं
पुरवैरी स्वयमेव तस्य शुद्धम ।
विनिमज्य शिवे शिवादिगङ्गा
जलराशौ समुदीक्षते शिवं यः ॥ १० ॥

प्रणिपतन् शिवपादसरोरुहे
परिपतन् शिवतीर्थजले सदा ।
अधिगार्तिं विरहय्य परात्मगां
भवमहार्णवपारमुपैति सः ॥ ११ ॥

[1] पञ्चाक्षरं जपति लक्षमनन्यभाव-
स्तीर्थाप्लुतश्शिवमनुग्रमुदीक्षमाणः ।
निर्धूय पापमखिलं परिशुद्धचित्तो
मर्त्यः प्रयाति शिवभूयमनन्यमृग्यम ॥ १२ ॥

ना हीनजन्मा [2]प्रविमूढचेताः
कृतोरुपापोऽपि यतःकुतश्चित् ।
पुरं पुरारेरिदमप्यमर्त्य
स्त्यजेच्छरीरं यदि मुक्तिभाक् स्यात् ॥ १३ ॥

[1] अ. पञ्चाक्षरीं । [2] अ. परिभूढ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णवादयस्सुरगणा अभिगम्य तीर्थं
स्नात्वाभिवीक्ष्य शिवमादरतोऽर्चयित्वा ।
संप्रार्थ्य भक्तिमचलां शिवपादपद्मे
स्वं धाम यन्ति सततं किमु मर्त्यमुख्याः ॥ १४ ॥

शतयोजनदूरगोऽपि य-
श्शिवगङ्गेति वदन्निमज्जति ।
स तु दूरगदुष्कृतो भवेत्
किमु [1]पश्यन्नुभयं पुरःस्थितम् ॥ १५ ॥

यन्निरूपणविधावुपर्यधो-
ऽगच्छतां हरिविधी सनातनौ ।
यच्च नोदयति नास्तमेति वा
ज्योतिरुत्सरति तादृशं त्विह ॥ १६ ॥

अनुदितास्तमितमेकमुज्ज्वलं
ज्योतिरुत्थितमितो महात्रतम् ।
[2]परिहसन्ति [3]वदत्यपमानगा-
स्ते विशन्ति शिवतत्त्वसंस्थितिम् ॥ १७ ॥

प्रावृट्तोयदसंनिभश्शशभृतं बालं दधन्मस्तके
दिक्षु व्याप्तदीर्घबाहुवलयस्सर्वाङ्ग[4]भूषाचितः ।
पूर्णानन्दघनो विदूरगमलो नृत्यन्सहासो युवा
व्याघ्रत्वक्परिधानवान्विजयते क्षेत्रे भवानीपतिः ॥ १८ ॥

इतीरितश्शङ्करयोजितात्मा
केनापि भिक्षुर्मुदितो जगाहे ।
तीर्थे तदाप्लुत्य ननाम शम्भो-
रङ्घ्री जितात्मा भुवनस्य गोप्तुः ॥ १९ ॥

---

[1] का. नभयं पुरस्थितं ।
[2] का परिहरन्ति ।
[3] अ. ददत्यपि मानवा ।
[4] अ. भूषार्चितः ; का. भूषोज्वल ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामसेतुगमनाय सन्दधे मानसं मुनिरनुत्तमः पुनः ।
वर्त्मनि प्रयतमानसो व्रजन् सन्ददर्श सरितं कवेरजाम् ॥ २० ॥

क्षेत्राणि या पाययते पयांसि
मातेव बालान् तृषितान् क्षुधार्तान् ।
तरङ्गहस्ता पुलिनाधिरोहा
समीननेत्राम्बुरुहस्तनाढ्या ॥ २१ ॥

योन्नताप्यवनता दिवानिशं
सस्यबालपरिपोषणोत्सुका ।
हंसपत्रधवलांशुकोज्वला
मोदते स्वपतिगामिनी सती ॥ २२ ॥

प्रायेण नद्यः परिषेव्यमाणाः
युजन्ति पुण्येन निषेवमाणम् ।
नाकं जनायात्मनिषेवकाय
ददत्यनन्तं भुवि तास्तदन्ते ॥ २३ ॥

अम्भस्तदीयं परिषेवमाणा-
श्शुद्धेन्द्रिया विष्णुपदारविन्दे ।
अनन्यलभ्यां सुदृढां लभन्ते
भक्तिं यतो [1]मुक्तिरनन्यलभ्या ॥ २४ ॥

कवेरकन्याजलनिर्मलत्वं
किं वर्ण्यते तस्य निसर्गसिद्धेः ।
अगस्त्यकुण्डीजलमेतदीयं
जलं पुराणानि वदन्ति सन्तः ॥ २५ ॥

---

[1] क. यल्लभ्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तुं यदीयं पुलिनं मुरारये
सिन्ध्वन्तरीपे वसते हिरण्मये ।
अरोचतारोचितसर्वदिङ्मुखे
श्रीपद्मनाभाय हिरण्यवाससे ॥ २६ ॥

शय्या तदीया भगवाननन्त-
स्सहस्रमूर्धा सुकुमारभोगः ।
यदीयपादाम्बुजयुग्ममर्ध्यं[1]
मृद्नाति पद्मा करपल्लवाभ्याम् ॥ २७ ॥

यत्केशपाशविनिवेशितपुष्पमाला-
सौरभ्यलुब्धमधुपायिगणस्समन्तात् ।
भ्राम्यन् व्यराजत विरोदितुमागतो वा
वेदः स्वयं प्रथितशब्दमयो हि मूर्तः ॥ २८ ॥

[2]किरीटमस्योपरि दुर्विभाव्यं
यदीयमुच्चैर्मुनिवृन्ददृश्यम् ।
[3]संशोधते नूनमितोऽपि[4] जातं
तेजस्त्रयं लोकहितैकवृत्तम् ॥ २९ ॥

यदीयनेत्राम्बुरुहे विशाले
लोकैकदीपाविह पुष्पवन्तौ ।
पद्मापि नित्यं स्पृहयालुरास्ते
यत्पादपद्माय सकृत्सकृद्वा ॥ ३० ॥

यदाननस्योपमितिर्न पङ्कजं
न बालचन्द्रो न च पूर्णचन्द्रमाः ।
पङ्कोद्भवावृत्तकलङ्कदूषणैः
स्वमेव सा स्वस्य मता महाद्युतेः ॥ ३१ ॥

---

[1] अ मर्घ्यं ।
[2] अ· मघ्योपरि ।
[3] अ· संदृश्यते ; का· संशोभते ।
[4] अ· अभिजातं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुजा यदीया भुवनैकरक्षा-
दीक्षा समग्राधिकृशक्तिभाजः ।
धृताब्जशङ्खारिमहायुधाश्च[1]
क्षेत्रं यतो जातमिदं प्रसिद्धम् ॥ ३२ ॥

ऊरू यदीयौ क्रमवृत्तशोभौ
तृतीयवर्णोदयजन्मभूमी ।
सौन्दर्यसर्वस्वनिधानपात्रे
यतः पराजीयत हस्तिहस्तः ॥ ३३ ॥

यत्पादौ जितकच्छपौ मृदुतलौ ध्येयौ मुनीनां गणैः
ब्रह्मेन्द्रादिसुरार्चितौ नखमणिप्रद्योतिताशामुखौ ।
नानारत्नमयोरुपीठनिहितौ क्लेशानभिज्ञौ सदा
गङ्गायाः पितृवंशतामुपगतौ याभ्यां तुरीयोदयः ॥ ३४ ॥

कवेरकन्यासलिलाभिषिक्तः
श्रीपद्मनाभस्य पदारविन्दे ।
आनर्च नम्रो विनयी विनेयै-
स्ततः प्रतस्थेऽभिमतस्थलाय ॥ ३५ ॥

गच्छन् गच्छन्मार्गमध्याभियातं
गेहं भिक्षुर्मातुलस्याजगाम ।
दृष्ट्वा शिष्यैस्तं चिरेणाभियातं
मोदं प्रापन्मातुलश्शास्त्रवेदी ॥ ३६ ॥

शुश्राव तं बन्धुजनस्सशिष्यं
स्वमातुलागारमुपेयिवांसम् ।
आगत्य दृष्ट्वा चिरमागतं तं
जहर्ष हर्षातिशयेन साश्रुः ॥ ३७ ॥

[1] क. महागदाश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुरोद कश्चिन्मुमुदेऽत्र कश्चित्
जहास पूर्वाचरितं बभाषे ।
कश्चित्प्रमोदातिशयान्न किञ्चि-
दूचे स्खलद्गीः प्रणनाम कश्चित् ॥ ३८ ॥

ऊचेऽथ तं ज्ञातिजनः प्रमोदी
दृष्ट्वा चिरायाक्षिपदं गतोऽभूः ।
दिदृक्षते त्वां जनतातिहार्दा-
त्तथापि शक्नोति न वीक्षणाय ॥ ३९ ॥

पुत्रास्समित्रा न च बन्धुवर्गः
न राजबाधा न च चोरभीतिः ।
दुःखास्पदा नात्र विचारहीनं
कृतार्थतामूलपदं यातित्वम् ॥ ४० ॥

प्रसूनवन्तं फलिनं महान्तं
शाखोपशाखाचितमेव वृक्षम् ।
बाधन्त आगत्य न तद्विहीनं
यथा तथा वा [1] धनिनं नृपाद्याः ॥ ४१ ॥

[2] कुमाररक्षागतमानसाना-
मायाति निद्रापि सुखं न जातु ।
क्व देवतार्चा क्व च तीर्थयात्रा
क्व वा निषेवा महतां भवेन्नः ॥ ४२ ॥

अश्रौष्म संन्यासकृतं भवन्तं
विप्रात्कुतश्चिद्गृहमागतान्नः ।
कालोऽत्यगात्ते बहुरद्य दैवा-
त्तीर्थस्य हेतोर्गृहमागतस्त्वम् ॥ ४३ ॥

---

[1] का. धनिनो । [2] का. कुटुम्ब ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा शकुन्ताः परिवार्धितान् द्रुमान्
समाश्रयन्ते सुखदान्जहत्यपि ।
[1]परप्रक्लृप्तान्मठदेवतागृहान्
यतिस्समाश्रित्य तथोज्झति ध्रुवम् ॥ ४४ ॥

यथा हि पुष्पाण्य[2]धिगम्य षट्पद-
स्सङ्गृह्य सारं रसमेव भुङ्क्ते ।
तथा यतिस्सारमवाप्नुवन् [3]सुखी
गृहाद्गृहादोदनमेव भिक्षते ॥ ४५ ॥

यतिर्विरज्यात्मगतिः कलत्रं
देहं [4]गृहं [5]संगतमेव [6]मुख्यम् ।
विरक्तिभाजस्तनयाः स्वशिष्याः
किमर्थनीयं [7]यतिनो महात्मन् ॥ ४६ ।

मनोरथानां न समाप्तिरिष्यते
पुनः पुनस्सन्तनुते मनोरथान्[8] ।
दारानभीप्सुर्यतते दिवानिशं
तान्प्राप्य तेभ्यस्तनयानभीप्सति ॥ ४७ ॥

अनाप्नुवन् दुःखमसौ सुतीव्रं
प्राप्नोति चेष्टेन वियुज्यमानः ।
सर्वात्मना कामवशस्य दुःखं
तस्माद्विरक्तिः पुरुषेण कार्या ॥ ४८ ॥

---

[1]अ. प्रयुक्तान् ।
[2]अ. अभिगम्य ।
[3]क. सुखं ।
[4]का. गतं ।
[5]अ. संयतमेव ।
[6]का. भिक्षते ।
[7]अ. यतिना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरक्तिमूलं मनसो विशुद्धिं
तन्मूलमाहुर्महतां निषेवाम ।
भवादृशस्तेन च दूरदेशे
परोपकाराय रसामटन्तः ॥ ४९ ॥

अज्ञातगोत्रा विदितात्मतत्त्वा
लोकस्य दृष्ट्या जडवद्विभान्तः ।
चरन्ति भूतान्यनुकम्पमाना-
स्सन्तो यदृच्छोपगतोपभोग्याः[1] ॥ ५० ॥

चरन्ति तीर्थान्यपि सङ्ग्रहीतुं
लोकं महान्तो ननु शुद्धभावाः ।
शुद्धात्मविद्याक्षपितोरुपापाः
तज्जुष्टमम्भो निगदन्ति तीर्थम् ॥ ५१ ॥

वस्तव्यमत्र कतिचिद्दिवसानि विद्वन्
त्वद्दर्शनं वितनुते [2]मुदमाधिहन्त्रीम् ।
एष्यद्वियोगचकिता जनतेयमास्ते
दुःखं गतेऽत्र [3]भवितेति भवत्यसङ्गे ॥ ५२ ॥

संयुनक्ति वियुनक्ति देहिनौ
दैवमेव परमं मनागपि ।
इष्टसङ्गतिनिवृत्तिकालयो
निर्विकारहृदयो भवेन्नरः ॥ ५३ ॥

मध्याह्नकाले क्षुधितस्तृषार्तः
क्व मेऽन्नदातेति वदन्नुपैति ।
यस्तस्य निर्वापयिता क्षुधार्तेः
कस्तस्य पुण्यं वदितुं क्षमेत ॥ ५४ ॥

---

[1] ख. भोग्याः ।
[2] अ. हर्न्त्रं ।
[3] अ. अत्रभवतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सायंप्रातर्वह्निकार्यं वितन्वन्
मज्जंस्तोये [1] दण्डकृष्णाजिने च ।
धृत्वा वर्णी वेदवाक्यान्यधीयन्
क्षुध्यन् शीघ्रं गेहिनो गेहमेति ॥ ५५ ॥

उच्चैश्शास्त्रं भाषमाणोऽपि भिक्षु-
स्तारं मन्त्रं संजपन् वा यतात्मा ।
मध्येऽजस्रं जाठराग्नौ प्रदीप्ते
दण्डी नित्यं [2] गेहिनो गेहमेति ॥ ५६ ॥

यदन्नदानेन निजं शरीरं
पुष्णंस्तपोऽयं [3] क्रमते सुतीव्रम् ।
कर्तुस्तदर्धं ददतोऽन्नमर्ध-
मिति स्मृतिस्संवदतेऽनवद्या ॥ ५७ ॥

पुण्यं गृहस्थेन विचक्षणेन
गृहेषु सञ्चेतुमलं प्रयासात् ।
विनापि तत्कर्तृनिषेवणेन
तीर्थादिसेवा वहुदुःखसाध्या ॥ ५८ ॥

गृही धनी धन्यतरो मतो मे
तस्योपजीवन्ति धनं हि सर्वे ।
चौर्येण कश्चित्प्रणयेन कश्चित्
दानेन कश्चिद्बलतोऽपि कश्चित् ॥ ५९ ॥

सन्तोषयेद्वेदविदं द्विजं य-
स्सन्तोषयत्येव स सर्वदेवान् ।
तद्वेदिविप्रे निवसन्ति देवा
इति स्म साक्षाच्छ्रुतिरेव वक्ति ॥ ६० ॥

---

[1] का. दण्डकृष्णाजिनं च । [2] गेहतो ।
[3] अ. कुरुते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वधर्मनिष्ठा विदिताखिलार्था
जितेन्द्रियास्सेवितसर्वतीर्थाः ।
परोपकारव्रतिनो महान्त
आयान्ति सर्वे गृहिणो गृहाय ॥ ६१ ॥

गृही गृहस्थोऽपि तदश्नुते फलं
यत्तीर्थसेवाभिरवाप्यते जनैः ।
तत्तस्य तीर्थं गृहमेव कीर्तितं
धनी वदान्यः प्रवसेन्न कश्चन ॥ ६२ ॥

अन्तःस्थितं मूषिकमुख्यजीवा
बहिःस्थितं गोमृगपक्षिमुख्याः ।
जीवन्ति जीवास्सकलोपजीव्या-
स्तस्माद्गृही सर्ववरो मतो मे ॥ ६३ ॥

शरीरमूलं पुरुषार्थसाधनं
तच्चान्नमूलं श्रुतितोऽवगम्यते ।
तच्चान्नमस्माकममीषु संस्थितं
सर्वं फलं गेहपतौ[1] समाश्रितम् ॥ ६४ ॥

ब्रवीमि भूयः [2]शृणुतादरेण
गृहाऽऽगतं पूजयताऽऽतुरातिथिम् ।
सम्पूजितो वोऽतिथिरुद्धरेत्कुलं
निराकृतात्किं भवतीति नोच्यते ॥ ६५ ॥

विनाभिसन्धिं कुरुत श्रुतीरितं
कर्म द्विजा नो जगतामधीश्वरः ।
तुष्येदिति प्रार्थनया गतैनमां
स्वान्तस्य शुद्धिर्भविता चिरेण वः ॥ ६६ ॥

---

[1] का. पतिद्रुमाश्रयम् । [2] अ श्रुतमादरेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संदिश्येत्थं बन्धुतां भिक्षुराजो
भिक्षाश्चक्रे मातुलस्यैव गेहे ।
पप्रच्छैनं मातुलो भुक्तवन्तं
किं स्विच्छन्नं पुस्तकं शिष्यहस्ते ॥ ६७ ॥

टीका विद्वन्भाष्यगेति ब्रुवाण-
स्तां देहीति प्रोचुषेऽदत्त ताश्च ।
अद्राक्षीत्तां मातुलस्तस्य बुद्धिं
दृष्ट्वाऽनन्दत् खेदमापच्च किंचित् ॥ ६८ ॥

प्रबन्धनिर्माणविचित्रनैपुणीं
दृष्ट्वा प्रमोदं स विवेद किंचित् ।
मतान्तराणां किल युक्तिजालै-
र्निरुत्तरं बन्धनमाऽलुलोचे ॥ ६९ ॥

गुरोर्मतं स्वाभिमतं विशेषात्
निराकृतं तत्र समत्सरोऽभूत् ।
साधुर्निबन्धोऽयमिति ब्रुवाणं
तं साभ्यसूयं स कृताभिनन्दनः ॥ ७० ॥

गच्छामि सेतुं त्वयि पुस्तभारं
निक्षिप्य जीवो मम वर्ततेऽत्र ।
यथेतरेषां पशुगेहिरण्ये
प्रेमा तथा नः खलु पुस्तकेषु ॥ ७१ ॥

स पश्चपादीं च गृहे प्रयास्यन्
शिष्टां निचिक्षेप तमेवमुक्त्वा ।
प्रतिष्ठमानस्य बभूव कष्टं
निमित्तमेष्यत्फलसूचनाय ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्पन्दतास्य नयनं किल वाममीषत्
पुस्फोर बाहुरपि वामगतस्तथोरुः ।
चुक्षाव नास्य पुरतः क्वचिदस्खलीच्च
सर्वं ययौ न गणयन् गुरुरस्मदीयः ॥ ७३ ॥

गतेऽत्र मेने किल मातुलोऽस्य
ग्रन्थे स्थितेऽस्मिन् गुरुपक्षहानिः ।
दग्धेऽत्र जायेत महापवादो
नोक्त्या निराकर्तुमपि प्रभुत्वम् ॥ ७४ ॥

पक्षस्य नाशाद्गृहनाश एव नो
वरं गृहेणैव दहामि पुस्तकम् ।
एवं निरूप्य न्यदधाद्धुताशनं
चुक्रोश चाग्निर्दहतीति मे गृहम् ॥ ७५ ॥

ऐतिह्यमाश्रित्य वदन्ति चैवं
तदेव मूलं मम भाषणेऽपि ।
यावत्कृतं तावदिहास्य कर्तुं-
र्वाच्यं ततः स्याद्द्विगुणं प्रवक्तुः ॥ ७६ ॥

गच्छन्नसौ फुल्लमुनेर्जगाम
तमाश्रमं यत्र च रामचन्द्रः ।
अश्वत्थमूले न्यधित स्वचापं
स्वयं कुशानामुपरि न्यषीदत् ॥ ७७ ॥

तीर्त्वा समुद्रं जनकात्मजाया-
स्सन्दर्शनोपायमनीक्षमाणः ।
वसुन्धरायां प्रभवः प्लवङ्गा
न वारिराशौ बहवः क्षमन्ते ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सञ्चिन्तयन्निति कुशासनसंनिविष्टो
ज्योतिस्तदैक्षत विदूरगमेव किञ्चित् ।
संव्याप्नुवज्जगदिदं सुखशीतलं यत्
संप्रार्थनीयमनिशं मुनिदेवताभिः ॥ ७९ ॥

आगच्छदात्माभिमुखं निरीक्ष्य
सर्वे तदुत्तस्थुरुदारवीर्याः ।
ततः पुमाकारमदृश्यतैत-
न्महाप्रभामण्डलमध्यवर्ति ॥ ८० ॥

मध्ये प्रभामण्डलमैक्षताश्चितं
शिवाकृतिं सर्वतपोमयं पुनः ।
लोपादिमुद्रासहितं महामुनिं
प्राबोधि कुम्भोद्भवमादराज्जनः ॥ ८१ ॥

अगस्त्यमृग्यो[1] रघुनन्दनस्तत-
स्स्वखेदमन्तःकरणोत्थमत्यजत् ।
प्रायो महद्दर्शनमेव देहिनां
क्षिणोति खेदं रविवन्महत्तमः ॥ ८२ ॥

सभार्यमर्घ्यादिभिरर्चयित्वा
रामस्तदङ्घ्रिं शिरसा ननाम ।
तूष्णीं मुहूर्तं व्यसनार्णवस्थो
धृतिं समास्थाय पुनर्बभाषे ॥ ८३ ॥

दृष्ट्वा भवन्तं पितृवत्प्रमोदे
यन्मां भवान् दुःखमहार्णवस्थम् ।
स्वयं समागात्कृपयेह तस्मा-
न्मन्ये ममात्मानमवाप्तकामम् ॥ ८४ ॥

[1] अ. दृश्यो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंशो महान्मे तपनात्प्रवृत्तो
न तत्र मादृग्जनिता न जातः ।
पदच्च्युतोऽहं प्रथमं सभार्य-
स्सलक्ष्मणोऽरण्यमुपागतश्च ॥ ८५ ॥

तत्रापि भार्यामहरच्छलेन
स रावणो राक्षसपुङ्गवो मे ।
सा चाधुनाशोकवने समास्ते
कृशा वियोगात्स्वत एव तन्वी ॥ ८६ ॥

तीर्त्वा समुद्रं विनिहत्य दुष्टं
बलेन सीतामहमाहरामि ।
यथा तथोपायमुदाहर त्वं
न मे त्वदन्योऽस्ति हितोपदेष्टा ॥ ८७ ॥

इतीरितो राममुवाच विद्वन्
मा राम शोकस्य वशं गतोऽभूः ।
वंशाद्ये सन्ति नृपा महान्तः
संप्राप्य दुःखं परिमुक्तदुःखाः ॥ ८८ ॥

त्वमग्रणीर्दाशरथे धनुर्भृतां
तवानुजस्यापि समो न लक्ष्यते ।
प्लवङ्गमानामधिपस्य कोटिशः
सन्तीह मां मुञ्च इति ब्रुवन्तः ॥ ८९ ॥

सहायसम्पत्तिरियं तवास्ति
हितोपदेष्टाप्यहमस्मि कश्चित ।
वारांनिधिः किं कुरुते तवायं
सराधुना गोष्पदमात्रमेनम् ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरेव पार्वाब्धिमहं पिबामि
  [1]शुष्कीकृतेन प्रतियाहि लङ्काम् ।
एवं मया कीर्तिरुपार्जिता स्यात्
  बद्धे तु वार्धौ तव [2]सोर्जिता स्यात् ॥ ९१ ॥

सेतुं वार्धौ बन्धयित्वा जहि त्वं
  दुष्टं चौर्याद्येन सीता हृतासीत् ।
प्राप्नोषि त्वं कीर्तिमाचन्द्रतारं
  तेनात्राब्धिं बन्धय त्वं कपीन्द्रैः ॥ ९२ ॥

इत्थं यत्र प्रेरितोऽगस्त्यवाचा
  सेतुं रामो बन्धयामास वार्धौ ।
तुङ्गैः शृङ्गैर्वानरैस्तेन गत्वा
  तं हत्वाऽऽजौ जानकीमानिनाय ॥ ९३ ॥

तत्रोषित्वा घस्रमेकं मुनीन्द्रः
  पुण्यं पश्यन् सेतुविस्तारमग्र्यम् ।
गन्धाद्रार्थं पुण्यतीर्थं जगाम
  यत्रोमेशस्संनिधत्ते भवान्या ॥ ९४ ॥

स्नात्वा स्नात्वा तीर्थवर्येषु भिक्षुः
  पावंपावं रामनाथं ददर्श ।
स्तावंस्तावं पूजयामास भक्त्या
  तं चाप्राक्षीच्छिष्यसङ्घो मुनीन्द्रम् ॥ ९५ ॥

ब्रूह्यस्मभ्यं देवदेवस्य विद्वन्
  कस्मादासीद्रामनाभाभिधानम् ।
सर्वज्ञानामग्रणीस्त्वं हि किञ्चि-
  त्ते नाबुद्धं विद्यते विष्टपेषु ॥ ९६ ॥

[1] अ. शुष्केऽत्र तेन । [2] अ. सार्जिता स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्टो मुनीन्द्रोऽचकथत्कथां तां
हत्वा दशास्यं परिगृह्य सीताम् ।
विधाय लङ्काधिपतिं कनिष्ठं
रामो मुनीन्द्रैः पुरमाजगाम ॥ ९७ ॥

आयन्नसौ सेतुपथेन कोट्या
चिच्छेद सेतुं तिसृषु स्थलीषु ।
चापस्य लोके विदधत् स्वकीर्तिं
वाग्मी ह्यगस्त्यं वचनं बभाषे ॥ ९८ ॥

श्रीगन्धमादनगिरौ भगवन्प्रतिष्ठां
लिङ्गस्य कर्तुमनसो भव मे सहायः ।
स्थानं मुहूर्तदिवसौ तदपेक्षितश्च
ब्रूहि त्वमद्य जननीं विशदां शिलाश्च ॥ ९९ ॥

पृष्टो मुनिः प्रतिवचस्समदत्त राज्ञे
त्वं राम मारुतिमुदाहर तच्छिलायै ।
लोकेषु नर्मदशिला प्रथिता प्रशस्ता
तां शीघ्रमागमय सन्निहितो मुहूर्तः ॥ १०० ॥

श्रुत्वा स मारुतिमथो निजगाद राम-
स्त्वं नर्मदातटमुपेत्य विशिष्टलिङ्गम् ।
तस्मादिहाऽऽनय सुखं कलशोद्भवो मां
सम्यङ्मुहूर्तमनुशास्ति समीपगं तत् ॥ १०१ ॥

तस्यानुशासनमथाऽऽदरतो गृहीत्वा
सङ्कोच्य गात्रमनघो नभ उत्पपात ।
गच्छन्नसावभिमतस्थलतोऽन्य[1]देशं
वेगादवातरदनल्पतनुर्महात्मा ॥ १०२ ॥

---

[1] अ. देशे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कक्षवाय्वभिहतास्तरवो निपेतु-
[1]स्संत्रासिताः स्म निपतन्ति महीरुहोऽन्ये ।
तोयोज्झितं तलमदृश्यत निम्नगानां
वेगेन तस्य महता पृथुपङ्कशेषम् ॥ १०३ ॥

विज्ञाय देशमतिलङ्घितमुत्पतिष्णुः
श्रीनर्मदातटमसौ पुनराससाद ।
लिङ्गं ततो मृगयितुं सलिलं जगाहे
नापश्यदुत्तममनुत्तमवायुसूनुः ॥ १०४ ॥

चिरायमाणे मरुतस्तनूजे
मुहूर्तकाले परिवर्तमाने ।
अगस्त्यमाचष्ट रघूत्तमोऽसौ
किमत्र कार्यं भगवन्[2] ब्रवीतु ॥ १०५ ॥

प्रतीक्ष्यमाणे तनये नभस्वतो
मुहूर्तकालस्त्वतियाति दुर्लभः ।
लिङ्गान्तरञ्चेह न दृष्टिगोचरं
संप्राप्तमस्मान्व्यसनं सुदुस्तरम् ॥ १०६ ॥

अथाब्रवीत्सङ्कटमुद्दिधीर्षुः
पुरातनं लिङ्गमिहास्ति [3]पुण्यम् ।
प्रपूजयैनं महिते मुहूर्ते
त्वन्नाथनाम्ना भविता पृथिव्याम् ॥ १०७ ॥

इदमेव युगान्तरेऽर्चितं
भवता लिङ्गमनुत्तम शिवम् ।
पञ्चाक्षरप्रोक्तविधानमाश्रयं
ननाम तुष्टाव च तत्पदाम्बुजम् ॥ १०८ ॥

---

[1] अ. संताडिताः स्म । [2] अ. भगवान् ।
[3] अ. पूज्यं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाविरासीद्धनुमान् सलिङ्ग-
श्चुकोप लिङ्गान्तरपूजनेन ।
आनायि लिङ्गं महतः प्रयत्ना-
द्विदूरदेशात्तदुपेक्षितं हा ॥ १०९ ॥

रुषितं हनुमन्तमूचिवान् रघुनाथः कृपयार्द्रमानसः ।
किमु रुष्यसि वत्स कारणं हनुमंल्लिङ्गमपूजि पूजितम्
॥ ११० ॥

अगस्त्यवाचा परिपूजितं मया
मुहूर्तकालाय भवत्यनागते ।
बिभेमि किञ्चिद्व्यसनोपसर्पका-
द्भवान् सदा मे व्यसनापसर्पकः ॥ १११ ॥

यदत्र कार्यं भवता तदीयं
वदाल कार्यं तदहं विधास्ये ।
नेक्षेऽस्य कोपस्य महन्निदानं
प्रधानकार्येऽविदिते हि कोपः ॥ ११२ ॥

मदागमात्पूर्वमपूजि यत्त्वया
लिङ्गं तदुद्धृत्य मदीयलिङ्गके ।
संस्थापिते शाम्यति मामकं मनो
नो चेच्छ्रमो मे भविता निरर्थकः ॥ ११३ ॥

मया [1] हनूमन्कृतलिङ्गचालनं कर्तुं न शक्यं मनसापि जीवता ।
त्वयैव कार्यं स्थितलिङ्गचालनं संस्थापनं तावकलिङ्गगोचरम्
॥ ११४ ॥

उच्चकर्ष किल पुच्छवेष्टितं लिङ्गमद्भुतबलोऽथ वानरः ।
उद्धरन् बहुविधेन कर्मणा संतताम वसुधा चचाल च ॥ ११५ ॥

क्षोभमीयुरथ वारिराशयः पेतुरुच्छ्रितनगाश्चकम्पिरे ।
पर्वतास्सवननिम्नगाः परं नाचलद्विपुललिङ्ग [2] मण्वपि ॥ ११६ ॥

---

[1] अ. स्थित ।

[2] का. मण्टपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्याज निद्रां किल पद्मनाभः
क्षीरोदशायी मुनयस्समाधिम् ।
गर्भा निपेतुर्लघु गर्भिणीनां
ब्रह्माण्डमेतच्चकितं तदानीम् ॥ ११७ ॥

यस्येक्षणेनैव जगत्समस्तं
कल्पावसाने लयमेत्यवश्यम् ।
तद्बुद्धिधीर्धुर्यतते दुराशो
विवेकदूरः खलु कोविदोऽपि ॥ ११८ ॥

निबध्य पुच्छं शिवलिङ्गमध्ये
बभ्राम संभ्रान्तमना हनूमान् ।
लिङ्गे विकारप्रतिपादनाय
न च क्षमोऽभूद्बहिरापपात ॥ ११९ ॥

पतन् हनूमान् किल मङ्गलायाः
क्षेत्रे पपातागतचित्तमोहः ।
आत्मानमन्यं न विवेद किञ्चि-
द्ववाम चोष्णं रुधिरं [1] गतात्मा ॥ १२० ॥

श्रीमङ्गलायाः करुणाकटाक्ष-
पातेन सञ्जीवितवानमंस्त ।
निद्रा किमेषा मतिविभ्रमो वा
कुतो न्यपप्तं च वसुन्धरा का ॥ १२१ ॥

यत्रापतच्चोदवमीच्च शोणितं
तत्तीर्थमद्यापि तथैव दृश्यते ।
हनूमतः कुण्डमुदाहरन्ति त-
द्धनूमतो यत्तदभूत्पुरातनम् ॥ १२२ ॥

---

[1] अ. महात्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स चाम्बिकायाः प्रणिपत्य पादयो-
श्शनैश्शनै रामसमीपमाययौ ।
स तेन सार्धं शरणं ययौ शिवं
महापराधाच्चकितोऽनुतापवान् ॥ १२३ ॥

[1] महापराधो विहितस्सुदुस्सह-
स्तथापि तं क्षन्तुमिहार्हसि प्रभो ।
कृतागसं किं पितरौ प्रमुञ्चतः
शिशुं सहित्वा पुनरेव रक्षतः ॥ १२४ ॥

धरा क्षमा सारवती प्रसिद्धा
बिभर्ति भूतानि दिवानिशं या ।
आदाय यद्गन्धगुणान् [2] समर्चा
तन्मूर्तिभाजे भवते नमोऽस्तु ॥ १२५ ॥

यज्जीवनं जीवनमेव देहिनां
प्राणाजना बिभ्रति यत्समाश्रयात् ।
यद्रूपमेवोपविधिर्विधीयते
तत्तावकीं मूर्तिमुशन्ति सज्जनाः ॥ १२६ ॥

यत्र जुह्वति घृताप्लुतं हविर्यो मुखं मखभुजां निगद्यते ।
यो निहन्ति बहिरान्तरं तमः सत्तमं तमपि तावकं वपुः
॥ १२७ ॥

यस्माद्दते निखिलमेव भवत्यचेष्टं
यत्सङ्गतेर्भवति पावनताखिलस्य ।
दग्धृत्वमस्य यदुपाश्रयतोऽनलस्य
तत्तावकं वपुरहं प्रणतोऽस्मि देव ॥ १२८ ॥

---

[1] अ. मया । [2] अ. समर्च्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वस्य शब्द[1] निचयस्य यदाश्रयत्वं
यन्मूलतोऽस्य जगतोऽप्यवकाशलाभः ।
या केनचित्प्रतिहतिं न हि याति किञ्चि-
त्सा नाभसी तव तनुर्मम मोदिकाऽस्तु ॥ १२९ ॥

या सर्वभूतनिवहान्[2] सुगतिं गृहीत्वा-
प्यस्तं गता [3]पुनरुपैति पुनर्दधाना ।
वृष्ट्यादिना च परिपालयति प्रयत्नात्
सा सूरमूर्तिरवताद्व्यसनार्णवान्नः ॥ १३० ॥

या चौषधीरभिनिविश्य करोति वृद्धिं
यच्चन्द्रिका कुमुदबान्धवतामुपेता ।
अंशेन या व्रजति भूषणतां सदा ते
सा वैधवी तव [4]तनुर्मम चान्तिकेऽस्तु ॥ १३१ ॥

या वेदभाषितपदं परिनिर्वहन्ती
सत्संप्रदायमभिवर्तयतीह लोके ।
या जङ्गमाग्रसरतामभियाति वन्द्या
सा दीक्षिता तव तनुः [5]क्षपयेत मोहम् ॥ १३२ ॥

अष्टाविमास्सकललोकहिताय पूर्वं
क्लृप्तास्तवैव तनवो भगवन्परं किम् ।
भोक्ता त्वमेव विधुमस्तक भोग्यजातं
तत्साधनञ्च सकलं तव रूपमेव ॥ १३३ ॥

यद्गन्धमात्रपतनान्म्रियतेऽमृताशी
तत्कालकूटमपिबश्शिव लोकहेतोः ।
कालात्मना परिणतं तदपीह कण्ठे
भूषायते त्वमसि तद्धर नीलकण्ठः ॥ १३४ ॥

---

[1] अ. निवहस्य ।
[2] अ. सुगुणान् ।
[3] अ. उदेति ।
[4] का. तनुस्तनुतात्सुखं नः ।
[5] का. क्षपयेन्महांहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वं तथा त्रिपुरवासिजनेन बाधा
लोकत्रये कतिचिदेव दयापरीताः ।
एकेषुणा त्रिभुवनं परिपालयेथा
दग्ध्वा पुरं किमु वदामि पराक्रमं ते ॥ १३५ ॥

ॐ कर्णिकासनजुषे मुदिताय नित्यं
स्वात्मप्रभाय सकलाधिपरिच्युताय ।
ईशानमूर्तिवपुषे भवते नमोऽस्तु
स्वच्छन्दचाररसिकाय नमश्शिवाय ॥ १३६ ॥

त्वामुच्चिरवांसुरहमस्मि न मादृशोऽन्यो
विद्येत मूढधिषणास्त्रिषु विष्टपेषु ।
त्वत्पादपङ्कजरजःकणभूषितानां
तत्तद्विधेयविधिषूद्भवतीह शक्तिः ॥ १३७ ॥

इत्थं हरः स्तुतिपदैः परितोषितात्मा
प्रत्यक्षतामुपगत[1]श्शरणागतस्य ।
आनायि लिङ्गमिह यत्तदमुष्य देव
कर्तुं मनः स्पृहयतीश पुनः प्रतिष्ठाम् ॥ १३८ ॥

[2] अन्तःसालस्योत्तरस्यां दिशि स्वं
लिङ्गश्चैतत्स्थापय त्वं यथेष्टम् ।
दृष्ट्वा भूयस्सज्जना मां नमन्तु
संपूर्णन्ते तत्फलं संलभन्ताम् ॥ १३९ ॥

(नो चेत्तेषां दर्शनं निष्फलं स्यात्
[3] इत्युक्त्वान्तर्धानमागात्तदानीम् ।)

---

[1] अ. शरणं ।
[2] अ. अन्तश्शालस्यो ।
[3] अ. इत्येवमुक्त्वान्तरधाच्छिवस्सः (?)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकर्ण्य देववचनं हनुमान्प्रतीतः
प्रातिष्ठिपत्तदनु लिङ्गमनुत्तमं तत् ।
सम्यङ्मुहूर्तमनुसृत्य रघूत्तमोक्त्या
तद्वायुजेश्वरसमाह्वयमेतदासीत् ॥ १४० ॥

यत्राद्यापि च पुण्डरीकनगरं कावेरिकामाधवौ
पश्चान्मातुलमान्दिरस्य गमनं सम्भाषणं ज्ञातिभिः ।
पुस्तस्थापनरामनाथचरिते संप्रोदिते यत्नतः
श्रीमच्छङ्करदेशिकेन्द्रविजये सर्गोऽष्टमः प्रस्थितः
॥ १४१ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
अष्टमस्सर्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ नवमस्सर्गः ॥

श्रीगन्धमादनगिरिः प्रथितोऽम्बुराशौ
संतिष्ठते जलगतः स्थिरतामुपेतः ।
देवोऽपि तत्र गिरिजासहितस्समास्ते
क्षेत्रं ततः खलु पुरातनमेतदाहुः ॥ १ ॥

[1]आगत्य तत्र शिवमर्चयतेऽनुघस्रं
दिव्यप्रसूनसहितोऽप्सरसां निकायः ।
देवं समर्च्य दिवमेव किल प्रयाति
स ह्यष्टधा गुणगताश्शिवभक्तियोगात् ॥ २ ॥

तस्मिन्समर्चयति देवमनन्यभक्त्या
कुम्भोद्भवो मुनिरथाऽऽगमदुग्रतेजाः ।
देवं समर्चिचयिषुर्बहिरेव तस्थौ
पूजावसानसमयं प्रतिवीक्षमाणः ॥ ३ ॥

पूजां विधाय सहसाप्सरसां गणोऽयं
बाह्यस्थितं मुनिमवैक्षत पृष्टवांश्च ।
कस्त्वं किमर्थमिह चागमनं गिरौ ते
सोऽप्यब्रवीद्द्विजवरोऽयमनिन्द्यरूपः ॥ ४ ॥

दृष्ट्वा शिवं सह समर्चयितुं भवान्या
देवश्शिवो गिरिजया सह सन्निधत्ते ।
मर्त्यो न सञ्चरणयोग्य इहाद्रिमध्ये
देवाधिकारवसुधेयमतश्चरामः ॥ ५ ॥

---

[1] अ. आगम्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्त्यो न शक्त इह सञ्चरणाय किं वा
योग्यत्वमेव मनुजस्य न वेत्युदीर्यम् ।
तच्च द्वयं खलु न सङ्गतमेव युक्त्या
शक्तिर्न चेत्कथमिहागमनं मम स्यात् ॥ ६ ॥

योग्यत्वधर्मविरहोऽस्ति न चापि देव्य-
स्सर्वत्र भूसुरजने ह्यधिकार एव ।
विप्राधिकारमखिलं खलु शास्त्रजातं
विप्रा वदन्ति निगमार्थविदो महान्तः ॥ ७ ॥

देवस्समोऽयमुभयोरपि दिव्यवध्वः
मर्त्यस्य देवनिवहस्य न काचिदत्र ।
संशीतिरस्ति यदिवेह सदाशिवोऽयं
पक्षे पतेत्पतितमेव मनुष्यजातम् ॥ ८ ॥

सख्योऽपसारयत दुर्वचनाधिराजं
वारांनिधौ क्षिपत वा कुरुतात्मनाथाम् ।
कुण्डीं विशुद्धसलिला[1]मपि यात शीघ्रं
क्षेत्रं यथा न पुनरेति तथा [2]विधेयः ॥ ९ ॥

उक्तोऽप्ययं परुषवाक्यमनिन्दितात्मा
प्रोचे न किञ्चिदपि शान्तमना जगाम ।
गच्छन्नसौ पथि निरूपितवानथेदं
क्षेत्रं तदा मनुजयोग्यमिदं[3] करिष्ये ॥ १० ॥

रामे प्लवङ्गसहिते प्रतियाति लङ्कां
तत्प्राप्तिमार्गमनुपश्यति कुम्भजातः ।
गन्धाद्रिमन्तरगतं प्रविधाय सेतुं
प्राबन्धयज्जलनिधौ मुनिराप्तकार्यः ॥ ११ ॥

---

[1] का. मपयात । [2] अ. विधेयम् ।
[3] अ. अहं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बद्धेऽपि सेतुकरणे पुनराययुस्ता-
स्संसेवितुं पशुपतिं गिरिजासनाथम् ।
कुम्भोद्भवोऽपि विहितोपहसः पुरस्ता-
त्तासाञ्च तस्य पुनरप्यभवद्विवादः ॥ १२ ॥

साधारणं पदमिदं न मनुष्ययोग्यं
देवादिसेव्यमिति यद्ब्रुवते भवत्यः ।
मर्त्याङ्गना भवत मर्त्यविदूषिकास्त-
च्छापं ददाविति मुनी रुषितो महात्मा ॥ १३ ॥

शान्तः पुमानिति न पीडनमस्य कार्यं
शान्तोऽपि पीडनवशात्क्रुधमुद्वहेत्सः ।
शीतस्सुखोऽपि मथितः खलु चन्दनद्रु-
स्तीव्रं हुताशजनको भवति क्षणेन ॥ १४ ॥

संप्रार्थितश्चरणयोः पतिताः पुरस्ता-
दन्वग्रहीत्करुणया किल कुम्भयोनिः ।
श्रीपार्वतीपतिपदाम्बुजभक्तियुक्ता-
स्तत्पूजनासु निरता भवतेति मन्दम् ॥ १५ ॥

यश्चोद्वहेत्स तु भविष्यति पूजकोऽस्मिन्
कन्या भवत्कुलभवास्सुकुमारगात्रीः ।
तस्मात्ततः प्रभृति तत्कुलकन्यकानां
भर्तार एव पशुपं किल पूजयन्ति ॥ १६ ॥

उद्दिश्य सेतुमनघं बहुपातकस्सन्
आजन्मनस्स्वकृतपातकराशिमुच्चैः ।
सङ्कीर्तयन् व्रजति यः परिमुच्यतेऽसौ
सेतुं विलोक्य सहसाखिलपातकेभ्यः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः पातकी व्रजतु कीर्तयतु स्वपापं
छत्रादि वर्तयतु जीवतु भैक्षवृत्त्या ।
रामस्य कीर्तिमिव मूर्तिमतीं स पश्येत्
सेतुं भवाब्धितरणेऽपि च सेतुभूतम् ॥ १८ ॥

श्रीगन्धमादनगिरौ किल वारिराशौ
स्नात्वानुघस्रमनुतर्प्य च देवतादीन् ।
संदृश्य गन्धकुसुमादिभिरर्चयेद्यः
श्रीरामनाथमभिवाञ्छितमेति मर्त्यः ॥ १९ ॥

नापर्वणीति वचनं न निषेधतीह
स्नानं तदन्यविषयं पुरुषोत्तमादेः ।
तस्मात्प्रशस्तमिह माघनिमज्जनञ्च
कुर्वीत पुण्यदिवसेष्विह पुण्यमिच्छुः ॥ २० ॥

सूर्योपरागदिवसे विहितोपवासः
स्नात्वा पुमान्यदि ददीत किमप्यनन्तम् ।
सेतौ गवादि ददतो न फलं गणेयं
शेषेण नैकलपनेन किमन्यमर्त्यैः ॥ २१ ॥

सेतुर्वरो विविधपातकपुञ्जहन्ता
शैलोऽपि तत्र रघुनन्दननामधेयः ।
यत्रापि सेतुमभिनद्भगवान् स कोट्या
चापस्य तीर्थमिदमुत्तममाहुरार्याः ॥ २२ ॥

[1]क्रुध्यन्प्रभुं निहतवानपि[2] राक्षसेन्द्रं
तद्बुद्धिमांस्त्रिषु पदेषु बिभेद सेतुम् ।
नूनं स्वकीयधनुषा न [3]तु राक्षसाना-
मत्रागमं निर्विविचारयिषुः प्रभुत्वात् ॥ २३ ॥

---

[1] का. प्रभुः ।
[2] अ. अपि ।
[3] अ. ननु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मात्मजाया क्षणदाचराणां
[1] शिरोविलेखं मनसात्र पश्यन् ।
मन्ये बिभेद स्वशरासनेन
सेतुं त्रिधासौ कृतकृत्य [2] आयन् ॥ २४ ॥

तीर्थेऽत्र मज्जनकृतां फलमन्यतीर्था-
ज्जायेत कोटिगुणितन्त्विति सूचनाय ।
कोट्या ध्रुवं स्वधनुषो विभिदे स राम-
स्सेतुं विभेदनविधौ बहुसाधनोऽपि ॥ २५ ॥

धनुष्कोटौ तीर्थे मुनिजननिषेव्येऽमितफले
कृतस्नाना धन्या जहाति दुरितं दुष्परिहरम् ।
विधूतांहोजालाः परिचितसुरा नन्दनवने
सदा सङ्क्रीडन्ते प्रचुरतरभोगैरुपचिताः ॥ २६ ॥

आसाद्य [3] तीर्थमिदमक्षयपुण्यधस्ते
स्नात्वा बलेन ददतोऽस्य फलं न मेयम् ।
दत्तं [4] पणं द्विगुणतामुपयाति काला-
त्तीर्थे वितीर्णमधुनैव बहुत्वमेति ॥ २७ ॥

रामेत्युदीर्य बहुशः खलु तीर्थदृश्वा
मुच्येत दोषनिवहात्किमु मज्जनादेः ।
आयान्ति तीर्थतनवो मुनयोऽप्यमुष्मा-
देष्यन्निहन्तुमनसो [5] दुरितं प्रमादात् ॥ २८ ॥

आदिश्यैवं भिक्षुराजस्सशिष्य
स्सेतुं दृष्ट्वा पुण्यतीर्थं निषेव्य ।
पश्यन्देशान्मातुलीयं जगाम
गेहं दाहं तस्य पुस्तेन सार्धम् ॥ २९ ॥

---

[1] अ. विलेखान् ।
[2] अ आसीत् ।
[3] अ पुण्यं ।
[4] अ. फलं ।
[5] अ. अनघा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वा किञ्चित्खेदमापेदिवान् स
मत्वा मत्वा धैर्यमापेदिवान्सः ।
श्रावं श्रावं मातुलेयस्य तीव्रं
दाहं गेहस्यानुकम्पां व्यधत्त ॥ ३० ॥

विश्वस्य मां निहितवानसि पुस्तभारं
तच्चाद् हुतवहः परितः प्रमादात् ।
तावन्न मे सदनदाहकृतोऽनुतापो
यावांस्तु पुस्तकविनाशकृतो मम स्यात् ॥ ३१ ॥

इत्थं ब्रुवन्तं [1]तमथाभ्यभाणीत्
पुस्तं गतं बुद्धिरवस्थिता मे ।
उक्त्वा समारब्ध पुनश्च टीकां
कर्तुं स धीरो यतिबृन्दवन्द्यः ॥ ३२ ॥

दृष्ट्वा बुद्धिं मातुलस्तस्य भूयो
भीतः प्रास्यद्भोजनं तन्मतिघ्नम् ।
किञ्चिद्रव्यं पूर्ववन्नोऽक्षमिष्ट[2]
टीकां कर्तुं केचिदेवं ब्रुवन्ति ॥ ३३ ॥

इत्थं स तीर्थनिकरं परिषेव्य शान्तो
द्रष्टुं ययौ स्वगुरुमेव पुनस्स तस्मै ।
देशाय यत्र वसति स्म स देशिकेन्द्र-
स्तस्मै नमो व्यधित [3]वृत्तमथोऽभ्यधत्त ॥ ३४ ॥

शिरःकपालं किल देशिकस्य खण्डं जनाः प्राहुरदो जिघृक्षुः ।
कश्चित्तिषेवे बहुधस्तमेनं योगी जितात्मा बहुसिद्धिकामः
॥ ३५ ॥

---

[1] अ. मथ न्यगादीत् ।
[2] अ. नाक्षमिष्ट ।
[3] अ. अथ; का. अथाभ्यधात्सः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तचादृशं सिद्धिदमीक्षमाणस्संसेव्य संमन्त्र्य मिथस्तमेति ।
दिनानि भूयांसि किलागुरस्य तं जातहार्दो भगवानथोचे
॥ ३६ ॥

योगिन्! न्यसेविषि चिरं बहुमानतोऽहं
किञ्चिप्सितं तव ददानि यदत्र शक्यम् ।
मर्त्यं हि तत्परहिताय शरीरमाप्यं
नो चेत्प्रयोजनमनेन किमस्ति लोके । ३७ ॥

अखण्डमूर्धन्यकपालमाहुस्संसिद्धिदं साधकपुङ्गवेभ्यः ।
विना भवन्तं बहवो न सन्ति तद्वत्पुमांसो भ्रावान्पृथि-
व्याम् ॥ ३८ ॥

तान्याचितुं न क्षमते मनो मे
को वेषधारी स्वशरीरमुज्झेत् ।
भवान्विरक्तो न शरीरमानी
परोपकाराय धृतात्मदेहः ॥ ३९ ॥

जनाः परक्लेशकथानभिज्ञा
नक्तंदिवं स्वार्थकृतात्मचित्ताः ।
रिपुं निहन्तुं कुलिशाय वज्री
दधीचिमार्दत्किल वाञ्छितास्थिः ॥ ४० ॥

वपुर्धरन्ते परतुष्टिहेतोः केचित्प्रशान्ता दयया परीताः ।
अस्मादृशाः केचन सन्ति लोके स्वार्थैकनिष्ठा दयया
विहीनाः ॥ ४१ ॥

इत्युक्तवन्तं भगवानथाब्रवी-
न्मिथस्समायाहि करोमि ते मतम् ।
नाहं प्रकाशं वितरीतुमुत्सहे
शिरःकपालं विजनं समाश्रय ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्या विदन्ति यदि चिन्तितकार्यमेत-
द्योगिन् मदेकशरणा विहतं विदध्युः ।
को वा सहेत वपुरेतदपोहितुं स्वं
को वा क्षमेत निजनाथशरीर[1]मोषम् ॥ ४३ ॥

तौ संविदं व्यतनुतामिति संप्रहृष्टौ
योगी जगाम मुदितो निलयं मनस्वी ।
श्रीशङ्करोऽपि निजधामनि जोषमास्त
नो[2] वेद कञ्चिदपि भावमसौ मनोगम् ॥ ४४ ॥

शूली त्रिपुण्ड्री परितो विलोकी
कङ्कालमालाकृतगात्रभूषः ।
संरक्तनेत्रो मदघूर्णिताक्षो
योगी ययौ देशिकवासभूमिम् ॥ ४५ ॥

शिष्येषु [3]शिष्टेष्वपि दूरगेषु
स्नानादिकार्याय विविक्तभाजि ।
श्रीदेशिकेन्द्रे च सनन्दनाख्ये
भीत्या स्वदेहं व्यवधाय गूढे ॥ ४६ ॥

तं भैरवाकारमुदीक्ष्य देशिक-
स्त्यक्तुं शरीरं व्यधित स्वयं मनः ।
आत्मानमात्म[4]न्युदयुङ्क्त योजयन्
समाहितात्मा करणानि संहरन् ॥ ४७ ॥

त्रिशूलमुद्यम्य निहन्तुकामं
गुरुं यतात्मा तमुदैक्षतान्तः ।
स्थितश्चुकोप ज्वलिताग्निकल्प-
स्स नन्दनो नाम गुरोर्हितैषी ॥ ४८ ॥

---

[1] अ. मोक्षम् ।
[2] अ. नोवाच
[3] अ. शिष्टेषु विदूरगेषु ।
[4] का न्यधियुङ्क्त ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स मन्त्रसिद्धो नृहरेर्नृसिंहो
बभूव रोषाद्विनिहन्तुकामः ।
ददार तं क्रूर[1]नखो नखाग्रै-
र्यथा हिरण्यं [2]परिपात्स्वभक्तम् ॥ ४९ ॥

तद्रोमकूपेषु समं हुताशाः
प्रजज्वलुर्भीषितसर्वलोकाः ।
ज्वलन्सहेतिर्भृशमुत्पपात
प्रासादमुख्यं विहिताट्टहासः ॥ ५० ॥

प्रासादमारुह्य स सिंहनादं
ननाद चोच्चैर्भुवनं [3]वितेने ।
पृथ्वी चकम्पे भुवनान्तरीपा
वार्धिस्तथाद्रिर्द्युसतोऽप्यवीक्षन् ॥ ५१ ॥

आकर्णयंस्तं निनदं बहिर्गता
उपागमन्नाकुलचित्तवृत्तयः ।
व्यलोकयन्भैरवमग्रतो मृतं
ततो विमुक्तश्च गुरुं सुखोषितम् ॥ ५२

कल्पान्तरुद्रमिव वह्निकणान्वमन्तं
सिंहाकृतिं झटिति विस्मृतमर्त्यभावम् ।
तुष्टाव तं गुरुवरः शमयन्रुषाग्निं
वाक्पाथसा जगदिदं परिपातुमिच्छन् ॥ ५३ ॥

नरहरे हर कोपमनर्थदं तव रिपुर्निहतो भुवि वर्तते ।
कुरु कृपां मयि देव सनातनीं जगदिदं भयमेति भवद्रुषा
॥ ५४ ॥

---

[1] का. तरैः ।
[2] अ. परियान् ।
[3] का. विधाय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तव वपुः किल सत्त्वमुदाहृतं तव हि कोपनमण्वपि नोचि-
तम् ।
तदिह शान्तिमवाप्नुहि शर्मणे हरगुणं हरिराश्रयसे कथम्
॥ ५५ ॥

[1] स किल भीतिषु देवतमं स्मरन्
सकलभीतिमपोह्य सुखी पुमान् ।
भवति किं प्रवदामि तवे[2]क्षणे
परमदुर्लभमेव तदीक्षणम् ॥ ५६ ॥

स्मृतवतस्तव पादसरोरुहं
मृतितुदं पुरुषस्य विमुक्तता
तव कराभिहतो मृतभैरवो
न हि स एष पुनर्भवमेष्यति ॥ ५७ ॥

दितिजसूनुममुं व्यसनार्दितं
सकृदरक्षदुदारगुणो भवान् ।
सकलगत्वमुदीरितमस्फुटं
प्रकटमेव विधित्सुरभूत्पुरः ॥ ५८ ॥

सृजसि विश्वमिदं रजसात्मभूः
स्थितिविधौ श्रितसत्त्व उदायुधः ।
अवसि तद्धरणे [3] तमसावृतो
हरसि देव तदा हरसंज्ञितः ॥ ५९ ॥

न च जनिर्न गुणास्तव तत्त्वतो
जगदनुग्रहणाय भवादिकम् ।
तव पदं खलु वाङ्मनसातिगं
श्रुतिवचश्चकितं तव बोधकम् ॥ ६० ॥

---

[1] अ सकल । [2] अ. तवेक्षणैः ।
[3] अ. आहतो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरहरे तव नामपरिश्रवात्
प्रथमगुह्यकदुष्टपिशाचकाः ।
अपसरन्ति विभो सुरनायका
न हि पुरःस्थितये प्रभवन्त्यपि ॥ ६१ ॥

द्विजकुलं श्रुतिराह तवाऽऽस्यजं
नृपकुलं तव बाहुयुगोत्थितम् ।
विशमिमं नरसिंह्म तवोरुजं
चरणजं वृषलं चरमं विदुः ॥ ६२ ॥

श्रुतिसमीरितकर्मफलेक्षण-
प्रतिभुवं [1] प्रविहाय विदं जनम् ।
यजति देव भवन्तमिहादरात्
न हि यजिः फलदा क्षमतेऽभ्रुवा ॥ ६३ ॥

सर्वार्थसाधनविधावदशप्रदीप-
मन्विष्य दैत्यहतमेष भवांस्तिरोगम् ।
पुंयोगदोषविरहात्स्वत एव मान-
मादाय मत्स्यतनुराहृत वेदराशिम् ॥ ६४ ॥

भूत्वा पयोधिमथने कमठः पुरा त्वं
संमज्जतो नु मथिमन्दरपर्वतस्य ।
पृष्ठं व्यदाः सकललोकहितं चिकीर्षुः
श्रीमन्नुनुत्सुरिव गात्रगतां च कण्डूम् ॥ ६५ ॥

दंष्ट्रान्तरे भुवमिमां जलधौ निमग्ना
मारोप्य मार्गगतदैत्यवरं निहत्य ।
उद्धृत्य पूर्वमिव तां समतिष्ठिपस्त्वां
भूदारमूर्तिरुदमज्जदुदन्वतोऽग्रे ॥ ६६ ॥

---

[1] अ. प्रविधाय विदन् जनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रह्लाददैत्यतनयेन हरेर्विमुखत्वे
प्रोक्ते तदीयवचनं [1]मतमेव कुर्वन् ।
स्तम्भं विदार्य सहसोत्थितवान्नखाग्रै-
र्वक्षोऽसुरस्य भगवान् बिभिदे विशालम् ॥ ६७ ॥

भूत्वा वटुः किल भवान् बलियज्ञशालां
गत्वा पदत्रयमयाचत वासहेतोः ।
पश्चात्क्रमेण ववृधे विममे च पादै-
र्लोकांस्त्रिभिर्बलिमथो भगवान्बबन्ध ॥ ६८ ॥

तातस्य मारणरुषा जमदग्निपुत्रो
भूत्वावधीर्नरहरे कृतवीर्यसूनुम् ।
[2]यश्चाविभः करसहस्रमभूत्पुरस्तात्
द्रव्यं ग्रहीतुमनसां किल तस्कराणाम् ॥ ६९ ॥

राजन्यकं समभिषिक्तमिह त्रिसप्त-
वारान्प्रभो पृथुबलं [3]बहु बाहुवीर्यैः ।
श्रीजामदग्न्यवपुरुत्परशुर्निहत्य
[4]श्रीकाश्यपाय पृथिवीमददः [5]किलैषाम् ॥ ७० ॥

पौलस्त्यपीडित[6]सुरार्थनया पृथिव्यां
पुत्रो भवान् दशरथस्य बभूव साक्षात् ।
प्राप्ताभिषेकविहतेर्वनमीयुषस्ते
सीतां जहार हरिणच्छलतो दशास्यः ॥ ७१ ॥

कान्तारपर्वतनदीतटदुर्गदेशान्
गत्वा व्यचेष्ट भगवान् दयितां दयालुः ।
गच्छन् क्वचित्पतगराजमपश्यदार्तं
संलूनपक्षतिमचेष्टममन्ददेहम् ॥ ७२ ॥

---

[1] अ. कृतमेव, क. जितमेव । [2] अ. यश्चाविभः ।
[3] अ. पृथु । [4] अ. कश्यपाय ।
[5] अ, किलेमाम् । [6] अ, धरा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमज्जटायुवचनादधिगम्य सीतां
वृत्तान्ततो रवितनूजसखित्वमाप ।
हत्वैन्द्रमुद्धतबलं पवनस्य सूनुं
संप्राहिणोद्दशमुखस्य पुराय देवः ॥ ७३ ॥

संपुप्लुवे जलनिधिं स जगाम लङ्कां
सीतामलोकत ददावथ चाङ्गुलीयम् ।
नत्वा बभञ्ज वनमक्षकमाजिहिंस
लङ्कां ददाह पुनरादित मूर्धरत्नम् ॥ ७४ ॥

आदाय मूर्धमणिमम्बुनिधिं स तीर्त्वा
रामाय वृत्तमखिलं कथयाम्बभूव ।
रामो ययौ कपिभिरुद्धतवायुवेगै-
स्तीर्त्वाम्बुधिं विहितसेतुपथेन लङ्काम् ॥ ७५ ॥

हत्वा दशाननमथो सबलं समित्रं
सीतामवाप्य दनुजं विदधेऽधिराजम् ।
आदाय शुद्धचरितां जनकात्मजां तां
आरोप्य पुष्पकमनेन ययावयोध्याम् ॥ ७६ ॥

बह्वीस्समा वसुमतीमनुशिष्य सम्यक्
भुक्त्वा च भोगमखिलं [1]भुवि देववत्सः ।
आरोप्य [2]राजधुरमात्मगतां तनूजे
स्वीयैस्समं निजपदं प्रतिपेदिवांस्त्वम् ॥ ७७ ॥

भूत्वा दाशरथिर्गतो मुनिवनं भङ्क्त्वा धनुर्जानकीं
[3]भेजे प्राप्तपदच्युतिर्विनगतस्सख्यश्च भानोस्सुते ।
हत्वा वालिनमम्बुधिं कपिगणैर्बध्वा जघान द्विषं
जानक्या सहितो भवान्पुनरगाद्रम्यामयोध्यां किल
॥ ७८ ॥

[1] अ. दिवि । [2] अ. राज्य ।
[3] अ. लेभे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूयश्चानकदुन्दुभेर्नरहरे श्रीरोहिणीगर्भगो
[1]दुष्टाक्रान्तधरार्थितो हलधरः श्रीरामसंज्ञोऽभवः ।
हालापानमदान्धकारितमनास्संरक्तनेत्रो युवा
कालिन्दीं विमला[2]म्भसं हलमुखेना[3]कर्ष मूचेजुषा
॥ ७९ ॥

तस्मादेव सुरार्थितस्सुरहितं कर्तुं विकारोज्झितो
देवक्यामजनिष्ट दुष्टनृपतिव्याजेन जातान्भुवि ।
दैत्यान्हन्तुमनाः पदाब्जशरणांस्त्रातुं दयालुब्धवान्
हत्वा कंसममोचयच्च जनकं सर्वान्यदून्वर्धयन् ॥ ८० ॥

विप्रेषु दूरचरितेषु कलौ विवृद्धे
नष्टोत्तरे [4]च निजवर्त्मनि धर्महानौ ।
कल्क्याख्यया द्विजवरस्य गृहे विशिष्टे
सर्वं पुनर्नवयितुं भवितासि देव ॥ ८१ ॥

देवावतारतनवः कथिता दशेह
कष्टं विनाश्य शुभया दशया अवन्तु ।
पृथ्व्यादिभूतगणव[5]त्परितोषनिष्ठा-
स्ताभ्यो नमो जगदमूः परिपालयन्तु ॥ ८२ ॥

एवं विशिष्टनुतिभिर्नृहरौ प्रशान्ते
स्वं भावमेत्य मुनिरेष बभूव शान्तः ।
स्वप्नानुभूतमिव शान्तमना[6]स्तमेन-
मात्मानमात्मगुरवे प्रणतश्चकार ॥ ८३ ॥

चित्तानुवर्ती निजधर्मचारी
भूतानुकम्पी तनुवाग्विभूतिः ।
कश्चिद्विनेयोऽजनि देशिकस्य
यं तोटकाचार्यमुदाहरन्ति ॥ ८४ ॥

---

[1] अ. दैत्या ।
[2] अ. हसन् ।
[3] अ. आकृष्ट आवीरुषा ।
[4] अ. निगमवर्त्मनि ।
[5] का. परितोऽपि ।
[6] अ. स्व ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नात्वा पुरा क्षिपति कम्बलवस्त्र[1]मुख्यै
रुच्चासनं मृदुशनैस्स ददाति नित्यम् ।
सन्तक्ष्य दन्तपरिशोधनकाष्ठमग्र्यं
[2]बाह्यावनिं गतवते सलिलादिकञ्च ॥ ८५ ॥

श्रीदेशिकाय गुरवे [3]तनुमार्द्रवस्त्रं
विश्राणयत्यनुदिनं विनयोपपन्नः ।
श्रीपादपद्मयुगमर्दनकोविदश्च
छायेव देशिकमसौ भृशमन्वियाय ॥ ८६ ॥

गुरोस्समीपे न तु जातु जृम्भते
प्रसारयन्नो चरणौ निषीदति ।
[4]नोपेक्षते वी बहु वा न भाषते
न पृष्ठदर्शी पुरतोऽस्य तिष्ठति ॥ ८७ ॥

तिष्ठन्गुरौ तिष्ठति संप्रयाते
गच्छन् ब्रुवाणे विनयेन शृण्वन् ।
[5]अनूच्यमानो विहितं विधत्ते
यच्चाहितं तत्कुरुते न तस्य ॥ ८८ ॥

भगन्दरो नाम वमन्ननस्रं
रक्तं विरक्तानपि बाधमानः ।
संबाधते देशिकशङ्करं स्म
उपेक्षितो व्याधिरनल्पतापः ॥ ८९ ॥

---

[1] का॰ मुख्यमुच्चासनं मृदु शनैः ।
[2] अ॰ बाह्यादिकं ।
[3] अ॰ तनुमार्जवस्त्रं ।
[4] अ॰ नावेक्षते ।
[5] अ॰ अनुच्यमानोऽपि हिते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्छोणिताक्तवसनं प्रतिघस्रमेष
कासारतीरगाशिलातलपृष्ठभागे ।
नेनेक्ति भक्तिवशगो न जुगुप्सतेऽसौ
यावन्मलं तदपगच्छति तावदद्धा ॥ ९० ॥

किञ्चित्समाधाय पुरोक्तमंशुकं
निर्णेतुकामस्सरसीतटं प्रगे ।
प्रयाति संक्षाल्य विशुद्धबुद्धये
जिघ्रत्यभीक्ष्णं पुनरेव धावति ॥ ९१ ॥

एवं यतात्मा वसनं दिनेदिने
प्रक्षाल्य [1]संवेष्ट्य ददाति भूयसे ।
शोकोऽपि किञ्चिन्मनसीति वर्तते
नाशक्नुवं किञ्चिदपीह वेदितुम् ॥ ९२ ॥

प्रक्षाल्यमानं वसनं यथात्मन-
श्शिरस्समाहन्ति शिलाश्च कर्कशाम् ।
भक्त्या परं क्षालयतो महात्मनः
पद्यात्मना सा परिणाममीयुषी ॥ ९३ ॥

श्रीमद्गुरोः पादसरोजमूला-
त्तदा[2]श्रया तत्करुणावसाना ।
भक्तिर्लता तोटकवृत्तवृन्त-
हृद्यानि पद्यानि फलान्यवाप ॥ ९४ ॥

---

[1] अ. संशोष्य; क-का. संशोष्य ।   [2] अ. तदाश्रयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्तचुरकर्षात्प्रादुरासन्यतोऽस्मा-
त्पद्यान्येवं तोटकाख्यानि सन्ति ।
तस्मादाहुस्तोटकाचार्यमेनं
लोके शिष्टाः शिष्ट[1]वर्यं मुनीन्द्रम् ॥ ९५ ॥

अद्यापि तत्प्रकरणं प्रथितं पृथिव्यां
तत्संज्ञया लघु महार्थमनल्पनीति ।
शिष्टैर्गृहीतमतिशिष्टपदानुविद्धं
वेदान्तवेद्यपरतत्त्वनिवेदनं यत् ॥ ९६ ॥

यत्रा स्त्यसुराङ्गनाविवदनं चापस्य कोट्याहृयं
तीर्थं वर्णितमुग्रभैरवजयः [3]श्रीतोटकेड्येडनम् ।
श्रीमच्छङ्करदेशिकेन्द्रविजये व्यासाद्रिणा निर्मिते
सर्गोऽयं नवमो गतोऽत्र महितः सानन्दनो नन्दनः
॥ ९७ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
नवमस्सर्गः ॥

[1] अ. वंश्यं । [2] अ. श्रीतोटकस्येडनं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ दशमस्सर्गः ॥

भगन्दरव्याधिनिपीडितं गुरुं
निरीक्ष्य शिष्यास्समबोधयञ्छनैः ।
नोपक्षणीयो भगवन्महामयः
संपीडयन् शत्रुरिवर्धिमाप्नुयात् ॥ १ ॥

ममत्वहानाद्भवता शरीरके
न गण्यते व्याधिकृतेतिरीदृशी ।
पश्यन्त एवान्तिकवर्तिनो वयं
भृशातुरा [1]दुस्सहतद्व्यथासहाः ॥ २ ॥

चिकित्सका व्याधिनिदानकोविदा
स्संपृच्छनीया भगवन्नितस्ततः ।
प्रत्यक्षवत्संप्रतियन्ति पूरुषा
[2]जीवातुवेदं गदितार्थसिद्धयः ॥ ३ ॥

[3]निर्देशमात्राद्भगवन् भिषग्वरान्
यतः कुतश्चिद्वयमानिनीषवः ।
सन्देशमात्राद्भवतो धुतेनसो
निशम्य नागच्छति नाम कः पभो ॥ ४ ॥

उपेक्षमाणेऽपि गुरावनास्थया
शरीरकादौ सुखमात्मनीश्वरैः ।
नोपेक्षणीयं गुरुदुःखदृश्वभि-
र्दुःखं विनेयैरिति शास्त्रनिश्चयः ॥ ५ ॥

---

[1] अ. स्मस्सहसा व्यथासहाः ।
[2] अ. जीवानुवेदं ।
[3] का. निदेश ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्थे भवत्पादसरोरुहद्वये
स्वस्था वयं ते[1] मधुपायिवृत्तयः ।
तस्माद्भवेत्तावकविग्रहो यथा
स्वस्थस्तथा वाञ्छति पूज्य नो मनः ॥ ६ ॥

व्याधिर्हि जन्मान्तरपापपाको
भोगेन तस्मात्क्षपणीय एषः ।
अभुज्यमानः पुरुषं न मुञ्चेत्
जन्मान्तरेऽपीति हि शास्त्रवादः ॥ ७ ॥

व्याधिर्द्विधा नः कथितो [2] विदद्भिः
कर्मोद्भवो धातुकृतस्तथेति ।
आद्यक्षयः कर्मण एव लीनात्
चिकित्सया स्याच्चरमोदितस्य ॥ ८ ॥

तदीयतां कर्मण एव संक्षयात्
व्याधिः प्रवृत्तो न चिकित्स्यते मया ।
पतेच्छरीरं यदि तन्निमित्ततः
पतत्ववश्यं न बिभेमि किञ्चन ॥ ९ ॥

सत्यं गुरोस्ते न शरीरलोभः
स्थिराय तस्मै स्पृहयालुता नः ।
त्वज्जीवनेनैव हि [3]जीवनं न
श्चराचराणां जलमेव जीवः ॥ १० ॥

स्वयंकृतार्थाः परतुष्टिहेतो
र्जीवन्ति सन्तो निजदेहरक्षाः ।
तस्माच्छरीरं परिरक्षणीयं
त्वयापि लोकस्य हिताय विद्वन् ॥ ११ ॥

---

[1] अ. यन्मधु ।
[2] अ वदद्भिः ।
[3] अ जीवनं नो यथा चराणां ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्बन्धतो गुरुवरः प्रददावनुज्ञां
दिग्भ्यो भिषग्वरसमानयनाय तेभ्यः ।
नत्वा गुरुं प्रतिदिशं प्रययुः प्रहृष्टाः
शिष्याः प्रवासकुशला गुरुभक्तिभाजः ॥ १२ ॥

राजेव वारणपतिं गिरिमारुरोह
पूर्वं रविः पृतनयेव गभस्तिराज्या ।
जेतुं विपक्षमिव कृष्णमहान्धकारं
तेषु प्रयत्सु मुनिवर्यसमाश्रयेषु ॥ १३ ॥

शीघ्रं पलायत तमोऽरिरतीव भीतो
भानोर्नवेन पृथुरश्मिबलेन नुन्नः ।
कूजन्मधुव्रतकदम्बकमुच्चकाशे
पद्मं रथाङ्गमिथुनं तमियाय भूयः ॥ १४ ॥

स्नात्वा द्विजा नदनदीसरसीषु गत्वा
दत्वार्घ्यमब्जसुहृदे रवये प्रजेपुः ।
दर्भाङ्कुराकलितदोर्युगलास्तदीय-
बिम्बे निविष्टनयना जितमानसाश्च ॥ १५ ॥

संप्रोषिते रविनृपे तिमिराख्यचौरै-
र्ग्रस्तं बभूव निखिलं भुवनं विशेषैः ।
तस्मिन्नधिष्ठितवति स्वपदं भयेन
मन्ये पलायनपरैरिति वान्तमेतत् ॥ १६ ॥

प्रायो नृपं कविजना भिषजो वदान्यं
वित्तार्थिनः प्रतिदिनं कुशला जुषन्ते ।
तस्मादमी नृपपुरे विनिरीक्षणीया
इत्येव चेतसि मनोरथमादधानाः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुङ्गैश्शृङ्गैरुच्छ्रितं सह्यशैलं
[1]प्रापन्भ्रान्ता शाङ्करीया विनेयाः ।
यस्मान्नद्यो लब्धजन्मान उच्चै-
र्वीरांनाथं यान्ति भर्तारमग्र्यम् । १८ ॥

[2]उद्यच्छिरोलम्बिसुदीर्घपुच्छै-
र्गजेन्द्रकुम्भस्थलभेदनोत्कैः ।
प्रसारिताङ्गैर्लघु लङ्घमानै-
र्निषेवितं सिंहगणैर्नदद्भिः ॥ १९ ॥

एणैस्सशावैश्चटुलायताक्षैः
किञ्चित्परावृत्तमुखैस्सुभीतैः ।
समुच्चलद्भिस्सकृदीक्षमाणै-
र्निषेव्यमाणं मधुराङ्गशोभैः ॥ २० ॥

बृहच्छिलानामुपरि प्रविष्टै-
स्सङ्कोचिताङ्गैर्बहु गर्जयद्भिः ।
व्यात्ताननैर्मूर्छितचञ्चलैणै-
रध्यासितं व्याघ्रगणैः क्वचिच्च ॥ २१ ॥

अनेकपादैर्बहुगण्डवप्रै-
र्गलज्जलैरुन्नतकुम्भकूटैः ।
विलम्बिलाङ्गूलकरश्मिदीप्तैः
निषेव्यमाणं करिभिस्सुरूपैः ॥ २२ ॥

मुनिजनैस्सहसा समुपेयिवान्
परिजनस्समवोचत कश्चन ।
गिरिवरेक्षणविस्मितमानसः
शुचिमनाश्शुचिदन्तधरो द्विजः ॥ २३ ॥

[1] अ. दान्ताः ।
[2] का. उद्यच्छिरोभिः पृथुदीर्घपुच्छैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इह वसन्ति नदीतटसंश्रया
मुनिजना बहुसिद्धिमभीप्सवः ।
बहुतपश्चरणेषु कृतश्रमाः
विधुतपापचयास्सुकृतादराः ॥ २४ ॥

विद्याधरा बहुसुखेऽत्र वने रमन्ते
विद्याधरीभिरमिताभरणाभिरिद्धाः ।
एला[1] फलामृदितगन्धिनदीजलस्पृ-
ग्वातेन सेवितत‌रे सुमनोऽभिरामे ॥ २५ ॥

सम्पश्यध्वं पादपा ये गिरिस्थाः
शाखा[2]भिस्ते संस्पृशन्ति स्वमूलम् ।
पुष्पैर्युक्तास्त[3]स्फलैस्तत्प्रवालैः
स्थाने तेषां पूर्णता येषु दृष्टा ॥ २६ ॥

निघृष्यमाणा वरदान्तिभिः स्फुटं
मुञ्चन्ति गन्धं बत चन्दनद्रुमाः[4] ।
विमुच्यमाना भुजगाङ्गवेष्टनैः
प्रायेण साम्ना खलता न याति ॥ २७ ॥

पश्य नृत्यति कलापिनी ध्रुवं
स्वं कलापमखिलं प्रसार्य सा ।
दिक्प्रसारितजटाकदम्बकं
[5]नृत्तशम्भुमनुकर्तुमिच्छया ॥ २८ ॥

---

[1] अ. फलत्रुटित ।
[2] अ. हस्तैः ।
[3] अ. सत्फलैस्सत्प्रवालैः ।
[4] अ. द्रवः ।
[5] अ. नृत्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गजानां सत्पोताः कपटनिपुणै[1] र्बद्धविदुरै-
र्निपात्यन्ते वार्यां बहुविधनिनादैरुपहितैः[2] ।
महीध्रेऽस्मिन् प्राज्ञैः करिवरघटामन्तरगतां
प्रकुर्वाणैश्शूरै[3] रहह मनुजाः किश्चन विदुः ॥ २९ ॥

गतेषु सर्वेषु [4] निपत्य वार्यां
शिशुं करीन्द्राः स्वकरं प्रदाय ।
समुद्धरन्तीह महाप्रयासात्
शिशौ तिरश्चामपि [5]हार्दभावः ॥ ३० ॥

अष्टाङ्गयोगसरणिं परिगृह्य केचित्
संयुञ्जते जितसदागतयो महान्तः ।
संलीनदुर्जयहृषीकगणाः स्थिराङ्गाः
कण्डूयितं कृतधियो हरिणास्तदङ्गैः ॥ ३१ ॥

पृथ्वीं जले तदपि तेजसि तच्च वायौ
तं व्योम्नि खश्च महति प्रकृतौ तदत्र ।
[6]संगृह्य विश्वमखिलं परभूयमात्मा-
स्तिष्ठन्ति वेदशिरसोऽवगतात्मतत्त्वाः ॥ ३२ ॥

यद्वायुसङ्घटितपादपघट्टनोत्थ-
वह्निस्तृणेषु पतितः प्रथिमानमेति ।
तद्भीतितो मृगगणः प्लवगाश्च सत्वा
धावन्ति मूढमनसो विदिशो दिशोऽत्र ॥ ३३ ॥

अनारतं क्षोभमवाप्नुवन्तं
पतिं नदीनामचलं प्रकृत्या ।
दृष्ट्वा शरव्याजवशेन शङ्के
हसत्यसौ भूमिधरस्सगर्वः ॥ ३४ ॥

---

[1] अ. बन्धुविधुरैः ।
[2] अ. उपचितैः; का. उपहृतैः ।
[3] अ. क्रूरैः ।
[4] का. निपात्य ।
[5] अ. हार्दपाशः ।
[6] का. संहृत्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्ट्वा समुद्रं हसनं ममापि
सञ्जायते प्राप्तविकारमेनम् ।
फेनायमानं विवशं पतन्त-
मितस्ततो मर्तुमिवालुठन्तम् ॥ ३५ ॥

पुरा सपक्षास्सकला महीध्रा-
स्तेन स्म बाधन्त उपेत्य सर्वान् ।
चिच्छेद पक्षान्कुलिशेन वज्री
तेनाभवद्गोत्रभिदित्यभिख्या ॥ ३६ ॥

भीतास्तदानीं जलधिं प्रपन्ना
मैनाकमुख्या गिरयो महान्तः ।
ररक्ष तानौरसवच्छरण्य
स्तेन प्रपन्नार्तिहरत्वमस्य ॥ ३७ ॥

प्रयान्त्यपूर्वं परिगृह्य भाण्ड-
मायान्ति तेनैव तथाम्बुराशिम् ।
आश्रित्य [1]सर्वेऽपि निजार्थमाप्ता-
स्सांयात्रिकाणां गतिरेष साक्षात् ॥ ३८ ॥

राजेव धर्मी सुसमृद्धिमानसौ
वेलामतिक्रामति नो कदाचन ।
युक्तोऽपि नित्यं बहुभिर्जलाशयै-
[2]र्वृद्ध्या महात्मा विनयाय कल्पते ॥ ३९ ॥

प्रसूय कन्यामिव रत्नजातं
ददात्यसावर्थिवराय हृष्यन् ।
ततोऽस्य रत्नाकरताप्रसिद्धि-
र्महान्परप्रीणनकारको हि ॥ ४० ॥

---

[1] अ. वणिजोऽर्थे ।   [2] अ. वृद्ध्यन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सुरभिरुपागमत्प्रमोदी
वदति मुनीन्विषयेषु शिष्यविप्रे ।
रविमधुपगणैर्निषेव्यमाणः
श्रुतिसुखकोकिलकूजितेन सार्धम् ॥ ४१ ॥

नामतः श्रुतिसुखापि मञ्जरी
दर्शनीयतमतां गतापि सा ।
शोकदा भवति खल्वशोकजा
देहिनो विरहिणोऽत्र दुस्सहा ॥ ४२ ॥

पुष्पैश्शुभैः किसलयैरवनम्रशाखा
वृक्षा बभूवुरधिकं गिरिकाननस्थाः ।
पद्मानि पद्मनिलयाः परिहाय शीघ्रं
हुंकारिणो मधुकरास्तरुषण्डमीयुः ॥ ४३ ॥

मन्दं ववौ गिरिसरित्सलिलावगाही
वायुः प्रसूनरजसोपहितस्समन्तात् ।
चित्तं बभूव सहसा कलुषं जनानां
मूर्छामवाप जनता विरहाग्नितप्ता ॥ ४४ ॥

आस्वादयन्मधुरचञ्चुपुटेन मन्दं
पुंस्कोकिलो रसकषायितकण्ठनालः ।
मृद्वीं रसालकलिकां मदनास्त्रभूता-
मुद्दीपयन् कुसुमकार्मुकमुच्चुकूज ॥ ४५ ॥

परागाः प्रासूनः पवनबलनुन्नस्सुरभयो
गलन्तस्संव्यापन् गिरिवनभुवश्छादितलताः ।
सृजन्तश्शान्तानामपि च विकृतिं मानसगतां
[1]सुदूरं गच्छन्ती पथिकजनता द्रष्टुमनलम् ॥ ४६ ॥

---

[1] अ. सुदुरात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मधुव्रतानां परिपूर्णमेव त-
द्व्रतं यदेषां मधुपानसंज्ञितम् ।
नानाविधे पुष्परसे सहोदिते
बभूव तेषामपि चञ्चलं मनः ॥ ४७ ॥

[1] असना व्यसनाय केवलं
परितापाय विकासिमाधवी ।
मधुरा मधुलेहिगीतिका
विपरीता समजायताध्वगे । ४८ ॥

मन्दो वायुः कूजितं कोकिलानां
गीती रम्या षट्पदानां मदेन ।
पौष्पो गन्धस्सान्निधिश्चाङ्गनानां
चित्तं सर्वं सञ्जहाराशु पुंसाम् ॥ ४९ ॥

उपचितसुरभिश्रियं प्रपश्यन्
वसतिं [2] सुताभिरतिं विहाय शीघ्रम् ।
कतिपयदिवसस्थितिं दुरापां
युवतिजनो युवभिर्वनं विवेश ॥ ५० ॥

अपचिचीषुरगात् युवभिस्समं
सुरभिपुष्पतरून् सुमनश्चयम् ।
स्तनभरानमितः कृशमध्यमो
विकासिताब्जमुखो वनितागणः ॥ ५१ ॥

पुष्पं लुनाना कमितारमेका
जग्राह भीतेव मधुव्रतालेः ।
अन्या परागः पतितो ममाक्ष्णी-
त्येवं ब्रुवाणा पतिमाससाद ॥ ५२ ॥

---

[1] अ॰ असनं । [2] सुतादिरतिं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कश्चिद्बबन्ध सुमनोरचितावतंसं
पत्न्यास्समं शिरसि नेत्रजलैस्सपत्न्याः ।
उच्चैः प्रसूनमिति सा ह्यवहत्ततोऽन्या
सावाचिनोष्ट कुसुमं पुलकाञ्चिताङ्गी ॥ ९३ ॥

मृद्वींवदां मृदुपदां स्तबकस्तनाढ्यां
पत्रेक्षणां किसलयाधरशोभमानाम् ।
शाखाभुजामपचिचाय वधूस्सुरूपां
पुष्पन्धयेन रसिकां तनुदीर्घयाष्टिम् ॥ ९४ ॥

काचिल्लतागृहगता लतिकासमाङ्गी
स्वन्तर्दधे निजसखीभ्य उदारचेष्टा ।
एनां निजाः प्रकुशला मृगयाम्बभूवुः
सख्यो न वीक्षितुमलं जहसे तयोच्चैः ॥ ९५ ॥

अन्या तरोः कोटरगा निलिल्ये
विहाय तस्मिंस्तमसाऽऽवृते सा ।
तस्माद्विनिर्गन्तुमपारयन्ती
चुक्रोश दीनोद्धरतेति सख्यः ॥ ९६ ॥

कश्चित्परीहासपरोऽप्यधत्त
चक्षुर्द्वयं दोर्युगलेन पत्न्याः ।
पृष्टे समागम्य वदेति चोक्ता
प्रोचे सुखस्पर्शवशेन नाम ॥ ९७ ॥

उच्चास्थितां कुसुमितामवनम्य दत्तां
शाखां लुलाव कुसुमं दधती धवेन ।
अन्या चुकोप रमणाय च तत्सपत्नी
[1]मात्सर्यमङ्कुरितमाशु ततस्ससाद ॥ ९८ ॥

---

[1] का॰ माकलितमाशु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पं लुनन्त्याः परिमुक्तमन्य
स्सुकेशपाशं प्रसवैर्बबन्ध ।
तदीक्षमाणा कुपिता सपत्नी
तत्याज पुष्पं त्वरितं जगाम ॥ ५९ ॥

पुष्पावचायात्परिपेशलानि
स्वभावरक्तानि कराम्बुजानि ।
विशेषरक्तानि बभूवुरासां
प्रायःशरीरं मृदु पुष्पतोऽपि ॥ ६० ॥

नदीषु गङ्गां नगरीषु काञ्चीं
देवेषु शम्भुं ललनासु गौरीम् ।
ग्रहेषु सूर्यं करणेषु चक्षुः
काले वसन्तं जगुरुत्तमं नः ॥ ६१ ॥

शुचिः स्वयं शोकनिदानभूमि·
रन्तर्बहिस्सञ्जनयन् प्रदाहम् ।
तपस्विनामुग्रतपोऽनुकूलं
शुक्रेण साकं शुचिराजगाम ॥ ६२ ॥

कर्माणि जन्मान्तरसञ्चितानि
यथा परीपाकमवाप्नुवन्ति ।
भवान्तरे तद्वदिहोदितानि
फलानि सस्यानि च पाकमीयुः ॥ ६३ ॥

खरांशुस्तीव्रात्मा क्षितिगतरसं वस्तुनिचयं
करैर्निष्पीड्यायं हरति शुचिगो दुस्सहतनुः ।
प्रजानां दुष्टात्मा क्षितिपतिरसावर्थनिचयं
यथाऽऽकृष्यादत्ते करकपटतो लोभवशगः ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूगारामः शुष्कवल्लीनिकायो
जातश्शोच्यो निष्कलत्रो गृहीव ।
धन्यो देशो यो नदीमातृकोऽयं
तस्मिन्नासीच्छोच्यभावो जनानाम् ॥ ६५ ॥

आपगास्समभवन्ननापगाः
शोषमाप सरसी शनैश्शनैः ।
दुस्सहज्वरगृहीतमर्त्यवत्
कूपजातमभवच्च पूर्ववत् ॥ ६६ ॥

जीवनन्तु परिलब्धुमनीशो
देवमातृकगतोऽपि सलज्जः ।
आपशायिकमियाय भोजनं
जीवनेऽसुलभ एव हि मानः ॥ ६७ ॥

शान्ते प्रवाहे सलिलानि वाप्या
उद्धर्तुमारप्सत यन्त्रमुख्यैः ।
कैदारिकश्चापि कृषीवलास्ते
विशोषिसस्याय विधूतनिद्राः ॥ ६८ ॥

आपादकामस्तकचन्दनोक्षिता
धारानिकेतेषु वसन्ति भोगिनः ।
लब्ध्वेव वस्त्रं परिधातुमिच्छवो
जनास्तदा शीतलवस्तुसेविनः ॥ ६९ ॥

कालो न दूष्यः स्वयमेव दूष्यतां
पुमानयं पुण्यकृतो महात्मनः ।
सुखाय सर्वं भवतीह विष्टपे
तत्तत्परीहारयुतस्य देहिनः ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकासि सायंतनमल्लिकानां
धावल्यनि[1]र्भर्त्सितचन्द्रिकानाम् ।
दिग्व्यापिसौरभ्यमुचां समूहै-
र्जिघ्ये स्मितं शुभ्रदतो मुरारेः ॥ ७१ ॥

पुष्प्यन्ति वृक्षास्सुरभौ प्रकामं
शुचौ द्रुमाणां विरलं प्रसूनम् ।
तन्न्यूनतां नूनमसौ विहन्तुं
नीपः प्रसूनं सुषुवेऽप्यगन्धम् ॥ ७२ ॥

निदाघकान्तारविहारजश्रमं
नितम्बिनीनां परिहर्तुमुद्यतः ।
गणो ययौ निर्मलनिम्नगातटं
तापस्य शान्तिः प्रथमं हि पाथसा ॥ ७३ ॥

निदाघतप्तोऽपि निसर्गभीरु-
र्जलं प्रवेष्टुं न शशाक भीत्या ।
विश्वासमुत्पादयितुं पुरस्ता-
न्नदीमगाहन्त युवान एव ॥ ७४ ॥

एतावदेव जलमित्यसकृद्ब्रुवाणे
पूर्वावगाढसलिले प्रियबन्धुवर्गे ।
वध्वोऽवतेरुरुदकाशयमप्रगल्भाः
पीनस्तनावनतमध्यमभङ्गशङ्काः ॥ ७५ ॥

पीनस्तनस्तबकिताश्शुचि[2]दन्तपुष्पा
नेत्रच्छदा मुखफलास्तरुणारुणाङ्घ्रयः ।
शोणाधराङ्घ्रिकरपल्लवशोभमाना
वध्वो भृशं शुशुभिरे नववल्लरीवत् ॥ ७६ ॥

---

[1] अ. निर्भासित । [2] अ. शुभ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिययुर्ललनामुखपङ्कजं
मधुकरास्सरसीरुहबुद्धयः ।
सुरभिगन्धि[1] ललोचनपत्रकं
पटुलकण्ठमृणालमनोहरम् ॥ ७७ ॥

अभिपतद्भ्रमरालिविनीतव-
न्निजममूः कमितारमुपाश्रयन् ।
अलमलं चकितेन मृगेक्षणाः
कुरुत मज्जनमित्युपपादिताः ॥ ७८ ॥

नितम्बिनीनां [2]जघनस्थलादिभि-
र्दृढाभिघातात्पृथुलैर्जलाशयः ।
समुत्थितोर्मिः [3]सरसाम्बुपूरः
स तीरभूमिं समपिप्लवत्क्षणात् ॥ ७९ ॥

तदङ्गरागैर्विविधैस्तदम्भ-
स्सतीरपङ्कैः कलुषं बभूव ।
अन्योन्यवक्त्राणि जलैरसिञ्चन्
हस्तैर्न तत्क्लेशमजीगणंस्ताः ॥ ८० ॥

काचित्कमित्रावधृता भुजाभ्यां
ततार जानत्यविजानतीव ।
न चक्षमे तत्किल तत्सपत्नी
भर्तारमैक्षिष्ट रुषाऽरुणाक्षी ॥ ८१ ॥

कश्चित्सिषेच सलिलैर्वदनं प्रियाया
स्स्नेहे न तत्प्रतिवधूर्विससर्ज बाष्पम् ।
वीक्षाम्बभूव कुटिलेन विलोचनेन
कोपारुणेन च बभूव पराङ्मुखी सा ॥ ८२ ॥

---

[1] अ. विलोचन ।
[2] अ. स्तनादिभिः ।
[3] अ. स्त्वमिपातयन् मुहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्योन्यसेचनवशान्नयनान्तरस्थं
नीलाञ्जनं विलयमाप [1] च तत्क्षणेन ।
आरुण्यमाप नयनं पुनरेव तासां
वक्त्रं रुचिं [2] न विजहौ पुनरुक्तशोभम् । ८३ ॥

अपनिनीषुरयं वनितागणो
वनविहारपरिश्रममुल्बणम् ।
जलमगाहत तद्वसनादभू-
द्विगुणितं श्रमदं बत सुभ्रुवाम ॥ ८४ ॥

उत्तेरुरुत्तमगुणास्सलिलाशयार्ता
आर्द्राम्बरस्फुटनिबद्धतनूलताकाः ।
उत्थाय सूक्ष्मवसनं वसते स्म कौश्यं
वस्त्राण्यनेनिजुरशोषि च ताभिरद्धा ॥ ८५ ॥

तत्स्थाङ्गरागनिवहैस्सुरभीकृताम्भः
स्पृष्ट्वा ववौ वनमहीरुहमातरिश्वा ।
तेन श्रमो निववृते ववृधे च कामः
पातुं मधुं समामियेषं वधूगणः स्वैः ॥ ८६ ॥

युवतयो युवभिस्सममाश्रयन्
मृदुलकुट्टिमसौधमनुत्तमम् ।
मणिमयं मणिसाधितवर्त्मना
कुचभरावनताः [3] कृशमध्यमाः ॥ ८७ ॥

सुरभिपुष्पसुवासितकुट्टिमे
क्रमत एव गतास्समुपाविशन् ।
प्रियतमैः पपुरासवमादृता-
श्चषकरत्नवितीर्णममूस्सुखम् ॥ ८८ ॥

---

[1] अ. ततः क्षणेन । [2] अ. नहि जहौ ।
[3] अ. नमिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उभयमेतदपि स्फुटमीक्षितं
मधु वधूवदनञ्च सुगन्धिमत् ।
मधुगतः किमयं मुख ईक्ष्यते
मुखगतो मधुनीति विशेमहे ॥ ८९ ॥

मधु पिबन् दयितो न तथा पुरा
प्रियतमामुखगेन यथामुना ।
सुखमवाप तथा प्रियवल्लभा
प्रियतमार्पितसीधुरमोदत ॥ ९० ॥

प्रियतमार्पितमासवमेकका
विषममंस्त वधूर्यदयं ददौ ।
प्रियतमा प्रतिपक्षजनाय तत्
कठिनमासु मनो विमृदुस्तनुः ॥ ९१ ॥

चषकरत्ननिविष्टमुखं स्वकं
समभिवीक्ष्य ननन्दुरतीव ताः ।
प्रियतमाभिजयाय मनो दधु-
र्विजयदं वपुरेव हि केवलम् ॥ ९२ ॥

मधुमुखेन मधुर्विकृतिं शनै-
र्जनयति स्म वधूषु सभर्तृषु ।
जहसुरुल्लसितानि हि कारणं
निजगदे [1] बहुधाप्यनुतापदम् ॥ ९३ ॥

श्लथमभूद्वदनं स्खलिता गति-
श्शिशुवचोऽनुचकार वचः स्फुटम् ।
प्रवसनाय मनोऽधित सा त्रपा
भवति या समलङ्करणं स्त्रियः ॥ ९४ ॥

का. पुनरप्यनु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिशयेन मधोरिव सेवना-
दवशगः कुरुते नमनादि सः ।
करणजातमभूत्सलयं क्षणं
क्षणविबुद्धमयं महिमा मधोः ॥ ९५ ॥

अशिशिराम्बुभिराननसंस्थितैः
कुचसरोरुहकुड्मलवासिभिः [1] ।
अरुणमिश्रितनेत्रसरोरुहै-
र्वपुरशोभत तद्धरिणीदृशाम् ॥ ९६ ॥

अथ रविश्चरमाद्रिमवातरत्
द्विजगणोऽध्ययनात्समुपारमत् ।
[2] अधिनगाध्यमवाक्यमनुस्मरं-
स्तदिह मानमुदीरितमव्ययम् ॥ ९७ ॥

मुमुदिरे कुमुदानि विपक्षगो
रविरसावपतज्जलधाविति ।
इति निशम्य वचस्सरसीरुहं
समुकुचद्विरहेण रवेरिव ॥ ९८ ॥

नदनदीसरसीगतवारिभि-
र्रविमुदीक्ष्य कराम्बुरुहैर्ददौ ।
सवितृबिम्बनिविष्टमना मनाक्
अनघमर्घ्यमनल्पफलाय सः ॥ ९९ ॥

मनुविसृष्टजलं परमास्त्रकं
भगवतो रथतो बहिरास्थितम् ।
अभिजघान बलं बलिरक्षसां
[3] गणमदो निरगाद्रुधिरं ततः ॥ १०० ॥

---

[1] अ. पातिभिः । [2] अ. अधिगतार्थं ।
[3] अ. गणमथो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत इदं रुधिरारुणमिष्यते[1]
गगनमण्डलमञ्जनसंनिभम् ।
इति वदन्ति जनाः खलु सन्ध्ययो-
[2]ररुणतात्र मृषास्ति न सा तयोः ॥ १०१ ॥

विरहमाप रथाङ्गसमाह्वय-
स्तत इदं तमसा जगदावृतम् ।
तरुमहीधरकाननभेदनं
न च शशाक विबोद्धुमयं जनः ॥ १०२ ॥

देशान्तरं नृप इवाधिगते दिनेशे
क्रान्तं तमःकुपतिना भुवनाख्यराज्यम ।
दृष्ट्वोदगादिव रुषारुणबिम्बशाली
चन्द्रस्तदीयसुतवन्निजराज्यमायन् ॥ १०३ ॥

अपससार तमो नृपचोरवत्
शशिनृपो विरराज महाप्रभुः ।
अपि बभौ सुतरां ककुभामुखं
नृपवधूमुखवन्नृप आगते ॥ १०४ ॥

आनन्दयन्नमृत[3]रश्मिरपारतेजा
राजा रराज भुवनश्रमनुत् सुशीतः ।
स्वस्थोऽधिरूढनिजराज्यपदं सतार-
स्संभावयन्कुमुदबन्धुवनं विनाथम् ॥ १०५ ॥

कश्चिद्युवा युवतिमाह विलोक्य चन्द्रं
दिङ्मण्डलीमुखविकासनसंप्रवृत्तम् ।
वामे निधाय करपल्लवमेतदीय-
स्कन्धे निजं तदुपगूहनहृष्टरोमा ॥ १०६ ॥

---

[1] अ. [ईक्ष्यते]
[2] अ. अरुणतेति ।
[3] का. गोभि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बामोरु पश्य मृदुशीतकरः कराग्रैः
आशाङ्गनातनुकुचान्स्पृशति क्रमेण ।
सच्छृङ्गचूचुकयुतांस्तरुकन्चुकाढ्यान्
मत्तो युवेव चपलस्सकलङ्क इन्दुः ॥ १०७ ॥

क्षीराम्बुधिं प्रभवमस्य वदन्ति सन्तो
यत्रोदपादि सकलं बहुमानवस्तु ।
श्रीकौस्तुभः सुरतरुर्धवलो गजेन्द्रः
श्रीमत्सुधा भगवती कमला हरिश्रित् ॥ १०८ ॥

एते पुरा निगदिताः सहजा मृगाक्षि
चन्द्रस्य चन्दनरसादपि शीतलस्य ।
क्षीराम्बुधिर्जननभूः किरणस्सुधाम्ना
मूर्तिस्तथापि मलिना विधिरप्रकम्प्यः ॥ १०९ ॥

वंशद्वयं सुतनु संप्रथितं पृथिव्यां
तत्रोदपादि चरमः खलु चन्द्रमस्तः ।
यत्रोदपद्यत नृपाः प्रथितानुभावाः
श्रीकार्तवीर्यभरतप्रमुखा महान्तः ॥ ११० ॥

पुष्णाति तीक्ष्णकिरणात्तरसा निदाघे
सर्वौषधीरनुगतः किरणैस्सुधाभिः ।
रात्रौ दिवातनदिवाकरतप्तजन्तू-
नाप्याययन्नवति सुभ्रु सुधांशुरेषः ॥ १११ ॥

रात्रौ वराङ्गि युवभिर्घटने वधूनां
पुष्पायुधस्य शिशिरांशुरमात्य एषः ।
घस्रे मधुर्गदितकार्यविधावमात्यौ
द्वावित्थमस्य गदितौ परमौ सहायौ ॥ ११२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नास्यास्ति किञ्चिदपि लक्ष्म कलङ्कभावं
चन्द्रे कलङ्करहिते जनतेयमाह ।
आरोप्य भूगतमिदं प्रतिबिम्बमात्रं
चन्द्रः कलङ्कित इति प्रतिबुद्धिरेषा ॥ ११३ ॥

अस्यापि हन्त भविता व्यसनं दुरन्तं
वर्षासु मेघमलिनीकृतदिक्षु भद्रे ।
एतावदेव कथयन् युवतिद्वितीयः
स्वं मन्दिरं प्रति जगाम विलोक्य काष्ठाम् ॥ ११४ ॥

अवसरमभिवीक्ष्य पुष्पधन्वा
युवतिजनेषु शरं मुमोच विद्वान् ।
मधुरसवशगेषु [1]निर्दयात्मा
निजसमये विहितः फलाय योगः ॥ ११५ ॥

युवजनेऽपि तथाविधचेष्टिते
मनसिजो न्यधितास्त्रपदं पुनः ।
मृदुमनाः पुरुषस्तदपेक्षया
मृदुषु मार्दवमेव विधीयते ॥ ११६ ॥

यथा हुताशो ज्वलितुं व्यपेक्षते
काष्ठं तदन्यज्ज्वलनश्च साधनम् ।
तयोश्च योगो घटकव्यपेक्षण-
स्तथा युवादिर्घटकं व्यपेक्षते ॥ ११७ ॥

कश्चिद्युवा मकरकेतनशासनस्थ-
स्संप्राहिणोदसुसमानयनाय दूतीम् ।
तत्तद्विधेयकरणेषु पटिष्ठबुद्धिं
सामादिभिस्त्वमनुनीय समानयेति ॥ ११८ ॥

[1] अ. निर्भयात्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाले किमेव मनुषे किमु कार्यमस्ति
गन्तव्यमद्य[1] भवनं किमु वेत्सि भद्रे ।
जानाति हार्दमपि सन्तनुते त्वदीशो
जानासि तद्धृदयमालि विकत्थनं मा ॥ ११९ ॥

ज्ञानेन वा कृतमनेन न जानता वा
तद्यातु [2]नेर्ष्यमुपरीश्वरि पश्य वृत्तम् ।
सूक्ष्मापराधपरिहारविधिस्त्वशक्यः
केनापि तेन सुखमास्स्व पतिं जुषस्व ॥ १२० ॥

सत्यं वदामि सुभगे सकलाधिपत्यं
त्वय्यर्पयिष्यति यदुक्तमदो विधाता ।
त्वय्येव तस्य हृदयं न हि वेत्ति बाले
तत्त्वेन हार्दमपरत्र तु गौणमस्य ॥ १२१ ॥

वक्ष्यामि गोप्यमपरं तव सुभ्रु भर्ता
जायां करिष्यति युवा कमनीयरूपाम् ।
कार्यं न चातिमथनं क्वचिदप्यकाले
जानासि मूढहृदये पतिता [3]पयोधौ ॥ १२२ ॥

यद्युक्तमद्य न करिष्यति मूढभावा-
त्तन्मन्दिरं सुतनु नास्ति वदामि सत्यम् ।
गच्छामि गेहमभिवाञ्छसि चेत्प्रयाहि
नो चेन्मदुक्तमखिलं स्मरसि त्वमेव ॥ १२३ ॥

---

[1] अ. आर्य ।
[2] का. नेक्ष्य ।
[3] का. पदब्धौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवमादिवचनैरनुनीय दूती
तां नायिकां पतिसमीपमथानिनाय ।
काञ्चिद्युवा स्वदयितां प्रणतः पदाभ्यां
संताडितोऽपि चरणौ न मुमोच दीनः ॥ १२४ ॥

काचित्कृतागसमताडयदुत्तमाङ्गे
लीलागृहीतकमलेन निजाधुनाथम् ।
मत्तो गजेन्द्र इति कश्चन कांचिदुक्त्वा
काञ्चीगुणेन रुषिता भृशमाबबन्ध ॥ १२५ ॥

दूतीवचोभि[1] रुचितैर्मधुनोदितेन
संवर्धितो मकरकेतुरवाप्तशक्तिः ।
चक्रे मदेन च वशं युवतीस्सकान्ता-
स्सद्यो जहुः प्रणयकोपमशेषमेव ॥ १२६ ॥

अन्योन्यसन्दर्शितजातहृच्छया-
स्संभाषणादीनि मिथो वितेनिरे ।
विरोधवार्ता न च शुश्रुवे तदा
स्नेहातिरेकाद्रतिमापुरुत्तमाः ॥ १२७ ॥

सुरतसम्भ्रमतो गलितं न ताः
करगलादिगतं वरभूषणम् ।
अविदुरुद्धतमन्मथमोहिताः
किमिव कारयितुं मदनोऽनलम् ॥ १२८ ॥

---

[1] अ. रुदितैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदनमोहमहागहनाटवीं
गतवतो मदिरालसचेतसः ।
मदनचोरहृतं वसनादिकं
युवतिपान्थजनस्य सुदुर्नयैः ॥ १२९ ॥

तीव्रव्याधिनिरोधनाय भिषजां दृष्टयै विदेशभ्रमः
शिष्याणामुदयो रवेर्जलनिधिरसद्यादिना वर्णितः ।
वासन्तश्शुचिना समं वनजलक्रीडादि यस्मिंस्तुतं
सर्गोऽयं दशमोऽत्र शङ्करजये व्यासाचलीये गतः
॥ १३० ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
दशमस्सर्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ एकादशस्सर्गः ॥

आविर्बभूव परिलम्बिपयोधराढ्या
भेकात्मजस्वनितदूषितदिग्विदिक्चं ।
[1] श्रीकालिमाश्रितपटा परिलुप्तवर्त्मा
प्रावृड्वधूस्तदभिनन्दितसर्वलोका ॥ १ ॥

मेघा जगर्जुरुररीकृतभीमचापा
विद्युत्कृपाण[2]लसिता गगनादिमध्ये ।
उल्लासिनीलिमतनुश्रितसर्वगात्राः
शूरा इवोष्णरिपुमाशु निहन्तुकामाः ॥ २ ॥

यस्मिन्परं परहिताभिरतप्रकाशे
चन्द्रादिके श्रुतिपथं न गतैव वार्ता ।
तस्मिंस्तिरोहितवति प्रथितेऽत्र तेषां
खद्योतनाम भजतामभवत्प्रचारः ॥ ३ ॥

दृष्ट्वातिदुष्टसुसमृद्धविपक्षजातं
हंसा ययुः [3]स्थितिमनक्षरमानसीं ते ।
युक्तं हि दुष्टपरिवर्जनमुत्तमानां
मायात्तमःस्थमपि वस्तु तमोवदेव ॥ ४ ॥

चन्द्रादिके परहिताभिरते प्रयाते
खद्योतका विलसितुं परमारभन्त ।
धर्मानुयायिनि नृपे परलोकयाते
प्रत्यन्तवासनिरता इव मण्डलेशाः ॥ ५ ॥

[1] अ. कालिका सितपटा । [2] अ. लतिका ।
[3] का. सरसिकामथ मानसीं ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीमूतधर्मिगृहदत्तमुपाददाना-
स्ते चातकद्विजवरास्ततृपुर्नवाम्भः ।
एषा न तृप्तिरितरस्य जनस्य जातु
सच्छ्रोत्रियस्य कुनृपात्तधनस्य यद्वत् ॥ ६ ॥

आकर्णयंस्स्तनितमूर्ध्वमुखो घनानां
केकी ननर्त कुशली शिखिनीसमेतः ।
देव्याश्शिवः परिसरे प्रसृतोरुबाहु-
स्सङ्गीयमान इव नृत्यति मोदमानः ॥ ७ ॥

मेघोपरोधवशतो रविमाप दीप्ती
रात्रौ तथा हिमकरं नववारिसिक्ता ।
तावत्प्रकाशपदवीमुपयातवन्तौ
दृष्ट्वा शुचेव पृथिवी विससर्ज बाष्पम् ॥ ८ ॥

लोको विषण्णवदनो विरहातुरो यो
दृष्टेर्निपातमपि न क्षमते क्षपायाम् ।
व्याकोशकन्दलतया गगनेऽभ्रयोगा-
द्दिक्षु प्रणर्तितमयूरतया विशेषात् ॥ ९ ॥

भञ्जंस्तरुं बधिरयञ्जनमुच्चशब्दा-
त्कुर्वंस्तनून्विदलयन् शिशिरोऽतिमालम् ।
वायुर्ववौ द्रुतगतिर्न शशाक कश्चि-
च्छत्रं विधारयितुमुद्धतवायुवेगात् ॥ १० ॥

धन्यो जनो गृहगतो न चचाल भोगी
तस्माद्दृशा दहनमुज्वलमीक्षमाणः ।
तल्पेऽशयिष्ट वनितासहितस्सुखेन
किं नाम दुस्सहमनिष्टदमिष्टभाजाम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षासु वारितगतासु सुदुस्सहासु
शोचन्नशेत विरही विरहीव वित्तैः ।
पुण्यस्सुखी घटितवाञ्छितसाधनत्वा-
द्दुःखी च तद्विदितरोऽकृतपुण्यभावात् ॥ १२ ॥

धारां व्यमुञ्चत घनो [1] बहुमृण्मयीं तां
या दुर्दिनं व्यधित वारितसूर्यरश्मिः ।
सूर्यव्रतास्त्रिचतुराणि दिनान्युपोषु
र्नाज्ञायि यत्र च नदीवसुधाविभागः ॥ १३ ॥

नद्यस्तदा बहुजला बहुधाप्रवाहाः
क्षेत्राणि संविविशुरुत्तमसस्यभांजि ।
सस्यव्ययाद्विरुरुदुः कृषिकाः कृशाशाः
केचिच्छशंसुरपि शेपुरनल्पवृष्टिम् ॥ १४ ॥

गेहेष्वनावृतचरेषु जलावसेका-
त्कुड्यानि पेतुरतियत्नविनिर्मितानि ।
क्षेत्रावनाय विहिता दृढसेतवश्च
भिन्ना नदीपरिसरे बहुवित्तकार्याः ॥ १५ ॥

वापाय नीतमपि बीजचयं गृहाणि
निन्युर्जलाधिकृतया परिवाप्य भूमेः ।
शीताम्बुसिक्तवपुषो व्यसृजन्महोक्षान्
गन्तुं न शक्नुवत उच्छ्रितशृङ्गभाजः ॥ १६ ॥

श्रीगोकुलं वनभुवि प्रचरद्यथेष्टं
हित्वा वनं गृहमियाय विनम्य वक्त्रम् ।
वर्षानिलेन मृदितं क्षुभितं स्ववत्सैः
हुङ्कारगर्भवचनं व्यसृजत्कृशाङ्गम् ॥ १७ ॥

---

[1] का. बहुलामयां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धन्यो लुलयमाहिषीगण एत्य सम्यक्
संसेव्य वृष्टिमदिरां मुमुदे मदान्धम् ।
व्यस्मारि गेहमटता बहुशष्पकक्षं
तस्माद्वनान्तरमियाय निषेवमाणः ॥ १८ ॥

सन्मार्गवत्कलियुगे पथिभिः प्रणेशे
दुष्टैः खलैरिव तृणैर्विततैः सरिद्भिः ।
हंसेषु मानसगतेषु बकौघमाला
मोदं जगाम सुजनै राहितः खलो वा ॥ १९ ॥

[1] दीर्घाङ्घ्रिकप्रणयि कोलकवल्लरी सा
गर्भं दधार कुसुमं फलसूनुहेतुम् ।
या सूयते फलतनूजमविघ्नभावे
मासे सहस्यविदिते प्रथितात्मशक्तिः ॥ २० ॥

फुल्लारविन्दनयना विमलाम्बराढ्या
मेघावरोधनवरग्रहणाद्विमुक्ता ।
श्रीरामसूर्यपरिशोषितदुःखपङ्का
सीतेव सा शरादियं ददृशे मनुष्यैः ॥ २१ ॥

काशैः क्षितिर्धवलदीप्तिभिरुच्चकाशे
सच्चामरैरिव दशाकरिणी तथैव ।
मेघैर्विमुक्तममलं गगनञ्च शुभ्रै-
स्तारागणैरधरितोज्ज्वलमौक्ति[2]कौघैः ॥ २२ ॥

अम्भोभिरुज्झितमलैर्मुनिमानसानां
धिक्कारिभिर्नदनदीसरसीतटाकाः ।
संरंजिरे विकचवारिरुहैस्समन्तात्
सौरभ्यलुब्धबहुगायिमधुव्रतश्रीः ॥ २३ ॥

---

[1] क. दीर्घाङ्घ्रिप

[2] का. काभैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हंसद्विजा लघुमदाः शरदोपहूता
आजग्मुरुद्धतविलोकनवाञ्छयेव ।
श्रीमानसात्सकलकालसमृद्धिभाज-
स्संधूयमानसितपत्रपुटास्सुशीलाः ॥ २४ ॥

दिङ्मण्डली नगकुचा सरसीरुहाक्षी
वप्राधरा द्युवसना सिततारदन्ता ।
प्रोत्तुङ्गशाखिकरपाण्डरहारयष्टि-
स्संराजते बहुगुणा शरदा विभक्ता ॥ २५ ॥

कादम्बिनीयवनिकामपसारयन्ती
नानापदार्थनिकरं रविचन्द्रमोभ्याम् ।
आभासयत् गृहगता गृहिणीव तत्स्थं
नानापदार्थनिकरं करदीपिकाभ्याम् ॥ २६ ॥

अम्भांसि कुम्भजननो मुनिरात्मपादै-
स्संशोधयन्नुदयते स्म महानुभावः ।
स्रोतस्विनीषु पुलिनानि महान्ति हातुं
प्रक्रान्तवन्ति शनकैरुदकोज्झितानि ॥ २७ ॥

अम्भोधितीरनगरेषु निचिक्षिपुः स्वं
पोतेषु भाण्डमपरत्र च दुर्लभं यत् ।
सांयात्रिका बहुधना धनवृद्धिकामा
यैराप्यते शतगुणं धनमक्षयश्चेत् ॥ २८ ॥

उच्छ्रायिकूलतरवः पवनेन नुन्ना
पोता ययुर्निहितभाण्डचयास्समुद्रे ।
द्वीपान्तरं प्रति विचक्षणरक्षितव्याः
केचित्समाययुरमी परिपूरितार्थाः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्वा गजास्समवतेरुरमीभ्य उच्चै-
र्यत्नाद्विचक्षणजनैरवतार्यमाणाः ।
दीर्घोन्नताः क्षितितले बहुधाप्युपायैः
लोकस्समायदथ[1] लोकयितुं विनोदम् ॥ ३० ॥

केचिद्विलोक्य हरित[2]स्सहसा प्रसन्ना
हृत्वा नदीर्ययुरपूर्वमुपाददानाः ।
विक्रेतुमक्षतधियो वणिजो विदेशात्
क्रेतुं कुरङ्गमदपूर्वमपूर्ववस्तु ॥ ३१ ॥

आपूर्णशालिनिचया बहुमाषगर्भा
मुद्गान्तरा बहुविधाम्बरभारभाजः ।
गोण्यो बलोपहितभद्रमृगाधिपानां
आजग्मुरुच्छ्रितविषाणगचामराणाम् ॥ ३२ ॥

दीर्घद्विखण्डकलितां पृथु[3]पृष्ठलग्नां
पश्चाद्द्वयीं बलगतां दधतां निकायाः ।
कण्ठावलम्बिबहुनादिसुघण्डिकानां
सर्वाङ्गपाण्डरिमयोगविराजितानाम् ॥ ३३ ॥

आगत्य दूरवणिजो बहिरेव पुर्या
वासाय वेश्म वसनैर्व्यधुरत्युदारम् ।
आत्मीयगेह इव साधितसर्वसाध्या
अध्युष्य तद्विदधिरे क्रयविक्रयाद्यम् ॥ ३४ ॥

कश्चित्समानयदथात्मगृहं विदेशात्
कश्चिद्विदेशमनयद्गृहतोऽर्थमर्थी ।
कश्चिद्धनं विभजते स्म समानमन्यै
कश्चिद्धनी गणयति स्म गणेयमर्थम् ॥ ३५ ॥

[1] अ. दधलोकयितुं ।
[2] का. शरदि ।
[3] अ. पूर्वलग्ना पार्श्वद्वयी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्रंलिहानि नगरेषु धनाधिनाथाः
सौधानि सेव्यसुखदानि वधूसहायाः ।
अन्तर्गृहाद्द्रुतमुपारुरुहुस्समन्तात्
द्रष्टुं विभूतिमनघां शरदोपनीताम् ॥ ३६ ॥

राजापि दुर्गनिलयान् द्विषतो विजेतुं
कालं निरीक्ष्य समनीनयदात्मसेनाम् ।
दन्तीन्द्रसैन्धवपदातिरथोपपन्नां
ते दुर्गमात्मनिलयं दृढमाबबन्धुः ॥ ३७ ॥

पक्वानि पिङ्गलपिशानि नतानि भूमौ
सस्यानि तेषु पतति स्म शुकालिरुत्का ।
हर्तुं प्रसह्य कणिशं न शशाक गोपी
संरक्षितुं कथमलं [1]बलिनोऽबला सा ॥ ३८ ॥

पूर्वां दिशं गतवती यदि गोपिकेयं
ते पश्चिमां दिशमयन्ति पलायमानाः ।
सा पश्चिमां गतवती यदि पूर्वदिक्का-
मित्थं ततास शुकसङ्घनिकालनोत्का ॥ ३९ ॥

श्यामच्छदान्मृदुपदान्मृदुभाषमाणान्
चञ्चुप्रदिष्टकणिशान् चटुलायताक्षान् ।
तादृक्शुकीरनुगतान् पृथुशोणतुण्डान्
को वा निकालयितुमीश्वर ईदृशस्तान् ॥ ४० ॥

सस्यावने कृतनिरन्तरयत्नवत्यै
तस्यै चुकोप शुकभक्षितमुण्डशालीन् ।
दृष्ट्वाधिपो युगपदुद्धृतपक्वशालीन्
नैवाक्षमिष्ट लवितुं परवान्निकृष्टः ॥ ४१ ॥

[1] अ. चलिनो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्ट्वा भयानकमुखं पृथुवक्त्रघोणं
वेशन्तपङ्कपरिलिप्तसमस्तगात्रम् ।
घोरोच्चशब्दपरिभीषितलोकमुग्रं
भूदारयूथमविशन्निशि पक्वशालीन् ॥ ४२ ॥

कैदार्यमाद च जगर्ज च भीमनादं
पादाभिघातपरिचूर्णितमञ्जरीकम् ।
नाबुद्ध गोपकुलमुग्र[1] महान्धकारे
निद्राभिभूतमुदयावधि घर्मरश्मेः ॥ ४३ ॥

उत्थाय गोपककुलं परिनिष्टसस्यं
तुन्दं जघान च विलोक्य विहाय पत्युः ।
तच्चापरत्र दिवसे न चकार निद्रां
[2]ऊत्कालयन्किल कुलं परिवात्प्रजाहः ? ॥ ४४ ॥

दीपालिकोत्सवमभूत्प्रथितं नगर्यां
सर्वं तदर्थमुपयुङ्क्त च मोदमानः ।
जग्राह नूत्नवसनं मलिनं न्यधावी-
दामुञ्चताभरणबृन्दमनल्पशोभम् ॥ ४५ ॥

रथ्यापङ्गणाणगृहाणि ममार्ज यत्नात्
तोयैरसिक्त परिमण्डयति स्म भक्त्या ।
द्वारेषु पूर्णकलशानपि पूगवृक्षान्
पुञ्जैर्युतान् कदलिकास्तफला न्यधाच्च ॥ ४६ ॥

सेवानुरूपमददाद्वसनार्थजातं
भृत्यादिकाय धनिकः स्वयमप्यवस्त ।
वस्त्रं नवं बहुधनं परिमण्डिताङ्गः
कर्पूरचन्दनरसादिकृताङ्गरागः ॥ ४७ ॥

---

[1] अ. तरे। [2] अ. मुक्त्वाऽऽलपत्करिकुलं परियाद जागः ?) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचिज्जहुर्नवनिषेवणमात्तवित्ता
    अन्ये महीपतिमुपासिषतोक्तवीर्याः ।
जग्मुर्विदेशमपरे नृपसेवनाय
    केचिद्भटास्तत उपाययुरन्यहेतोः ॥ ४८ ॥

तस्मिन्महे महति भूषितसर्वगात्राः
    कस्तूरिकामलयजादिकृताङ्गरागाः ।
राजा तदीयललनाः पुरुषा निशाम्भो
    नालीमुखेन सिसिचुर्भृशमाननादौ ॥ ४९ ॥

राज्ञी नृपं नृपतिरात्मवधूममात्यान्
    ते चैनमेवमपरे सिषिचू रसार्द्राः ।
आर्द्राङ्गवस्त्रचिकुरा विहिताट्टहासा
    रेसंरेजिरे प्रथमका इव धातुरक्ताः ॥ ५० ॥

राज्ञां विजेतुमनसां प्रथमोऽभ्युपायो
    भोगास्पदं विभविनां धुतपङ्कदोषा ।
आपक्वसस्यविभवा विशदांबुहृद्या
    दीपालिका विजयते गुणपूररम्या ॥ ५१ ॥

श्रुत्वेति सर्वगुणयुक्तशतां मृगाक्षीं
    हेमन्तनाम ऋतुराज उपाजगाम ।
उद्वोढु ाम इव लालितधर्मरश्मिः
    सर्वो गुणी गुणिगतिः प्रथितो हि लोके ॥ ५२ ॥

उत्पादयन्पनसचूतमुखाङ्घ्रिपाणा
    गर्भं ववौ सहसितश्वसनस्सुतीव्रम् ।
यस्माद्भवन्ति पनसेषु शिवाकृतीनि
    सूक्ष्माणि बृन्दसहितानि फलानि सद्यः ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमीरनूपनिलया उदयुञ्जतादौ
क्रष्टुं कृषीवलजनास्सहसा सहासाः ।
पान्थाः प्रमन्दहसितास्सहसा बभूवु-
र्वातेन चापि सहसाऽभिगतेन विद्धाः ॥ ५४ ॥

शोकास्पदं सकमलं कमलं व्यनाङ्क्षीत्
हेमन्तकालखलसङ्गतिदूषितं तत् ।
शोच्यास्तदा सरसिजैर्विरहात्सरस्यो
जाताः परं कुलवधूरिव निस्तनूजा ॥ ५५ ॥

मध्येऽपि वासरपतिर्दिवसस्य तीक्ष्णो
मन्दो बभूव शिशिराम्बुकणाभिवर्षी ।
शीतोऽप्यशीतवपुरुष्णमनुष्णमास्त
किं नाम कर्तुमनलं बत काल एषः ॥ ५६ ॥

नखंपचोत्तुङ्गपयोधराढ्य-
प्रियोपगूढास्सहसा युवानः ।
ताम्बूलवल्लीदलपूगखण्ड-
कर्पूरसंपूरितवक्त्रपद्माः ॥ ५७ ॥

सुदुस्सहं [1]शीतमनन्यभार्यं
[2]प्रसेविरे सेवितकोष्णभक्ताः ।
निदानविद्वैद्यवरोपदिष्ट-
योगेन रुग्णा इव रोगमुग्रम् ॥ ५८ ॥

निवातगेहं सुदृढोरुभित्ति
[3]बद्धादरं कोष्णनिषेव्यमाणम् ।
सतूलकं तल्पमनल्पशीतिलं
संसेव्यमानश्शिथिलीचकार ॥ ५९ ॥

---

[1] अ. अनन्यहार्य । [2] अ. प्रसेहिरे ।
[3] अ. बद्धारं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निःस्वस्सुजीर्णवसनस्सदनेऽ[1] स्सुजीर्णे
शीतोत्तरेऽग्निरहिते गतनिद्र आस्त ।
काष्ठोज्झिते दलितजीर्णकवाटचेले
सङ्कोचयन् करपदानि विसारयंश्च ॥ ६० ॥

आनम्रपक्वफलपुञ्जककृष्णवल्ल्य-
श्शीताद्भियेव ललनावदचेतयन्त्यः ।
आमूलमाग्रपरिरम्भणलब्धसौख्या-
स्सेवन्त औषरवनेषु तरूनुपघ्नान् ॥ ६१ ॥

आलिङ्गिताः कृष्णलताभिरुच्छ्रिता
गुञ्जा नताभिर्बहुभारसंश्रयाः ।
शिरोभिरीड्यां जननीं वसुन्धरां
नूनं प्रणन्तुं विनमन्ति शाखिनः ॥ ६२ ॥

भानुर्दिवा कठिनकोष्ठभवः कृशानु-
स्सन्ध्याद्वये तुहिनरोगनिपीडितस्य ।
जानुद्वयं निशि मुखेन निचुम्ब्यमानं
भैषज्यमुक्तमति[2] दुर्विधपूरुषस्य ॥ ६३ ॥

शेतेऽसकृत्तुहिनपीडित उत्थितश्च
वैश्वानरं निशि विकीर्य निषेवमाणः ।
रात्रेः कियत्वमिति पृच्छति दुर्विधेयं
शेते विषण्णवदनो गतनिद्र एव ॥ ६४ ॥

हेमन्तपीडितमुदीक्ष्य जनं समन्ता-
दभ्यागतश्शिशिरकाल उपात्तदेहः ।
[3]घर्मावसान उपरोधकपूर्वभाग-
स्सर्वो निपीडितनिपीडनकाम एव ॥ ६५ ॥

---

[1] अ. सुजीर्णे ।   [2] अ. दुःखित ।
[3] अ. शर्मावसान ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1] संसेचिरे कोलकवल्लरीं[2] तां
फलानि कृष्णान्यपि शोणभावम् ।
प्रपेदिरे तानि च पक्षिसङ्घो
जघास दृष्ट्वाधिपतिश्शुशोच ॥ ६६ ॥

आरभ्यमाणाः पुरुषैर्महीरुहो
मृदुस्वभावाश्शिरसा महीतलम् ।
नमन्ति भग्नं न च यन्ति सज्जना
यथा मनाक् कृष्णलतासमाश्रयाः ॥ ६७ ॥

पक्वानि कृष्णानि समं प्रसुस्रुवु-
स्समं विपाकाल्लविता न लभ्यते ।
अलावयन् शीघ्रमनल्पसेवका
लुनन्ति केचित्स्वयमेव लोभिनः ॥ ६८ ॥

कठोरभावात्पुरुषाधिरूढाः
पतन्ति भग्ना अपि पातयन्ति ।
महीरुहा दुर्जनवत्पुमांसं
कृष्णाचिता नम्रलतोपगूढाः ॥ ६९ ॥

अशूशुष[3] न्नूक्षणमुन्नतस्थले
बह्वातपे त्रीणि दिनानि सत्खले ।
न्यधुः कुसूले मरिचं गृहान्तरे
विक्रेतुकामा धनिनो धनार्थिनः ॥ ७० ॥

विचिक्रियुः केचन शोषयित्वा
प्रयाति मूल्येऽल्पधनाधमर्णाः ।
शीतार्दितानामभवद्धिताय
श्रीकृष्णगेहो बहुलोष्णदायी ॥ ७१ ॥

---

[1] अ. संपेचिरे । [2] अ. वल्लरीणां ।
[3] अ. न्नूषण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धालवस्तपसि शीतमनीक्षमाणाः
सस्नुर्नदीश्वयसि पुण्यमवाप्तकामाः ।
शारीरलोमनिकरे परि [1] दृश्यमाने
पूर्वाचले तपनमण्डलमण्डिताङ्गे ॥ ७२ ॥

सहस्ररश्मावुदितेऽपि केचि-
न्न [2] चात्यजन् शीतभयेन शय्याम् ।
पुराभवे सञ्चितपुण्यलेशा
निचोलिनो भोग्यवधूपगूढाः ॥ ७३ ॥

[3] कुल्योपकूलागतवारिपीतै-
र्निराकृताशेषतृणान्तरालैः ।
योधैरिवाङ्गीकृतपंक्तिभावैः
पूगै रराजोपवनं तपस्ये ॥ ७४ ॥

सद्बालवालोदरनिर्गतासित-
च्छदालिताम्बूललताभिवेष्टितैः ।
ली [4] लापचायारलघुभिस्समोन्नतै-
स्सबालकैः श्यामलदीर्घपत्रकैः ॥ ७५ ॥

आमूलकाग्रफलितैः पनसैरुपेतं
सीमाधिरोपितसदाफलनालिकेरम् ।
रम्भाभि [5] रुत्तमफलानतपुञ्जभाग्भिः
विस्तीर्णपत्रनिचयाभिरनिन्दिताभिः ॥ ७६ ॥

सोपानसंस्थं बहुदन्त [6] शारं
सदा प्रवाहो [7] द्वदसत्तटाकम् ।
क्वचित्समानीतनदीकबन्धं
क्वचित्सुयन्त्रोद्धृतवारिपुष्टम् ॥ ७७ ॥

---

[1] अ. दृष्यमाणे ।
[2] अ. तत्यजुः ।
[3] अ. कुल्योपकुल्यागतवारिपीतैः ।
[4] अ. फलावचायात् ।
[5] अ. उन्नत ।
[6] अ. शाढं ।
[7] अ. ऊर्ध्वग ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं क्रमादार्तवमीक्षमाण-
रसोऽन्वेषमाणो यतिनां निकायः ।
समानयद्देशिकवर्यपार्श्वं
भिषग्वरान् शास्त्रचणान् प्रवीणान् ॥ ७८ ॥

मुनिवरस्समुपाचरदागतान्
गृहिवरैर्धनधान्य [1] पुराणकैः ।
मुमुदिरे कृतसत्करणादमी
गदनिदानविदो भिषजां वराः ॥ ७९ ॥

बहुदिनैर्बहुदेशसमागतान्
सबहुमानमिदं मुनिरब्रवीत् ।
कुशलता भवतामपि वर्तते
गृहकलत्रसुतादिषु संप्रति ॥ ८० ॥

विशदवारि मृदूलपसंयुतं
भवति काननमन्तिकभूगतम् ।
अपि पशव्यमपोढदवानलं
सरसपल्लव [2] वल्गुलतावृतम् ॥ ८१ ॥

सुखदवं वनगोगणमक्षयं
किमु तरक्षुगणश्च न बाधते ।
अभिमतं बहुबाधमुदीक्ष्यते
न हि विनष्टिरनीहित [3] वस्तुनि ॥ ८२ ॥

हरिहयोऽभिमते समयेऽधुना
नदह्रदे वसुधामपि वर्षति ।
अपि फलन्ति नगा उपजीव्यता-
मुपगता बहुतापभृतोऽनिशम् ॥ ८३ ॥

---

[1] अ. वरांशुकैः । [2] अ. गुल्म ।
[3] अ. प्सित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि मनो भवतां नृपसेविनां
तदनुसारि दिवानिशमज्वरम् ।
दहनवन्नृपातिं परिषेवितुं
शिथिलबुद्धिभिरङ्ग न शक्यते ॥ ८४ ॥

[1]अपि भवद्विषये न भयं क्वचि-
द्विषमदुर्गमदुर्गसमाश्रयात् ।
खलपतेः कुलभूपम[2]नीषितुः
परधनेन हृतेन सदाश्नतः ॥ ८५ ॥

नरपतेरपि शासनमार्दवा-
ज्जनपदो न च वो बहुतस्करः ।
कथितशास्त्रविदो वहु मन्वते
नृपतयो गुणदोषविचक्षणाः ॥ ८६ ॥

सततमार्थितमेव हि भेषजं
तदपि सञ्चितमस्ति भवद्गृहे ।
न हि विदन्ति जनाः परसङ्कटं
स्वहितमर्थयितुं प्रभवो हि ते ॥ ८७ ॥

अतिथिरत्तुमना गृहमागतो
हतमनाः क्रियते हि न गेहिभिः ।
स हि [3]समीक्षत एव भवादृशै-
स्त्रिदशलोकगतौ दृढसंक्रमः ॥ ८८ ॥

अपि मखः क्रियते बहुदक्षिणो
द्विजवरैर्बहुयाजकसाधकः ।
[4]बहुफलो बहुभक्तसुतृप्तिदो
बहुदिनश्रुतिघोषसमन्वितः ॥ ८९ ॥

---

[1] अ. अयि । [2] अ. अनीक्षितुः ।
[3] अ. समीरित । [4] का. शुभफलः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नदनदीगिरिदेशविलंघना-
त्समभवद्भवतां पथिजः श्रमः ।
दिनकरस्य करै[1]रपि तापदैः
परहिताभिरतस्य न दुःखधीः ॥ ९० ॥

इति निशम्य वचो मुनिनोदितं
निजगदे गदहारिजनैस्ततः ।
भवदनु[2]ग्रहणात्कुशलं च नो
गृहकलत्रसुतादिषु सन्ततम् ॥ ९१ ॥

कुशलमेव समस्ति न सङ्कटं
न हि रवौ तिमिरं लभते स्थितिम् ।
अगमदध्वजभूरिपरिश्रम-
स्तव मुखाब्जविलोकनतोऽधुना ॥ ९२ ॥

यदिह नः करणीयमुदीर्यतां
वितनुमो मुनिवर्य यथाबलम् ।
उपगुदं भिषजः परिबाधते
गद उदेत्य तनुं तनुमध्यगः ॥ ९३ ॥

यदिदमस्य विधेयमिदं ध्रुवं
गदत रोगतमस्तिमिरारयः ।
चिरमुपेक्षितवानहमेतकं
दुरितजोऽयमिति प्रतिभाति मे ॥ ९४ ॥

तदपि शिष्यगणैर्नि[3]रहिंस्यहं
प्रहितवान्भवदानयनाय तान् ।
निगदिते मुनिनेति भिषग्वरा
विदधिरे बहुधा गदसत्क्रियाः ॥ ९५ ॥

---

[1] अ. अति । [2] अ. स्मरणात् ।
[3] का. निरबन्ध्यहं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च शशाम गदो बहुतापदो
विमनसः पठवो भिषजोऽभवन् ।
जनपदानतिलङ्घ्य समागता
वयमितो न कृतं हितमस्य हा ॥ ९६ ॥

न दहनं विरहय्य मुने गदं
शमयितुं प्रभवन्ति भिष[1]ग्जनाः ।
अनुचिता यतिनां दहनक्रिये-
[2]त्यपथभीति मनो वदितुं च नः ॥ ९७ ॥

अठत गेहमगात्समयो बहु-
र्गदहृतां भवतामितरं युषाम् ।
दिनचयं गणयन्पथिलोचनः
प्रियजनो निवसेद्विरहातुरः ॥ ९८ ॥

नरपतिर्भवतां शरणं ध्रुवं
स च विदेशगमं श्रुतवान्यदि ।
रुषितवान् न च वो वितरेन्नृपो
भणितजीवितमक्षतशासनः ॥ ९९ ॥

तुरगवन्नृपतिश्चलमानसो
भिषजमन्यमसौ विदधीत वा ।
नरपतेर्हृदयाम्बुजतोषणं
न सुकरं सुधियापि [3]निशेशवत ॥ १०० ॥

जनपदो विरलो गदहारकै-
र्बहुलरुग्णजनः प्रकृतेरतः ।
मृगयते भवतो भवतां गृहे
[4]गदिजनस्सहितुं गदमक्षमः ॥ १०१ ॥

---

[1] का. भिषग्वराः । [2] का. अपि सभीति ।
[3] अ. विशेषवत् । [4] अ. गृहिजनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृकृता जनिरस्य शरीरिण-
स्समवनं गदहारिषु तिष्ठति ।
जनितमप्यफलं भिषजं विना
भिषगसौ हरिरिव तनूभृतः ॥ १०२ ॥

यदुदितं भवता वितथं न तत्
तदपि न क्षमते व्रजितुं मनः ।
सुरभुवं प्रविहाय मनुष्यकं
व्रजितुमिच्छति कोऽत्र नरस्सुधीः ॥ १०३ ॥

इति निगद्य गते भिषजां गणे
विमनसि प्रथिते गदपीडितः ।
हृदयगौ विदधे मुनिरश्विनौ
हरिहयस्य गृहे गदहारिणौ ॥ १०४ ॥

दिविषदां भिषजौ मम भेषजं
कुरुतमद्य [1]नमः कृपयास्तु वाम् ।
मनुजलोकगता भिषजो जहु-
र्गदमुदीक्ष्य खरं भृशमक्ष[2]मम् ॥ १०५ ॥

सुराभिषग्युगलं बुबुधेऽथ त
त्तदकरोच्च परस्परम[3]न्त्रणम् ।
मनुजरोग[4]चिकित्सनमावयो-
रनुचितं विपरीत[5]मथो भवेत् ।' १०६ ॥

अथ विचारयितुं ययतुस्सभां
हरिहयस्य पटू गुरुसङ्ग[6]ताम् ।
अमृतबिन्दुकणादुदियाय या
ददतुरेवमभीतिमभीप्सिताम् ॥ १०७ ॥

---

[1] अ. मनः ।
[2] अ. अक्षमाः ।
[3] अ. मन्त्रणाम् ।
[4] अ. लोकचिकित्सितं ।
[5] क. मितो ।
[6] अ. संमितां ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जिगदिषू इव वामुपलक्षये
गदतमस्ति यदीप्सितमश्विनौ ।
असमये सदनात्समितिं गतौ
तदिह कारणमस्ति न संशयः ॥ १०८ ॥

हरिहयाह्वयति स्म चिकित्सितुं
यतिवरः क्षितिलोकगतोऽपि नौ ।
इति निवेदयितुं कृत आगमो
यदिह कार्यमुदाहरतां भवान् ॥ १०९ ॥

इदमपूर्वमुपस्थितमद्य नौ
सुरगणेषु चिकित्सितमावयोः ।
प्रार्थितमेव हरे भुवनत्रये
तदपि हूतिरियं मनुजेन नौ ॥ ११० ॥

हरिहयेङ्गितविद्गुरुरुत्तरं
प्रतिजगाद पटुर्भिषजौ हसन् ।
न मनुजश्शिव एव समाह्वयत्
गद[1]नुदौ गदितः क्षितिगो युवाम् ॥ १११ ॥

द्विजवरस्सहितो निजभार्यया
शिवमतूतुषदुग्रतपश्चरन् ।
सुतमभीप्सुरनल्पगुणोदयं
शिवसमं शिव एव सुतोऽजनि ॥ ११२ ॥

स ववृधे मनुजत्वमुपागतो
द्विजगृहे द्विजमोदमुपावहन् ।
प्रथमहायन एव समग्रहीत्
सकलवर्णमसौ निजभाषिकाम् ॥ ११३ ॥

[1]अ. हतौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विसम एव शिशुर्लिखिताक्षरं
गदितुमक्षमताक्षरवित्सुधीः ।
अथ स काव्यपुराणमुपाश्रृणोत्
स्वयमवेक्षिमपि श्रवणं विना ॥ ११४ ॥

अजनि दुःखकरो न गुरोरसौ
श्रवणतस्सकृदेव समग्रहीत् ।
सहनिपाठिजनस्य गुरुः स्वयं
स च पपाठ ततो गुरुणा विना ॥ ११५ ॥

त्रिसम एव शिशोर्जनको जर-
न्नमृत कर्मवशास्सुतमोदितः ।
उपनिनीषत सूनुमपि स्वयं
न हि यमोऽत्र कृताकृतमीक्षते ॥ ११६ ॥

इह भवेत्सुलभं सुसुतेक्षणं
न सुलभं सुतरां विभवेक्षणम् ।
सुतमवाप कथञ्चिदयं द्विजो
न खलु वीक्षितुमैष्ट सुतोदयम् ॥ ११७ ॥

मृतमदीदहदात्मसनाभिभिः
पितरमस्य शिशोर्जननी ततः ।
समनुनीतवती [1]युवतीडितां
स्वजनतामृतिशोकहरैः पदैः ॥ ११८ ॥

कृतवती [2]मृतिचोदितमक्षमा
निजजनैरविकारितवत्यसौ ।
उपनिनीषुरभूत्सुतमात्मनः
परिसमाप्य च वत्सरदीक्षणम् ॥ ११९ ॥

[1] अ. धवखण्डितां । [2] अ. मृत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनयं किल पञ्चमवत्सरे
प्रचुरयोगयुते सुमुहूर्तके ।
द्विजवधू[1] र्नियता जननी शिशो-
र्व्यधित तुष्टमनास्सह बन्धुभिः ॥ १२० ॥

अधिजगे निगमांश्चतुरोऽपि स
क्रमत एव गुरोस्स षडङ्गकान् ।
अजनि विस्मितमत्र महामतौ
द्विजसुतेऽल्पतनौ जनताहृदि ॥ १२१ ॥

सहानिपाठयुता वटवस्समं
पठितुमैशत न द्विजसूनुना ।
अपि गुरुर्विशयं प्रतिपेदिवान्
क इव पाठयितुं सहसा क्षमः ॥ १२२ ॥

मृदुवचश्चरितं कुशला मति-
र्वपुरनुत्तममास्पदमोजसाम् ।
सकलमेतदुदीक्ष्य सुतस्य सा
सुखमवाप निरर्गलमम्बिका ॥ १२३ ॥

परिचरञ्जननीं निगमं पठन्
अपि हुताशरवी सवनद्वयम् ।
मनुवरैर्नियतं परिपूजयन्
शिशुरवर्तत संस्तरणो यथा ॥ १२४ ॥

शिशुमुदीक्ष्य युवापि [2] विमन्युमान्
दिशति वृद्धतमोऽपि निजासनम् ।
अपि करोति जनः करयोर्युगं
वशगतो विहिताञ्जलि तत्क्षणात् ॥ १२५ ॥

[1] अ. वधूर्नियता ।
[2] अ. न ; का. नमत्यमुं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स विरजन्भववर्त्मनि सर्ववित्
व्यधित संन्य[1]सने किल मानसम् ।
पतति कूपतले बहुकण्टके
न हि विलोचनवान् सहजान्धवत् ॥ १२६ ॥

मम न मानसमिच्छति संसृतिं
न च पुनर्जननीं विजहासति ।
न च गुरुर्जननी न उदीक्षते
तदनुशासनमीषदपेक्षितम् ॥ १२७ ॥

इति विचिन्त्य स जातु मिमङ्क्षया
बहुजलां सरितं समुपाययौ ।
जलमगाहत तत्र समग्रहीत्
जलचरश्चरणे जलमीयुषम् ॥ १२८ ॥

स च रुरोद जले जलचारिणा
धृतपदो हरतेऽम्ब करोमि किम् ।
चलितुमेकपदं न च पारये
बलवता विधृतो[2]ऽत्र मुखेन हा ॥ १२९ ॥

गृहगता जननी तदुपाश्रृणोत्
परवशा द्रुतमाप सरित्तटम् ।
अमृत मे प्रथमं शरणं धव-
स्तदनु मे शरणं तनयो भवान् ॥ १३० ॥

स च मरिष्यति नक्रवशं गत-
श्शिव न मेऽजनि हन्त पुरा मृतिः ।
इति शुशोच जनन्यपि तीरगा
जलगाततमजवक्त्रगतेक्षणा ॥ १३१ ॥

---

[1] अ. संन्यसितुं । [2] अ. विधृतोरुमुखेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यजति नूनमसौ चरणं चलो
जलचरोऽम्ब तवानुमतेन मे ।
सकलसंन्यसने परिकल्पिते
यदि तवानुमतिं परिकल्पये ॥ १३२ ॥

इति शिशौ [1]चकिते वदति स्फुटं
व्यधित सानुमतिं द्रुतमम्बिका ।
सति सुते भविता मम दर्शनं
मृतवतस्तदु नेति विनिश्चयात् ॥ १३३ ॥

तदनु संन्यसनं मनसा व्यधात्
अथ मुमोच शिशुं [2]खलनक्रकः ।
उपययौ स नदीतटमत्रसन्
प्रणतवान्प्रहसन् जननीमपि ॥ १३४ ॥

तदनुशासनवान् प्रययौ गृहं
न्यधित संन्यसनं मुदितश्शिशुः ।
विदितशास्त्रम[3]वाप्य दयाम्बुधिं
गुरुमनुत्तममुत्तमसेवितम् ॥ १३५ ॥

प्रभुरपि स्वशरीरगमर्दितुं
गदमयं प्रथयन्नरधर्मताम् ।
यतितनुश्शिव आह्वयते स वां
गदहृतावयतं गतसंशयौ ॥ १३६ ॥

अटिटिषू क्षितलोकमितो युवां
द्विजवरौ भवतं भिषजौ नरौ ।
बलिविधिर्भजनीयसुरानुगो
भवति हीति वदन्ति जना अपि ॥ १३७ ॥

---

[1] अ. चकिता ।
[2] अ. जल ।
[3] अ. अवाप ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति निगद्य वचस्सुरदेशिके
स्थितवति प्रथितौजसि चाश्विनौ ।
गृहमुपेत्य यथोदितभेषजं
जगृहतुर्दधतुर्गतये मनः ॥ १३८ ॥

द्विजतनुं प्रविधाय भिषग्वरौ
मनुजलोकमुपेयतुराश्विनौ ।
धवलसूत्रधरौ विमलाम्बरौ
करसरोरुहमूलकपुस्तकौ ॥ १३९ ॥

मलयजेन कृतायतपुण्ड्रकौ
स्मितविकासिमुखेन्दुविराजितौ ।
चटुलसाञ्ज[2]नपङ्कजलोचनौ
मृदुसुदीर्घकराम्बुजशोभिनौ ॥ १४० ॥

उपगतौ भिषजौ द्युसदां पतिं
यतिमलोकयतां गदपीडितम् ।
मुनिवरोऽप्यवलोक्य तुतोष तौ
नयनमानसहारिवपुर्धरौ ॥ १४१ ॥

द्विजवरौ किमिदं भुजमूलके
कुत उपागमनं सुमुखौ युवाम् ।
किमिह कृत्यमितः क्व गमिष्यथो
निवसनं क्षणमत्र सुखाय मे ॥ १४२ ॥

लिखितमेतदनल्पचिकित्सितं
यतिवरेह सुखाय विदूरगौ ।
जिगमिषू स्वयमेव पदं शनै-
र्यदि सुखं वसनेन वसाव ते ॥ १४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि युवां भिषजौ वयमर्थिनो
गुरुरयं [1]गदितो बहुवित्तमः ।
कुरुतमस्य चिकित्सितमीप्सितं
[2]विधिनुतं भवतोरिह दर्शनम् ॥ १४४ ॥

भुवि दिनानि बहूनि भिषग्वरा
न मृगयामहि ते च कृताक्रियाः ।
गदमसाध्यमुदीर्य ययुर्गृहं
मृगयितव्यमतो[3] भवतोर्युगम् ॥ १४५ ॥

विधिकृतागमनौ सहसा युवां
गुरुरयं विगतज्वर [4]ईप्सितः ।
इति बुधौ हृदये प्रतिभाति नो
हृदयमेव हि मानमभीप्सिते ॥ १४६ ॥

इति समीपगशिष्यगणोदिता-
ववदतां भिषजौ यतिसत्तमम् ।
रहसि येयमितो भवता यते
वितनवाव यथाबलमौषधम् ॥ १४७ ॥

दृढसुधामयदोर्युगलेन तौ
गदमुदीक्ष्य समस्पृशतां शनैः ।
द्विजवरौ भिषजौ मुनिसत्तमं
तत उपाजनि शं सह निद्रया । १४८ ॥

निजकरे मथितोत्थितवह्निके
ज्वलनवज्ज्वलितामभितापिताम् ।
बहुविधौषधभाजन [5]मूर्तिकां
निजकराङ्गु[6]लिकारुधिरस्रुतिम् ॥ १४९ ॥

---

[1] अ. गदिको ।
[2] अ. कृतं ।
[3] अ. मिदं ।
[4] अ. ईडितः ।
[5] का. मृत्तिकां ।
[6] का. लिकां ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखमताडयतां गदमस्तके
द्विजवरौ भिषजौ द्युसदामथ ।
समुदमीलयदाक्षियुगं मुनि-
र्न च पुरो ददृशे द्विजयोर्युगम् ॥ १५० ॥

समभवन्मुनिरेव निरामय-
स्स्वभवनं ययतुस्सुखमश्विनौ ।
द्विजवरौ बुबुधे मुनिरश्विनौ
[1] अचकथन्निजशिष्यगणाय तत् ॥ १५१ ॥

मुमुदिरे यतयो गुरुमात्मनो
गतगदं परिदृश्य सुखोषितम् ।
स्वगुरुणा सुखदुःखसमो जनो
भवति निर्वृतये हि निरीतये ॥ १५२ ॥

प्रावृड् यत्र समं शरद्वनितया पूश्शारदी वर्णिता
हेमन्तश्शिशिरेण देशिकवरप्राप्तिर्महीवर्तिनाम् ।
नानाव्याधिहतां निवृत्तिरमुना ह्यार्तिश्च नासत्ययो-
र्यातश्शङ्करदेशिकेन्द्रविजये सर्गोऽयमेकादशः ॥ १५३ ॥

॥ इति श्रीशङ्करविजये व्यासाचलीये
एकादशस्सर्गः ॥

---

[1] का. अकथयन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ द्वादशस्सर्गः ॥

श्रीगोकर्णं यातुकामः कदाचि-
च्छ्रीवल्याख्यं ग्रामवर्यं जगाम ।
शिष्टैर्जुष्टं वेदविद्भिर्महद्भिः
श्रीमान्पूज्यो देशिकेन्द्रोऽस्मदीयः ॥ १ ॥

यतोऽपमृत्युर्बहिरेव याति
भ्रान्त्या [1]प्रवेशं शनकैरलब्ध्वा ।
दृष्ट्वा द्विजातीन्निजकर्मनिष्ठान्
दूरान्निषेध्यान् यजतोऽप्रमत्तान् । २ ॥

यस्मिन्सहस्रत्रितयं द्विजानां
अग्न्याहितानां श्रुतिपाठकानाम् ।
वसत्यजस्रं श्रुतिचोदितासु
क्रियासु दक्षं प्रथितानुभावम् ॥ ३ ॥

मध्ये वसन्यस्य करोति भूषां
पिनाकपाणिर्गिरिजासहायः ।
हारस्य यष्टेस्तरलो यथाऽभूत्
रात्रेरिवेन्दुर्गगनाधिरूढः ॥ ४ ॥

अधीयमानेषु सलक्षणं द्विजै-
र्वेदेषु पुण्येषु पदक्रमादिभिः ।
समं विमानाधिगतश्चतुर्मुखः
शृणोति यत्रावहितास्तिरोहितः ॥ ५ ॥

---

[1] का. प्रवेकं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्याप ान्वेदचणान्निशम्य
ग्रामान्तराद्वर्णिन एत्य यत्र ।
अधीयते वदमनल्पयत्ना
स्संभिक्षमाणा भवनेषु भिक्षाम् ॥ ६ ॥

चन्द्रा[1] तपान्भर्तुमलं न यत्र
दिवातपे वृक्षगणैरुपेते ।
स्निग्धप्रवालायितसर्वशाखैः
फलप्रसू[2] नोपनतैर्जनोऽयम् ॥ ७ ॥

आसाद्य यं पान्थजनाः परिश्रमं
जहत्यनल्पं विमलोदकाशयम् ।
सुगन्धिमन्दामृनवाहिना मुहु-
र्निषवितं गन्धवहेन सर्वदा ॥ ८ ॥

यत्राग्निहोत्राहुतिगन्धलोभात्
तरास्विनो मन्दगमा भवन्ति ।
एतन्निषेवोऽखिलपापहारी-
त्येवं जना केचन तज्जुषन्ते ॥ ९ ॥

तत्र द्विज श्रुतियुत श्रुतिवाकचवादी
श्रौतादिकर्मनिरतो निजदारतुष्टः ।
सन्तर्पयन्नतिथिपूगमनल्पचेता
आस्ते दयालुहृदयो मृदुवाक् सुशीलः ॥ १० ॥

गावो हिरण्यं धरणी समग्रा
सद्बान्धवा ज्ञातिजनाश्च तस्य ।
सन्त्येव किं तैर्न हि तोष एभिः
पुत्रो यदस्याजनि मुग्धचेष्टः । ११ ॥

---

[1] अ. चन्द्रातपा मेत्तुं ; का. चन्द्रातपोच्छेद । [2] अ. नावनतैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न वक्ति किञ्चिन्न शृणोति किञ्चित्
ध्यायन्निवास्ते किल मन्दचेष्टः ।
रूपेण मारो महसा विवस्वान्
मुखेन चन्द्रः क्षमया महीसमः ॥ १२ ॥

ग्रहग्रहात्किं जडवद्विचेष्टते
किं वा स्वभाव.दुत पूर्वकर्मणः ।
सञ्चिन्तयंस्तिष्ठति तत्पितानिशं
[1]समाधिमान् प्रष्टुमना वहुश्रुतान् ॥ १३ ॥

शिष्यैः प्रशिष्यैर्वहु[2]पुण्यभारै-
स्समागतं कश्चन पूज्यपादम् ।
शुश्राव तं ग्राममनिन्दितात्मा
निनाय सूनुं निकटं स तस्य ॥ १४ ॥

न शून्यहस्तो नृपमिष्टदेवं
गुरुञ्च यायादिति शास्त्रवित्स्वयम् ।
सोपायनः प्राप गुरुं व्यशिश्रणत्
फलं ननामास्य च पादपङ्कजे ॥ १५ ॥

अनी[3]नमत्तञ्च तदीयपादयो-
र्जडाकृतिं भस्मनिगूढवह्निवत् ।
स नोदतिष्ठत्पतितः पदाम्बुजे
प्रायस्स[4]जाड्यं प्रकटं विधित्सति ॥ १६ ॥

उपात्तहस्तश्शनकैरवाङ्मुखं
तं देशिकेन्द्रः कृपयोदतिष्ठिपत् ।
उत्थापिते स्वे तनये पिताब्रवी-
द्वद प्रभो जाड्यममुष्य किंकृतम् ॥ १७ ॥

---

[1] अ. समागतान् ।
[2] अ. पुस्त ।
[3] का. अनीनयत् ।
[4] अ. स्व ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षाण्यतीयुर्भगवन्नमुष्य
पश्चाष्ट जातस्य विनावबोधम् ।
नाध्यैष्ट वेदानलिखच्च नार्णान्
[1] अकारयं चोपनयं कथंचित् ॥ १८ ॥

क्रीडापरः क्रोशति बालवत्स[2]
स्तथापि न क्रीडितुमेष [3] धावति ।
[4] बालं हठान्मुग्धमिमं निरीक्ष्य
सन्ताडयन्तोऽपि न रोषमेति ॥ १९ ॥

भुङ्क्ते कदाचिन्न च जातु भुङ्क्ते
स्वेच्छाविचारी न करोति चोक्तम् ।
तथापि रुष्टे न तु ताड्यतेऽयं
स्वकर्मणा वर्धित एव नित्यम ॥ २० ॥

इतीरयित्वोपरते च विप्रे
पप्रच्छ तं शङ्करदेशिकेन्द्रः ।
कस्त्वं किमेवं जडवत्प्रवृत्ति-
स्स चाब्रवीद्बालवपुर्महात्मा ॥ २१ ॥

नाहं जडः किन्तु जडः प्रवर्तते
मत्सान्निधाने न विसन्दिहे गुरो ।
षडूर्मिषड्भावविकारवर्जितं
सुखैकतानं परमस्ति तत्पदम् ॥ २२ ॥

ममेव भूयादनुभूतिरेषा
मुमुक्षुवर्गस्य [5] निरूप्य विद्वान् ।
पद्यैर्वरैर्द्वादशभिर्बभाषे
चिदात्मतत्त्वं विधुत [6] प्रपञ्चः ॥ २३ ॥

---

[1] अ. अचीकरं । [2] अ. वर्गः । [3] अ. याति । [4] अ. बालाश्शठा । [5] का. निरूपणीया । [6] अ. प्रपञ्चम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशयन्ते [1] परमात्मतत्त्वं
करस्थधात्रीफलवद्यदेकम् ।
श्लोकास्तु हस्तामलकाः प्रसिद्धा-
स्तत्कर्तुराख्यापि तथैव वृत्ता ॥ २४ ॥

विनोपदेशं स्वत एव जातं
परात्मबोधं द्विजवर्यसूनोः ।
व्यस्मेष्ट संप्रेक्ष्य स देशिकेन्द्रो
न्यधात्स्वहस्तं कृपयोत्तमाङ्गे ॥ २५ ॥

पुराभवाभ्यासवशेन सर्वं
स वेत्ति सम्यङ् न च वक्ति किञ्चित् ।
नो चेत्कथं स्वानुभवैकगमं-
पद्यानि भाषेत निरक्षरास्यः ॥ २६ ॥

सुते निवृत्ते वचनं बभाषे
स देशिकेन्द्रः पितरं तदीयम् ।
वस्तुं न योग्यो भवता सहायं
न तेऽमुनार्थो जडिमास्पदेन ॥ २७ ॥

न सक्तिरस्यास्ति गृहादिगोचरा
नात्मीयदेहे ममतास्य विद्यते ।
[2] तदार्थ्यतेऽन्यत्र ममत्ववेदनं
यदा न सा स्वे किमु बाह्यवस्तुषु ॥ २८ ॥

इतीरयित्वा भगवान्द्विजात्मजं [3]
ययौ गृहीत्वा दिशमीप्सितां पुनः ।
विप्रोऽप्यनुव्रज्य ययौ स्वमन्दिरं
कियत्प्रदेशं स्थिरधीर्बहुश्रुतः ॥ २९ ॥

---

[1] अ. परमार्थ ।

[2] अ. तादात्म्यतोऽन्यत्र (?) ।

[3] अ. द्विजन्मजं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जम्बूद्वीपं शस्यतेऽस्यां पृथिव्यां
तत्राप्येतन्मण्डलं भारताख्यम् ।
काश्मीराख्यं मण्डलं तत्र शस्तं
यत्रास्ते सा शारदा वागधीशा ॥ ३० ॥

द्वारैर्युक्तं मण्डपैस्सच्चतुर्भि
र्देव्या गेहं यत्र सर्वज्ञपीठम् ।
यत्रारोहस्सर्व[1] विद्वज्जनानां
नान्ये सर्वे यत्प्रवेष्टुं क्षमन्ते ॥ ३१ ॥

प्राच्याः प्राचीं पश्चिमाः पश्चिमान्तां
ते चोदीच्यास्तामुदीचीं प्रपन्नाः ।
सर्वज्ञास्तद्द्वारमुद्धाटयन्तो
दक्षा नोऽद्धा नो तदुद्घाटको वा ॥ ३२ ॥

वार्तामुपश्रुत्य स दाक्षिणात्यो
मानं तदीयं परिपातुमिच्छन् ।
काश्मीरदेशाय जगाम हृष्टः
श्रीशङ्करो द्वारमपावरीतुम ॥ ३३ ॥

द्वारं पिनद्धं किल दाक्षिणात्या
न सन्ति विद्वांस इतीह दक्षाः ।
तां किंवदन्तीं विफलां विधातुं
जगाम देवीनिलयाय हृष्यन् ॥ ३४ ॥

वादिव्रातगजेन्द्रदुर्मदघटादुर्गर्वसर्वङ्कष-
श्रीमच्छङ्करदेशिकेन्द्रमृगराडायाति सर्वार्थवित् ।
दूरं गच्छत वादिदुश्च[2] रगजास्सन्यासदंष्ट्रायुधो
वेदान्तोपवनाश्रयस्तदपरं द्वैतं वनं भक्ष्यति ॥ ३५ ॥

---

[1] अ. वित्सज्जनानां । [2] अ. दुःशठ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संश्रावयन्नध्वानि देशिकेन्द्रः
श्रीदक्षिणद्वारभुवं प्रपेदे ।
कवाटमुद्घाट्य निवेष्टुकामं
ससंभ्रमं वादिजनो न्यरौत्सीत् ॥ ३६ ॥

अथाब्रवीद्वादिगणस्स देशिकं
किमर्थमेवं बहुसंभ्रमाक्रिया ।
यदत्र कार्यं तदुदीर्यतां शनै-
र्न संभ्रमं कर्तुमलं तदीप्सितम् ॥ ३७ ॥

यःकश्चिदेतीति परीक्ष्यते चेत्
वेदाखिलं [1] नोऽविदितं ममाण्वपि ।
इत्थं भवान्वाक्कि समुन्नतेच्छया
दत्वा परीक्षां व्रज देवतालयम् ॥ ३८ ॥

षड्भाववादी कणभुङ्मताश्रित्
पप्रच्छ तं स्वीयरहस्यमेकम्
संयोगभाजः परमाणुयुग्मात्
जातश्च सूक्ष्मं द्व्यणुकं मतं नः ॥ ३९ ॥

यस्मादणुत्वं तदुपाश्रितं त-
ज्जायेत कस्माद्वद सर्वविच्चेत् ।
नो चेत्प्रभुत्वं तव वक्तुमेतत्
सर्वज्ञभाषा विहिता कथं ते ॥ ४० ॥

या द्वित्वसंख्या परमाणुनिष्ठा
सा कारणं तस्य गतस्य मात्रा ।
इतीरिते तद्वचनं प्रपूज्य
स्वयं [2] ह्यवर्धिष्ट कणादलक्ष्मी ॥ ४१ ॥

[1] अ. नाविदितं ।
[2] का. न्यवर्तिष्ट ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]तत्रास नैयायिक आत्तगर्वः
  कणादपक्षाच्चरणाक्षपक्षे ।
मुक्तेर्विशेषं वद सर्ववित्चेत्
  नो चेत्प्रतिज्ञां त्यज सर्ववित्वे ॥ ४२ ॥

[2]आत्यन्तनाशे गुणसंहृतेर्या
  स्थितिर्नभोवत्कणभक्षपक्षे ।
मुक्तिस्तदीये चरणाक्षपक्षे
  सानन्दसंवित्सहिता विमुक्तिः ॥ ४३ ॥

पदार्थभेदः स्फुट एव सिद्ध
  स्तथेश्वरस्सर्वजगद्विधाता ।
स ईशवादीत्युदितेऽभिनन्द्य
  नैयायिकोऽपि न्यवृतद्विरोधात् ॥ ४४ ॥

तं कापिलः स्माह च मूलयोनिः
  किं वा स्वतन्त्रा चिदधिष्ठिता वा ।
जगन्निदानं वद सर्ववित्त्वा-
  न्नो चेद्विशेषस्तव दुर्लभः स्यात् ॥ ४५ ॥

सा विश्वयोनिर्बहुरूपभागिनी
  स्वयं स्वतन्त्रा त्रिगुणात्मिका सती ।
इत्येव सिद्धान्तगतिस्तु कापिली
  वेदान्तपक्षे परतन्त्रता मता ॥ ४६ ॥

[3]ततो भदन्तो न्यरुणत्स सर्वो
  दत्वा परीक्षां व्रज धाम देव्याः ।
बौद्धास्तथा संप्रथिताः पृथिव्यां
  बाह्यार्थविज्ञानकशून्यवादैः ॥ ४७ ॥

---

[1] अ. तत्रापि । [2] अ. अत्यन्त ।
[3] अ. तथागतोऽथ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाह्यार्थवादो द्विविधस्तदन्तरं
वाच्यं विवक्षुर्यदि देवतालयम् ।
विज्ञानवादस्य च किं विभेदकं
भवन्मतं ब्रूहि ततः परं व्रज ॥ ४८ ॥

सौन्त्रान्तिको वक्ति हि वेद्यजातं
लिङ्गाधिगम्यं त्वितरोऽक्षगम्यम् ।
तयोस्तयोर्भङ्गुरता विशिष्टा
भेदः क्रियान् वेदनिवेद्यभागी ॥ ४९ ॥

विज्ञानवादी क्षणिकत्वमेषा-
मङ्गीचकारापि बहुत्वमेषः ।
वेदान्तवादी स्थिरसंविदेके-
त्यङ्गीचकारेति महान्विशेषः ॥ ५० ॥

अथाब्रवीद्दिग्वसनानुसारी
रहस्यमेकं वद सर्वविच्चेत् ।
यदस्तिकायोत्तरशब्दवाच्यं
तत्किं मतेऽस्मिन्वद देशिकाशु ॥ ५१ ॥

तत्राह देशिकवरः शृणु रोचते चेत्
जीवादिपञ्चकमभीष्टमुदाहरन्ति ।
तच्छब्दवाच्यमिति जैनमतं प्रशस्ते
यद्यस्ति [1]वोढुमपरं कथयाशु तन्मे ॥ ५२ ॥

दत्तोत्तरे वादिगणे तु बाह्ये
बभाण कश्चित्किल जैमिनीयः ।
शब्दः किमात्मा वद जैमिनीये
द्रव्यं गुणो वेति ततो व्रज त्वम् ॥ ५३ ॥

---

[1] अ. बोढुं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्या वर्णास्स[1]र्वगाः श्रोत्रवेद्या
यत्तद्रूपं शब्दजालश्च नित्यम् ।
द्रव्यं व्यापीत्यब्रुवञ्जैमिनीयाः
इत्येवं तं प्रोचिवान् देशिकेन्द्रः ॥ ५४ ॥

